शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत दशमस्कंध	—	पुराण	अपूर्ण	-	3/12	300	मोडि	कागद	12			

M-2952

साधुलक्षणमुक्तं। लक्षैर्लक्षणमाह मल्लिंगेत्यष्टभिः। लिंगानि प्रतिमादीनि॥३४॥ सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणं॥३५॥ पर्वाणि जन्माष्टम्यादीनि तद्
उत्सवोदनं॥३६॥ बलिविधानं पुष्पोपहारादिसमर्पणं। सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः॥३७॥ उद्यानादिकरणे सामर्थ्ये सति स्वतः। असति

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं। परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं॥३४॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव।
सर्वलाभोपहरणं दास्येनात्मनिवेदनं।३५। मज्जन्मकर्मकथनं मम पर्वानुमोदनं॥ गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः।३६॥ या
त्राबलिविधानं च सर्ववार्षिकपर्वसु॥३७॥ वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं। ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः। उद्यानो
पवनाक्रीडपुरमंदिरकर्मणि।३८। सम्मार्जनोपलेपाभ्यां सेकमंडलवर्तनैः। गृहशुश्रूषणं मह्यं दासवद्यदमायया॥३९॥ ॥

वाद्यैः संभूयोद्यमः उद्यानं पुष्पप्रधानं। उपवनं फलप्रधानं। आक्रीडं क्रीडास्थानं।३८। संमार्जनं रजसोपाकरणं। उपलेपः गोमयोदकादिभिरालेप
नं सेकश्चंदनोदकैः प्रोक्षणं। मंडलवर्तनं सर्वतोभद्रादिकरणं। मह्यं मम॥३९॥ ॥

भा०ए०
५६

नतुगृहविषयं।

स्वयमप्येवंनचानिवेदितंनस्वीकुर्यात्।एतच्चसाधारणंस्थावरविषयं।जंगमविषयंवा।तत्तयातुग्राह्यमेव।पद्मेऽपिमासोपवासेन[illegible]मासेकृत्स्नफलंपरिकीर्त्तितं।विष्णोर्नैवेद्यसिक्थ
न्नभुएपितद्भुंजतांकलौ।हृदिरूपंमुखेनाममनैवेद्यमुदरेहरेः।पादोदकंचनिर्माल्यंमस्तकेयस्यसोऽच्युतइत्यादिवचनेभ्यः।यद्वाअन्यस्मैनिवेदितंमेनोपयुंज्यात्।मह्यंतुनिवे
दयेदित्यर्थः।विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं।पितृभ्यश्चैवतदानंत्यायकल्पते।पितृशेषंतुयोदद्याद्धरयेपरमात्मने।रेतोधाःपितरस्तस्यभवंतिक्लेशभागिनइत्यादिव

तद्देयं
वं

अमानित्वमदंभित्वंकृतस्यापरिकीर्तनं।अपिदीपावलोकंमेनोपयुंज्यान्निवेदितं।४०।यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः।त
त्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते।४१।सूर्योग्निर्ब्राह्मणोगावोवैष्णवःखंमरुज्जलं।भूरात्मासर्वभूतानिभद्रपूजापदानिमे।४२।सूर्ये
तुविद्ययात्रय्याहविषाग्नौयजेतमां।आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना।४३।वैष्णवेबंधुसत्कृत्याहृदिखेध्याननिष्ठया।वायौमु
ख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः।४४।स्थंडिलेमंत्रहृदयैर्भोगैरात्मानमात्मनि।क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमां।।४५।। ।।

राम
५६

चनेभ्यः।४१।इदानीमेकादशपूजाधिष्ठानान्याहसूर्यइति।हेभद्र।४२।अधिष्ठानभेदेनपूजासाधनान्याहसूर्यइतित्रिभिः।त्रय्याविद्ययासूक्तैरुपस्थानादिना।अंगहे
उद्धव।यवसादिनातृणादिना।४३।बंधुसत्कृत्याबंधुसन्मानेन।हृदिखेहृदयाकाशे।मुख्यधियाप्राणदृष्ट्या।तोयेतोयादिभिर्द्रव्यैस्तर्पणादिना।४४।स्थंडिलेभुविमंत्रहृदयैःरह
स्यमंत्रन्यासैः।४५।।

द

ॐ

सर्वाधिष्ठानेषु ध्येयमाह धिष्ण्येष्वेतेष्विति। इति अनेन प्रकारेण एषु धिष्ण्येषु।४६॥ उक्ताया भक्तेः फलमाह इष्टापूर्तेनेति। सद्भक्तिं दृढां भक्तिं अंतरंगं साधनमाह। इष्टं म
त्स्मृतिः साधुसेवया भवति। यद्वा स्मृतिर्जातं। ततश्च दृढभक्तिमतः पुंसः साधुसेवया मज्ज्ञानं भवतीत्यर्थः।४७। ज्ञानभक्तिमार्गौ विकल्पौ। तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इ
त्याह। प्रायेणेति। सत्संगेन यो भक्तियोगः तेन विना उपायः संसारतरणे न विद्यते। सत्संगे तत्र हेतुमाह। हि यस्मात्। सतामहं प्रायणं प्रकृष्टमयनं आश्रयः। अतः सत्संगो म

धिष्ण्येष्वेष्विति मद्रूपं शंखचक्रगदांबुजैः। युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः।४६॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः। लभते म
यि सद्भक्तिं मत्स्मृतिः साधुसेवया।४७। प्रायेण भक्तियोगेन सत्संगेन विनोद्धव। नोपायो विद्यते सम्यक्प्रायणं हि सतामहं।४८। अथैतत्पर
मं गुह्यं शृण्वतो यदुनंदन। सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा॥४९॥ ॥इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां एका
दशस्कंधे एकादशोध्यायः॥ ॥

र्यंतरंग इत्यर्थः॥४८॥ इदानीं सांख्ययोगादीनि साधनांतराणि सापेक्षाणि सव्यभिचाराणि च। सत्संगभक्तिस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयितुमाह अथेति। ए
तद्वक्ष्यमाणं परमं गुह्यं॥ अतः शृण्वित्यर्थः॥४९॥ ॥इति श्रीभागवते भावार्थदीपिकायां एकादशे एकादशः॥ ॥

भा०ए०
५८

द्वादशे साधुसंगस्य महिमा वर्णितः पुरा। कर्मानुष्ठानतस्त्यागाग्यवस्थाततः परं। नरोधयति निवंशीकरोति योगः आसनप्राणायामादिः। सांख्यं तत्वानां विवेकः धर्मः सामा
न्यतो। हिंसादिः स्वाध्यायो वेदजपः तपः कृछ्रादि त्यागः संन्यासः। इष्टापूर्तं इष्टं च पूर्तं च। तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणं। दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते। २
व्रतानि एकादश्युपवासादीनि। यज्ञः देवपूजा। छंदांसि रहस्यमंत्राः। अवरुंधे वशीकरोति। १। यातुधाना राक्षसाः। ३। त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः। ५। ऋक्षो जांववान्। गृध्रो

श्रीभगवानुवाच॥ ॥ नरोधयति मां योगो न सांख्यं धर्म एव च। न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा। १॥ व्रतानि यज्ञः छंदांसि तीर्थानि नि
यमा यमाः। यथावरुंधे सत्संगः सर्वसंगापहो हि मां। २॥ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः। गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्य
काः। ३॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः। रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगे युगे। ४। वहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवाद
यः। वृषपर्वा वलिर्वाणो मयश्चाथ विभीषणः। ५॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः। व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथा
परे। ६। ते नाधीतश्रुतिगणा नोपासितमहत्तमाः। अव्रतातप्ततपसो मत्संगान्मामुपागताः॥ ७॥ ॥

राम
५८

अपरे वरुणादय

जटायुः। वणिक्पथः तुलाधारः। व्याधः धर्मव्याधः। यज्ञपत्न्यः दीक्षितपत्न्यः। तेषां सत्संगाव्यतिरिक्तसाधनांतराभावमाह त इति। न अधीताः श्रुतिगणा यैः। न दर्शनं उपासिता
महत्तमा यैः ते तथा। किंच। अव्रता अतप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैः ते च तथा। सत्संगादिति सद्भिः संगो ना ममैव संगः इत्यभिप्रेत्योक्तं। यद्वा। स्वसंगस्यापि सत्संग
त्वं विवक्ष्यते स्वस्यापि सत्वात्। यद्वा मदीयसंगादित्यर्थः॥ ७॥ श्रीविश्वनाथाय नमः॥ ॥

तत्र वृत्रादीनां तत्त्वतु नामकथं चित्साधनांतरं। गोपीप्रभृतीनां तु नात्यल्पमपीत्याह केवलेनेति। सत्संगालब्धेन केवलेनैव भावेन प्रीत्या। नगाः यमलार्जुनादयः। यद्वा। तदानीं तनस
र्वतरुगुल्मादीनामपि भावोऽप्पीति गम्यते। तदुक्तं भगवतैव अहो अमी देववरामरार्चितपादांबुजं ते सुमनः फलार्हणं। नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृत
मित्यादि। सिद्धाः कृतार्थाः संतः ईयुः प्रापुः॥८॥ स्वप्राप्तेर्दुर्लभतामाह। यमिति। योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात् तं मामीयुरिति पूर्वेणान्वयः। अत्र च प्रथमं या गोप्यः प

दुर्लभादयः

केवलेन हि भावेन गोप्यो गावो नगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा॥८॥ यं न योगेन सांख्येन दानव्रततपोध्वरैः। व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि॥९॥ रामेण सार्द्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः। विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय॥१०॥ तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण। क्षणार्द्धवत्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः॥

ध्यादयो वा श्रीकृष्णेन सह संगताः ते संतः तत्संगो येषां सत्संगाः तेन वा तेषां लब्धिरिति ज्ञातव्यं॥८॥ गोपीनां भावं प्रपंचयति। रामेणेति त्रिभिः। श्वाफल्किना अक्रूरेण। मयि प्रणीते
सति॥ मे मत्तोऽन्यं सुखाय न ददृशुः। कुतः वियोगेन तीव्रा उद्गुः महत्य आधियो यासां ताः। अत्र हेतुः मयि विगाढेन अतिदृढेन भावेन प्रेम्णा अनुरक्ताः विसंसक्तानि चित्तानि यासां ताः॥१०॥ ती
व्राधित्वं प्रपंचितास्ता इति। मया सह या एव क्षपा रात्रयः क्षणार्द्धवन्नीताः ता एव पुनः मया हीनानां तासां कल्पसमा बभूवुः कथंभूताः तास्ताः वृंदावनगोचरेण मयेत्यर्थः॥११॥ ॥

किंचएवंतीव्राधयस्ताःमोहमिषेणसमाधिंप्राप्ताइत्याहताइति।मयिअनुषंगेणआसक्तयावद्धाधियोयासांताःस्वमात्मानंस्वदेहांदूरस्थंइदंसंनिहितंचनाविदन्।यद्वास्वंपति पुत्रादि।आत्मानंअहंकारास्पदं।अदःपरंलोकंइदंइमंलोकंचनाविदन्नितियथामुनयःसमाधौनामरूपेनविदुस्तद्वत्।किंतु।अब्धितोयेनयइवमयिप्रविष्टाइत्यर्थः।१२।ताअबलाःकेवलंमत्कामाः।अस्वरूपविदःस्वरूपंतुनजानंति।तथापिसत्संगात्जारंब्रह्मजारबुद्धिविषयमपिब्रह्मस्वरूपमेववमांपरमंप्रापुरित्यर्थः।१३।यस्मादेवंभूतोमहासंगेनकलाने।

ताना विदन्मय्यनुषंगवद्धधियःस्वमात्मानमदस्तथेदं।यथासमाधौमुनयोब्धितोयेनद्यःप्रविष्टाइवनामरूपे।१२।।मत्कामारमणंजारमस्व रूपविदोऽवला।ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः।१३।तस्मात्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां।प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुत मेवच।।१४।।मामेकमेवशरणमात्मानंसर्वदेहिनां।याहिसर्वात्मभावेनमयास्याःह्यकुतोभयः।।१५।। ।।उद्धवउवाच।। ।।संशयः शृण्वतोवाचंतवयोगेश्वरेश्वर।ननिवर्तंतिआत्मस्थायेनभ्राम्यतिमेमनः।।१६।। ।।

तस्मात्वंचोदनांश्रुतिं।प्रतिचोदनांस्मृतिंवायद्वा।विधिंचनिषेधंचउत्सृज्य।।१४।।शरणंयाहि।मयैवाकुतोभयःस्याःभवः।१५।।पूर्वंतावन्मयोदितेष्ववहितःस्वधर्मेषुस्थितात्मा।तिताक र्मकर्तव्यमित्युक्तं।इदानींतुतत्सर्वंत्यक्त्वामांशरणंयाहीत्युच्यते।।तत्रकिमात्मनःकर्तव्याधपि।वैनाप्निवेत्यात्मस्थःआत्मविषयःसंशयोननिवर्तते।यद्वाकर्मकार्यंत्याज्यंवेत्या त्मस्थःसंशयोननिवर्ततइतिपृच्छति।संशयइति।येनसंशयेन।।१६।। ।।

रूपः प्रसिद्धः गुहां देहं प्रविष्टः स ब्रह्मने इत्यारख्या विततवेदलक्षणाभिधानप्रपंचरूपेणा
रा सर्वास्त्रिधाहारेणा च

विघ

उन्नरं सत्पुरुषप्रवृत्तिः। अयं भावः ईश्वरस्य स्वमायावशात्प्रपंचात्मना भाति। तत्प्रपंचाध्यासाच्च जीवानामनाद्यध्यकर्तृत्वादि। ततो विधिप्रतिषेधाधिकारः तदानीं
सत्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तं। सत्वे च शुद्धे पुनः कर्मजाऽपरिहाराय भक्तिविक्षेपकं कर्मादिकं परित्यज्य दृढविश्वासेन भजेत्युक्तं। जातायां तु विद्यायां न किंचित्कर्तव्यम
स्तीति। तत्र तावदीश्वरात्प्राणादीन्द्रियद्वारा जीवसंसृतिकारणभूतं प्रपंचोद्गममाह स एष इति। स एषः अपरोक्षः जीवयतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेषु
आधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः। तामेवाभिव्यक्तिमाह घोषेणेति घोषेण परसाख्येन नादवता प्राणेन सह गुहां आधारचक्रं प्रविष्टः सन् मनोम

॥ श्रीभगवानुवाच ॥ ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां
प्रविष्टः। मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः॥ १७ ॥ ॥

यं सूक्ष्मं रूपं पश्यंत्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे च उपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अ
तिस्थूलो नानावेदशाखात्मको भवति। तथा च श्रुतिः। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनु
ष्या वदंतीति। अतिगुह्यः श्लोकस्तथापि मित्रावरुणसदनादुच्चरंती त्रिषष्टिं वर्णानंतः प्रकटकरणैः प्राणसंगात्प्रसूतां तां पश्यंतिं प्रथममुदितां मध्यमां बुद्धिसंस्थां
स्यत्यास्थाना मकानि त्रावरुणसदनात्सदग्नीषोमस्थानात् वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्य इति॥ १७ ॥ ॥ इति कारणाया सारतीप
वरुणः सोमः तयोः सदनं परमात्मत्वियुतः म्घासस्य त्रीहुतु पलभ्यते। तस्मादुच्चरंती त्रिषष्टीवर्णान् उज
एकविंशतिह्रस्वदीर्घप्लुतयोगेन। ऋरुवर्णास्त्रिधा नव। ऋवर्णः प्लुतहीनो द्विविधः लृकारोऽपि द्विविधः दीर्घहीनः।

भा०ए०
५५

अथ व्यक्तस्य मतः सूक्ष्मक्रमेणाभिव्यक्तौ दृष्टांतः यथेति। यथाऽग्निः खे ऊष्मा अव्यक्तोऽस्मरूपः दारुणि अधिकं मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो ल
व्वतिष्ठनः प्रकृष्टो जातो हविषा समेधते। तथैवेयं वाणी मम व्यक्तिः।१८। उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तीरतिदिशति। एवंगदिः आदानं भाषणं नाम मे व्यक्तिरित्युपसंहारः
कर्म हस्तयोर्वृत्तिः। गतिः पादयोः। विसर्गः पायूपस्थयोरिति कर्मेंद्रियाणां। घ्राणः अवघ्राणं। रसो रसनं। दृक् दर्शनं। स्पर्शः स्पर्शनं। श्रुतिः श्रवणमिति ज्ञानेंद्रियाणां। संकल्पो म

यथानलः खेऽनिलबंधुरुष्मा बलेन दारुण्यधिमथ्यमानः। अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी।।१८।।
एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च। संकल्पविज्ञानमथाऽभिमानः सूत्रं रजः सत्वतमोविकारः।।१९।। अयं हि
जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः। विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत्।।२०।। ।।

नसः। विज्ञानं बुद्धिवित्तयोः। अभिमानो हंकारस्य। सूत्रं प्रधानस्य सत्वरजस्तमसां विकारो। भिद्येवा दिक्विविधः प्रपंचः मे व्यक्तिरिति पूर्वेणान्वयः।१९। नन्वस्मादीश्वरात्तिव्यक्तिरूपः प्र
पंचो नेश्वरादन्यो भिन्नोऽस्तीत्याह। अयमिति। अयं जीव ईश्वरः आद्यावव्यक्त एक एव वयसा कालेन विश्लिष्टा विभक्ता वागादींद्रियरूपाः शक्तयो यस्य। यद्वा। विशेषेण श्लिष्टा आ
लिंगिता मायाशक्तिर्येन सः बहुप्रकार इव भातीत्यतः स एव आद्यः त्रिवृत् त्रिगुणा अयः अब्जयोनिः लोकपद्मस्य कारणभूतः। एकस्य बहुधा भाने दृष्टांतः। योनिं क्षेत्रं प्रतिपद्य
प्राप्य बीजानि यद्वदिति।।२०।। ।।

५५

तस्मात्त्वमायाविलसितत्वान्नदाश्चर्यमिदं जगन्न ततः पृथगिति सदृष्टान्तमाह यस्मिन्निति तंतुविताने संस्थाछितिर्यस्य सः पटो यथा तथा तस्मिन्निदं विश्वं श्रोतं दीर्घतंतुषु पटइव प्रोतं तिर्यक्तं
तुष्विव।।एवंभूतं समष्टिव्यष्ट्यात्मकं विश्वमविद्यया।तमध्यस्तं वृक्षरूपं जीवस्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेन तत्कर्मादि सर्वं त्याज्यमित्युक्तमित्याशयेनाह यएष इति सार्धैस्त्रिभिः
पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्म तत्फले वा प्रसूते जनयति।।२१।। वृक्षरूपकं प्रपंचयति द्वे इति द्वे पुण्यपापे अस्य बीजे। सवशतं मूलः शतमपरिमि

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः। य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते।।२१।। द्वे अस्य
बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः। दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः।।२२।। ।।

ताः वासनाः मूलानि यस्य। त्रयो गुणा नालानि प्रकांडं यस्य। पंचरसाः शब्दादिविषया स्तेषां प्रसूतिर्यस्मात्। दशएकादश शाखा इंद्रियाणि यस्य। द्वयोः सुपर्णयोः जीवपरमात्मनोर्नी
डं यस्मिन्। त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य। द्वे सुखदुःखे फले यस्य सः। अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तन्निर्भिद्य गतस्य संसाराभावात्।।२२।। ।।

भा०ए०

६०

तत्फलभोक्तृता हृष्टा घ्नंतीति। गृध्राः कामिनः। ग्रामेचरा गृहस्थाः। अरण्ये हंसास्त्वेकफलं दुःखमदंतीति परिणामतः स्वर्गादेरपि दुःखरूपत्वात्। हंसा विवेकिनो। अरण्यवासाः जंतो संन्यासिन एकं फलं सुखमदंति। एकं परमात्मानं मायामयं बहुवज्ञरूपं इज्यैः पूज्यैर्गुरुभिः कृत्वा यो वेद स वेदं तत्त्वार्थं वेद।२३। त्वं चैवं ज्ञानात्कृतकृत्यः सर्वं साधनं त्यजेत्याह। एवमिति। एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानेन कुठारेण अतंद्रितो वा जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्वा परमात्मानं च संप्रपद्य प्राप्य अस्त्रमा

जीवाशयं

छि

अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं।२३। एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रं।२४। ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे द्वादशोऽध्यायः॥ ॥श्रीभगवानुवाच॥ ॥सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः। सत्वेनान्यतमौ हन्यात्सत्वं सत्वेन चैव हि।१।

न

राम

६०

अस्त्रं त्यजेति।२४। एकादशे द्वादशे त्रयोदशेऽथ सत्वस्य वृद्ध्या विद्योदयक्रमः। हंसेतिहासतश्चित्रगुणाविश्लेषवर्णनं। विद्याकुठारेण जीवाशयं संवृश्च्य साधनं त्यजेदुक्तं तत्र तम आदिगुणत्रयवृत्तिप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्वमिति सप्तभिः। तत्र यद्यानंदादिवदात्मधर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां निवृत्तिर्न स्यात् न त्वेतदस्तीत्याह बुद्धेः प्रकृतेरेते गुणाः न त्वात्मन इति। अतः सत्वेन सत्ववृद्ध्या रजस्तमोहन्यात् रजस्तमोहत्त्वीजयेदित्यर्थः सत्वं च सत्वेन या दृढनिश्चितरूपमुपशमात्मकेन सत्वेनैव हन्यात्।१। ॥

गुणात्रयमत्वमति [illegible] स्यस्य उक्तानुजवाजावा दृइ

प ति ननु

नन्वगुणत्रयवृत्तीनांपरस्परोपमर्द्दरूपत्वात्कथंसत्ववृत्त्यैवेतरवृत्त्योर्निग्रमित्यपेक्षायांतत्राहसत्वेति।धर्मोमद्भक्तिलक्षणयतियोधर्मःसःभक्तिरूपएववोसत्वमेवकथंवर्द्धेततत्राहसा
त्विकानांपदार्थानामुपासनयासेवयासत्वंवृद्धंभवतीत्यर्थः॥२॥सत्ववृद्धधर्मोरजस्तमसीहन्यात।कुतः।नविद्यतेउत्तमोयस्मात्सःसर्वोत्तमः।यतःसत्ववृद्धिःसत्वस्यवृद्धिर्यस्मात्त
त्कारणंसः।अतएवतत्कार्योधर्मप्रतिबंधोपिनास्तीत्याह।तस्मिन्नुभयस्मिन्हते।तन्मूलःतेरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचमूलंयस्यसः॥३॥सात्विकोपास

श्रीभगवानुवाच॥ ॥सत्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः॥सत्वेनान्यतमौहन्यात्सत्वंसत्वेनचैवहि॥१॥सत्वाद्धर्मोभवेद्वृद्धात्पुंसोमद्भक्ति
लक्षणः॥सात्विकोपासयासत्वंततोधर्मःप्रवर्तते॥२॥धर्मोरजस्तमोहन्यात्सत्ववृद्धिरनुत्तमः।आशुनश्यतितन्मूलोह्यधर्मउभयेहते।
आगमोऽपःप्रजादेशःकालःकर्मचजन्मच।ध्यानंमंत्रोथसंस्कारोदशैतेगुणहेतवः॥४॥तत्तत्सात्विकमेवैषांयद्यद्वृद्धाःप्रचक्षते।निंदंतिता
प
मसंतत्तद्राजसंतदुपेक्षितं॥५॥

स्तु मृत्र्यः सत्वमग संवारःवसं
नादिः वर्णाश्रमादि विहितं
स्य कुलविशुद्धिः ध्यानं
देवताविषयंगायत्र्यादिगर्भ
धानादिः

नयासत्वंवर्द्धतइत्युक्तं।तानेवसत्ववृद्धिहेतून्दर्शयितुंसामान्यतोगुणत्रयवृत्तिहेतूनाह।आगमःशास्त्रं।अपः।आपःक्वचिदागमोर्थइतिपाठः॥४॥एषुसात्विकादिवि
भागमाह।एषामेवमध्येप्रवृद्धास्तेप्रशंसंति।यद्यन्निंदंतितत्तत्तामसं।यत्तैर्वृद्धैरुपेक्षितंनस्तुतंनचनिंदितंतद्राजसं॥५॥ ॥
तत्सात्विकं तामसं

सत्तुदानू। ~~स्वतनुसंभाव्यान्~~

भा०ए०

६१

सात्विकान्येवेति। निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाषंडशास्त्राणि। तीर्थपयएव। नगंधोदकसुराद्याः। प्रजां जनः निवृत्तजनमेव। न निहतान्जनान्। न प्रवृत्तदुराचारान्। विविक्तदेशं। नरथ्याद्यूतदेशादि। कालं ब्राह्ममुहूर्तादिकं ध्यानादौ। नप्रदोषनिशीथादि। नित्यकर्मवनित्यं। नकाम्याभिचारादीनि। जन्मवैष्णवशैवदीक्षालक्षणं। नशाक्तक्षुद्रदीक्षारूपं। ध्यानंश्रीविष्णोः। नकामिनीविद्विषोः। मंत्रंप्रणवादिकं। नकाम्यक्षुद्रान्। संस्कारमात्मनःशोधकं। नतुकेवलंदेहगृहादीनां। नतु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्सत्वसेवया धर्मेणवा। अतआह। यावत्स्मृतिः आत्मापरोक्ष्यं। यावच्चदेहद्वयतत्कारणभूतगुणापोहः तावत्पर्यंतंज्ञानंनभवतीत्यर्थः। ६। ननुगुणव्यतिकराज्जातोदेहःकथंत्वाश्रयभूतान्गुणान्त्वनयबोत्पन्नमाविषयाः। योऽयंस्वयमथुपरमेत्। तत्राहवेणुसंघर्षजातोऽग्निर्यथास्वतनयवोत्पन्नान्। तिर्ज्ज्वालाभिर्दहन्नसंघर्षंदग्ध्वा स्वयंशाम्यति

सात्विकान्येवसेवेतपुमान्सत्वविवृद्धये। ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनं। ६॥ वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनं। एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः। ७॥ ॥उद्धवउ॥ ॥विदंतिमर्त्याःप्रायेणविषयान्पदमापदां। तथापिभुंजतेकृष्णतत्कथंश्वखराजवत्॥ ८॥ ॥श्रीभगवानुवाच॥ ॥अहमित्यन्यथाबुद्धिःप्रमत्तस्ययथाहृदि। उत्सर्पतिरजोघोरंततोवैकारिकंमनः॥ ९॥ ॥

एवंदेहोपिततक्रियः। तस्याग्नेरिववह्नियाव्यापारोयस्यसः। ७। ननुनियतेंद्रियतयासात्विकसेवायामपिनत्रिवरूपार्थः। तथापिराजसादीनुविषयान्दुःखमितिज्ञात्वानोपिकथंसेवतइतिपृच्छति। विदंतीति। परंस्थानं। श्वानोयथायोभर्त्स्यमानोअपिखरोयथापदाताड्यमानोअपिखरीमनुधावति। ८। अत्रोयथानिष्ठे... तुमानी ... अपिर्नहृतः। ८। मिथ्याभिनिवेशेनभुंजतइतिसहेतुकमाह। अहमिति त्रिभिः। प्रमत्तस्याविवेकशून्यस्यदेहादावहमितिमिथ्याबुद्धिर्हृदियथाददुत्सर्पति। ततोऽहंबुद्धेश्चवैकारिकंसत्वप्रधानमपिमनःप्रतिघोरंदुःखात्मकंरजःउपसर्जतिमनोव्याप्नोतीत्यर्थः॥ ९॥ ॥

इममर्थंक्रमेणदर्शयतिभगवान्अहमितित्रिभिः। श्रून्या३

सात्विकान्येव सेवेत

राम ६१ रामचंद्र

इदमेवं इदमेवं भोग्यमिति सविकल्पः संकल्पः स्यात्॥ ततश्च अहो रूपमहो लावण्यमिति गुणाध्यानाद्दुःसहः कामः स्यात्॥१०॥ ततो विषयासक्तो दुःखकर्माणि करोति॥११॥ एवं चेत्तर्हि कस्यापि दुःखनिवृत्तिः स्यादिति। शंक्याह। यदपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी पुनरतंद्रितो निरंतरं यत्नवान् सज्जते॥१२॥ विषयदोषदृष्ट्या पुनर्मनो निरोधाशक्तौ सुखं तन्निरोधोपायमाह। अप्रमत्त इति। अनिर्विण्णाः अनलसः यथाकालं त्रिषवणं मयि परमानंदरूपे अर्पयन् समादध्यात्॥१३॥ विषयैः संग्रथितस्य मनसश्छिद्यो

रजोयुक्तस्य मनसः संकल्पः सविकल्पकः॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः॥१०॥ करोति कामवशगः कर्माण्यविजितेंद्रियः। दुःखोदर्काणि संपश्यन् रजोवेगविमोहितः॥११॥ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः। अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते॥१२॥ अप्रमत्तोऽनुयुंजीत मनो मय्यर्पयंछनैः। अनिर्विण्णो यथाकालं जितश्वासो जितासनः॥१३॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः। सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा॥१४॥ ॥उद्धव उवाच॥ ॥यदा त्वं सनकादिभ्यो येन रूपेण केशव। योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं॥१५॥॥

गतेश्वर निष्ठत्वम संतावितं मत्समानं प्रतितत्त्रिरूपणप्रपेति हासमुपक्षिपति। एतावानिति। यथा वन्मय्यावेश्यत इत्येतावानित्यर्थः॥१४॥ मच्छिष्यैरित्युक्ते तेषामतिश्रैष्ठ्यं यस्मात्त्वेन रूपेणाति रूपणा संतवात्पृच्छति। यदेति। तं कालं तदेतद्रूपं च वेदितुं इच्छामि तत्कथयेति॥१५॥ ॥

भा॰ए॰
६२

मानसाः पुत्राः। सूक्ष्मां दुर्ज्ञेयां। एकांतिकीं गतिं परां काष्ठां॥१६॥ तदेवाह। गुणेष्विति। विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति। चेतसि च भूता विषया वासनारूपे
णैव तस्मिन्प्रविशंति। अतितितीर्षोः विषयानतिक्रमितुमिच्छोः॥१७॥ एवमिति। महादेवोपि स्वयंभूस्तानां प्रश्नं पृष्टः। ध्यायमानो विचारयन्नपि प्रश्नस्य बीजं यद्ज्ञानादयं प्रश्नस्तत्रो
क्तिं तत्र यतः कर्मविक्षिप्तधीः॥१८॥ प्रश्नस्य पारस्तत्तरणमिच्छा यो वा तस्य तितीर्षया जिज्ञासया। हंसरूपेणेति। यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्तः एवमहं गुणांश्चेतश्च

भगवानुवाच॥ ॥पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं गतिं॥१६॥ ॥सनकादय ऊचुः॥ ॥गुणे
ष्वाविशते चेतो गुणाश्चेतसि च प्रभो। कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः॥१७॥ ॥भगवानुवाच॥ ॥एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः॥
ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः॥१८॥ समामचिंतयद्देवः प्रश्नपारतितीर्षया। तस्याहं हंसरूपेण सकाशमगमं तदा॥१९॥ दृष्ट्वा मां त उपव्र
ज्य कृत्वा पादाभिवंदनं॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति। २०। इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा। यदवोचमहं तेभ्यस्तदुद्धव निबोध
मे।२१॥

य

राम
६२

ति। द्योतयितुं हंसरूपेणागतोऽस्मीति।२०। इत्यहं मुनिभिः पृष्ट इति पृथग्वाक्यं यदवोचमिति पृथग्वाक्यं। अतो नास्त्यध्याहारदोषः ते तेभ्यो यदवोचं तन्मे वचनं निबोध॥२१

देहादिविविक्तात्मतत्त्वेऽस्मितिति न्निष्ठस्य पराभाव्यमंतव्यान्स्वयमेव विषयचेतसो विश्लेषो भवतीति वक्तुं प्रश्नखंडनमिषेणैव तावदात्मानात्मविवेकमाह । वस्तुनइति त्रिभिः । किमा
त्मनो यं प्रश्नः तदुपाधेर्वा तत्संघस्य वा । यद्यात्मनस्तर्हि तत्स्य वक्तुः तत्परमार्थस्य प्रश्नस्य नानात्वे सति हे विप्राः वः युष्माभिः कृतः ईदृशः वक्तृषु निष्ठा रणरूपः कथं घटेतो वक्तुर
त्मदादुर्वा मम मकश्च आश्रयः अविशेषेच्चात्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः ॥ २२ ॥ भूतसंघविषयत्वेऽपि अयं वः प्रश्नः वाचारंभणमात्रेणारब्धः य

वस्तुनो यद्यनानात्व आत्मनः प्रश्न ईदृशः । कथं घटेत वो विप्रा वक्तुर्वा मम क आश्रयः ॥ २२ ॥ पंचात्मकेषु भूतेषु समानेषु च वस्तुतः ॥ को
भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः । २३ ॥ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः । अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा ॥ २४ ॥ ॥

तोऽनर्थकः । कुतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु अभिन्नेषु पुनश्च वस्तुतः परमकारणात्मतामतिभिन्नेषु । वाचारंभणमात्रमेवेत्यर्थः । अयं जगत् तत्त्वविचारे
सं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥ २३ ॥ तत्र पंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणात्मत्वमेवोपपादयति । मनआदिभिर्यद्गृह्यते तत्तदहमेवे
त्यर्थः ॥ अयं जगत् तत्त्वविचारेण एतेनैव सर्वात्मकोहमित्यंजसाऽनन्तरमुक्तं भवति ॥ २४ ॥ ॥

प्र

भा०ए० ६३

एवं च अखंडनमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणो ऽपि दुष्परिहरं यत्प्रश्नं तत्रोत्तरमाह। गुणेष्वित्यादिना यावदध्यायसमाप्तेः। अयमभिप्रायः यद्विकार्ये तु भोक्तादिरूपतया विषयैः संग्रथितं चित्तं बुध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत् तर्हि योगेन घटेत। तस्य तु स्वरूपमहं ब्रह्मैव। चित्ताध्यासेन तु तत्संबंधाभावतया विषयैः संग्रथितं अतः स्वस्वरूपब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन संसृतौ निर्विघ्नमावर्तं त्यजतो लयत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्रकाः सत्यं युगेष्वभवेत आविशंति गुणाश्चेतसि एवं गुणाश्चेतश्चोभयमपि मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देह उपाधिः न तु स्वरूपं। २५। तस्माद्दली स्तांभुवनः पुनर्गुणे

मदात्मनः

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः। जीवस्य देह उभयं गुणाश्चेतो मदात्मनः। २५॥ गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत्॥ २६॥ जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः॥ २७॥

वतेयात तत्संस्कारेणासेव्यमानमपि गुणेष्वाविशच्चित्तं। ते च पुनर्वासनारूपेण चित्तप्रकर्षेण संभवंतीति तथा ते गुणाश्च एवं यद्वृत्तयं तन्मद्रूपः सन् तत्त्यजेत्। २६॥ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वरूपता तत्राह। जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयः तास्व न स्वाभाविक्यः किंतु सत्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति वक्ष्यमाणक्रमेण गुणतः एव। जीवस्तु विलक्षणः तदवस्थारहित एव निश्चितः कुतः तासां साक्षित्वेन। २७॥ ॥

स्वा

राम ६३

ननु तर्हि कथमहं जागामीत्यादिप्रतीतिरित्यत आह। यर्हीति यस्मात्तस्य संसृतिः स्मरणामनयेतिमं संसृतिर्बुद्धिः तया बंधो ऽयमात्मनो गुणवृत्तीर्दृशाति। तस्मात्त्वयि तुर्ये स्थि
तः सन्निमं संसृतिबंधं जह्यात्। तन्नदा गुणावेतसां गुणानां चेतसश्चात्मन्यारोपो भवति। २८ कथं संसृत्या बंधः कथं चं तज्जह्यात् तदाह। अहंकारेण कृतं बंधं आत्मनः अ
र्थविपर्ययं आनंदावरणे नानर्थहेतुं विद्वान् जानन् तत्परं निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंता संसारो बुद्धिः तस्मिन् चिंता अलिमानं तत त कृतां त्य

यर्हि संसृतिबंधोऽयमात्मनो गुणवृत्तिदः। मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां॥२८॥ अहंकारकृतं बंधमात्मनोऽर्थविपर्ययं। विद्वान्नि
र्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत्॥२९॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः। जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा॥३०॥ असत्त्वा
दात्मनोऽन्येषां भावानां तत्कृता भिदा। गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा॥३१॥ ॥

गचिंतां च त्यजेदिति। २९। यावदेवं न त्यजेत्तावत्तस्य कर्मत्यागादि सर्वं व्यर्थमित्याह। यावदिति। यद्यपि जागर्त्ति कर्मादिषु तथापि स्वपन् सुप्तं स्वप्नान्यतयं निवलवति। यतोऽ
नुभवमर्थदर्शी। अतज्जागरत्वस्य स्वप्नत्वेदृष्टांतः स्वप्न इति। ३०। ननु कथं वेदप्रमितवर्णाश्रमकर्मादिना नाधीनिर्विवर्त्ते तत्राह असत्त्वादिति भावानां देहादीनां। तत्कृता
भिदा वर्णाश्रमादिरूपा। गतयः स्वर्गादिफलानि। हेतवः कर्माणि चास्यात्मनो मृषा अविद्यावद्विषयो वेद इति भावः॥ ३१॥ ॥

भुक्तिरित्युक्तं तामेव युक्तीराह । य इति । अर्थान् स्थूलान् देहादीन् समस्तकरणैः चक्षुरादिभिर्भुङ्क्ते । कथंभूतान् अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः यश्च स्वप्ने हृदि जागरदृष्टसदृशान् वासनामयान् भुङ्क्ते । यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः । कुतः त्रिगुणा इति तृतीयावस्थात्रयद्रष्टा । ननु जाग्रदवस्थायां सर्वेन्द्रियाणि पश्यंति । स्वप्ने मनः सुषुप्तिं तत्संस्कारशेषा बुद्धिः कथमात्मा तद्द्रष्टा । तत्राह । इंद्रियेशः । ननु इंद्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः न कुतः स्मृत्या प्रतिसंधानेन स

६६ श्ला १

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान् भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् । स्वप्नेऽथ सुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्ति दृगिंद्रियेशः ॥ ३२ ॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माऽखिलसंशयाधिं ॥ ३३ ॥ ॥

र्वावस्थास्वन्वयात् । यः स्वप्नान्तं बुद्धान्तं च तदनंतरं न किंचिद्वेदीति स एव एतर्हि जागर्मीति । उपाधिभेदेन विश्वादिव्यवहार इति भावः । एतेन बाल्याद्यवस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्टव्यं । ३२ । ततः किमत आह एवमिति । गुणतो या एता मनसस्त्र्यवस्था मन्मायया मयि कृताः न तत्त्वतः संतीति निश्चित आत्मस्वरूपोऽर्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयतेऽस्मिन्निति आधिरहंकारस्तं संस्थितं हार्दं हृदि स्थितं मां भजत । केन छित्वा तदाह । अनुमानैः सदुक्तिभिः सतां गुरूणामुपदेशैः कृतो निशितीक्ष्णो ज्ञानखड्गेन ॥ ३३ ॥ ॥

अनुमानान्निदर्शयति। ईक्षेतेति। इदं जगत् विभ्रमम् ईक्षेत तत्र हेतवः मनोविजृम्भितत्वात्। दृष्टत्वात्। विनाशित्वाच्च स्वप्नवत्। अतिचंचलत्वाच्च अलातचक्रवत्। ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह। विज्ञानमिति निगमनं। तस्मात्त्रिधा भासोऽयं गुणपरिणामकृतो विकल्पो लेशतः समाययेति। तस्मान्नानात्वदृश्याद्दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत् भवेत्। स्वल्पार्थेनपि तृष्णारहितस्तूष्णीं निरीहश्च भवेत्। मनोवाक्कायव्यापाररहित इत्यर्थः। ननु देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्त्तनायोगात्पुनः संसारः स्यादेव तत्राह। संदृश्यत

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं॥ विज्ञानमेकमुरुधेव विभाति मायास्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः
दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः। संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात्
देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं। दैवादुपेतमुत दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः॥ ३६

इति। क्वचिदावश्यकाहारादिव्यवहारे यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या त्यक्तं तत्पुनर्मोहाय न भवेदेव। किंतु देहपातपर्यंतं स्मृतिरिव। स्मृतिः संस्कारमात्रेणा-
भासो भवेदित्यर्थः। एतदेवोपपादयति देहमिति॥ आसनादुत्थितं उत्थाय तत्रैवस्थितं ततः क्वचिदपेतं निर्गतं। पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतोऽन्यत्।
यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान्। तं देहं। यतः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति तद्वत्॥ ३७

ननु वयः परिपाल्यमानोपि मुक्तः इतीति तं वेत्र प्रश्नपतित हि पितते देव । तत्राह देहोपीति । दैववशेन गच्छतु स्वारंभकं कर्म यावदस्ति तावत्पर्यन्तं प्रतिसमीक्षत एव सासुः प्राणेंद्रियसहितः । तर्हि तस्मिन्केदाचित्सङ्गो तापि । नेत्याह । तमिति स्वाप्नं स्वप्नतुल्यं । अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येन । अत एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः । तथा च श्रुतिः । तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति । उक्तार्थे तेषां विश्वासार्थं स्वस्वरूपमाह । मयेति । सांख्यम् आत्मानात्मविवेकः । योगोष्टांगः । तयो

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः । तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ॥ ३८ ॥ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥ ३९ ॥ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं । सुहृदं प्रियमात्मानं साम्यासंगादयोऽगुणाः ॥ ४० ॥ इति मे छिन्नसंदेहा मुनयः सनकादयः । सभाजयित्वा परया भक्त्यागृणत संस्तवैः । तैरहं पूजितः सम्यक्संस्तुतः परमर्षिभिः । प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥ ॥ इति श्रीभागवते एकादशस्कंधे त्रयोदशोध्यायः ॥ ॥

र्गुह्यं रहस्यं । यज्ञः विष्णुः तं युष्मद्धर्मविवक्षयेत्यनेन धर्मा अप्युपदिष्टा इति ज्ञेयं । अत एव । यज्ञेन हंसरूपेण ब्रह्मणेऽभ्याद्ध माधवेत्यनुवादो भविष्यति । अतं प्रमीयमाणो धर्मः । सत्यम् अनुष्ठीयमानो धर्मः । तेजः प्रभावः । एतेषां परमयनं । किंच । मामिति । कथंभूताः । अगुणाः गुणापरिणामरूपा न भवंति किंतु नित्या इत्यर्थः । मे मया ॥ अशृणत मां तुष्टुवुः ॥ प्रत्येयाय प्रत्यागतोस्मि ॥ ४२ ॥ ॥ एकादशे त्रयोदश ॥ ॥

चतुर्द्दशे परं श्रेयो भक्तिरेव न चेतरत् ॥ इत्येतद्वर्ण्यते ध्यानयोगश्च सहसाधनैः ॥ एवं तावद्भगवतो भक्त्या मोक्ष इत्युक्तं श्रेयांस्यन्यानि वदंति। तत्र विशेषावधारणाय पृच्छ-
ति। श्रेयांसि श्रेयःसाधनानि। किं विकल्पेन प्राधान्यं उताहो किं वा एकस्यैव मुख्यता पक्षो त्वनेकारणां। भवेदिति। अनपेक्षितं न अपेक्षणाय यस्मिन् स अहेतुकः। अ-
यमर्थः भवता योगो भक्तियोग उक्तः अन्ये त्वन्यानि श्रेयःसाधनानि वदंति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषां। उताहो मत्प्राधान्येऽपि किं विकल्पेन स-

उद्धव उवाच॥ ॥वदंति क्रष्ण श्रेयांसि बहूनि ब्रह्मवादिनः। तेषां विकल्पप्राधान्यमुताहो एकमुख्यता॥१॥ भवतोदाहृतः स्वामिन्भक्तियोगो-
नपेक्षितः। निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः॥२॥ ॥भगवानुवाच॥ ॥कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता॥ मयादौ ब्रह्मणे प्रोक्ता ध-
र्मो यस्यां मदात्मकः।३॥ तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा। ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्ममहर्षयः॥४॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानव-
गुह्यकाः। मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः॥ ५॥ ॥

र्वेषां तुल्यफलत्वं वा यद्वा कश्चिदस्ति विशेष इति। तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वप्रकृत्यनुसारेण बुभुक्षुस्थानीय स्वर्गादिफलबुद्धिभिः प्राणि-
भिः प्राधान्येन परिकल्पितानि तुच्छफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह। कालेनेति सप्तभिः। मदात्मकः मय्येवात्मा चित्तं येन सः।३। भृग्वा-
दयः। भृगुश्च मरीचिरत्रिरंगिराः पुलस्त्यः पुलहः क्रतुरिति एते च सप्त ब्रह्मणः प्रजापतयः ते च ते महर्षयश्च॥ ४॥ ॥

भाग ३

किंदेवाः श्रमस्वेददौर्गंध्यादिरहितत्वेन किंदेवा मनुष्या वेति संदेहास्पदं द्वीपांतरमनुष्याः। एवं किंनराः किंचिन्नरा इव मुखतः शरीरतो वा। किंपुरुषाः किंचित्पुरुषा इव वानरादयः। प्रकृतयः वासना बह्व्यः। कुतः रजःसत्वतमांसि भुवः जन्मस्थानानि यासां ताः। भूतानि देवासुरमनुष्यादीनि। चित्रा वाचः वेदार्थव्याख्यानविधयः। एवमित्युक्तोपसंहारः। केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण। अपरे पाषंडमतयः वेदविरुद्धार्थमतयः। तत्र प्रकृतीनां मायागुणमूलत्वान्मन्मायामोहितधियः। अनेकांतं नानाविधं तदेवाह धर्ममिति सार्द्धेन। धर्मं कर्ममीमांसकाः। तदुक्तं। मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः। नित्यनैमित्तिके कु

किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः॥ बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः॥ ६॥ याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा। यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि॥ ७॥ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां॥ पारंपर्येण केषांचित्पाषंडमतयोऽपरे॥ ८॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ। श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि॥ ९॥ धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं। अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं। केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान्॥ १०॥

र्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः यथाहुः। यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते। तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति। कामं वात्स्यायनादयः। सत्यं शमं दमं च योगशास्त्रकृतः। अन्ये दृष्टार्थवादिनो दंडनीतिकृतः स्वेच्छसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति। अतः सामाद्युपाय एव श्रेयः साधनमिति तेषां मतं। तथैव त्यागं भोजनं च लोकायतिकाः। यज्ञं तपो दानं यज्ञो देवतानां पूजनं। तपश्च दानं च॥ १०॥ ॥

तेषांतु फलत्वमाह। आद्यंतवंत इति। एषांलोकाः। एते स्माद्यानि फलानि। तमोनिष्ठाः मोहावसानाः। भोगकाले स्पर्धादिभिः शुचार्पिताः व्याप्ताः॥११॥ भक्तेस्तु सुख
त्वमाह। मयीति यावत्। समाधिः। हे सभ्य मया परमानंदरूपेण आत्मना मत्स्वरूपत्वेन स्फुरता। किंच। अन्येषां तत्र ब्रह्मलोकादि परिच्छिन्नं सुखं भक्तस्य तु परिपूर्णमि
त्याह। अकिंचनस्येति। परिपूर्णतामेवाह नपारमेष्ठ्यमिति। रसाधिपत्यं पातालादिस्वाम्यं। अपुनर्भवं मोक्षमपि मद्विना मां हित्वा अन्यन्नेच्छति अहमेव तस्य प्रियइ

आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः। दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः। मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः।
मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां॥१२॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः। मया संतुष्टमनसः सर्वाः सुखमया दिशः॥१३
नपारमेष्ठ्यं नमहेंद्रधिष्ण्यं नसार्वभौमं नरसाधिपत्यं। नयोगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत॥१४॥ नतथा मे प्रियतम
आत्मयोनिर्नशंकरः। नचसंकर्षणो नश्रीर्नैवात्मा चयथा भवान्॥१५॥ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं। अनुव्रजाम्यहं नित्यं पू
येयेत्यंघ्रिरेणुभिः॥१६॥

स्यांघ्रिरेणुभिः॥

त्यर्थः। ममापि सएव प्रेष्ठ इत्याह। नतथेति द्वाभ्यां। आत्मयोनिर्ब्रह्मा पुत्रोपि। शंकरो मत्स्वरूपभूतोपि। संकर्षणो भ्रातापि। श्री र्भार्यापि। आत्मा मूर्तिरपि। यथा
भक्त इति तत्कस्येति हर्षेण हलवानिति। पूयेयं मदंतर्वर्तिब्रह्मांडानि पवित्री कुर्यामिति भावेनेत्यर्थः॥१६॥ ॥

किंवा मद्भक्तानां सुखं यावत्तावदेवंभूतमिति वाचो वक्तुं समर्था न यतस्तत्स्वसंवेद्यं निरूपयन्नित्याह। निष्किंचना इति महांतः निरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनां यथोत्तरं हेतुहेतुमद्भावः। एवंभूता मम मदीयाः। यत्सुखं जुषंति सेवंति तत्सुखं तत एव लभंते विदुः नान्यकुतः। नैरपेक्ष्यं ताभिरपेक्षणीयं येषां ते निरपेक्षाः तैरेव लभ्यं। न तु मोक्षापेक्षैरपीत्यर्थः। यद्वा एवंभूताः संतो ये मम मामित्यर्थः। जुषंते प्रीणंति तत एव यन्नैरपेक्ष्यं तद्विदुर्नान्य इत्यन्वयः। अपि च॥ आस्तां तावदुत्तमभक्तकथा। यतः प्राकृतोऽपि भक्तः कृतार्थ एवेत्याह। बाध्यमान इति द्वाभ्यां॥ विषयैराकृष्यमाणोऽपि। प्रगल्भया समर्थया। प्राकाद्यर्थंप्रज्वा

निःकिंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः। कामैरनालब्धधियो जुषंति यन्नैरपेक्ष्यं न विदुः सुखं मम। १७। बाध्यमानोऽपि मद्भक्तो विषयैरजितेंद्रियः। प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते। १८॥ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात्। तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः। १९। न साधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता। २०
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां। भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात्। २१। धर्मः सत्यदयोपेतो विद्या वा तपसान्विता
मद्भक्त्यापेतमात्मानं न सम्यक्प्रपुनाति हि। २२।

लितोऽथ निर्यथा काष्ठाग्निर्भस्मीकरोति तथा रागादिनापि कथंचिन्मद्विषया सती भक्तिः समस्तपापानीति तदा वा न पिस्व भक्तिमहिमा स्वर्येण संवो वयति॥ अहो उद्धव विस्मयं स्थाणिवति। अत एवं स्वतंत्रेयो नान्यदस्तीत्याह। न साधयतीति द्वाभ्यां। २०॥ श्रद्धया या भक्तिस्तया संभवात् जातिदोषादपीत्यर्थः। भक्त्यभावे
न्यत्साधनं व्यर्थमित्याह द्वाभ्यां धर्म इति॥ २३॥

रोमहर्षादिकं विना कथं भक्तिर्गम्यते। भक्त्या च विना कथमाशयः शुद्ध्येदिति। किंच। भक्तिः स्वाश्रयं शोधयतीति किं वक्तव्यं यतो गद्गदवागादिलक्षणा मद्भक्तियु
क्तो लोकं सर्वं पुनातीत्याह वागिति। अपि च लक्षैय वात्मशुद्धिर्नम्यत इति सदृष्टान्तमाह। यथेति। यथाग्निना ध्मातं तापितमेव हेम सुवर्णं अन्तर्मलं जहाति न क्षालना
दिभिः एवं निजं स्वरूपं च भजते। कर्मानुशयं कर्मवासनां। मां भजते मद्रूपतामापद्यते। ननु ब्रह्मविदाप्नोति परं। तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिभ्यो ज्ञानादेव विद्यानि
वृत्त्यात्वत्प्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते। तत्राह यथा यथेति। आत्मा चित्तं परिमृज्यते। मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्तेरेवान्तरङ्ग्यापरोक्षज्ञानं

कथं विना रोमहर्षं द्रवता चेतसा विना। विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः॥ २३॥ वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्व
चिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति। २४॥ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं। आत्मा च कर्मानुशयं विधूय
मद्भक्तियोगेन भजत्यथो मां॥ यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथा तथा पश्यति तत्त्वसूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं। २६
विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते। मामनुस्मरतश्चित्तं मय्येव प्रविलीयते॥ २७॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं। हित्वा मयि समाधत्स्व
मनो मद्भावभावितं। स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान्॥ क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः॥ २९॥ न तथास्य भवेत्क्लेशो बंधश्चान्यप्र
संगतः। योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः॥ ३०॥ ॥

नष्टा भवतीत्यर्थः। किंच ध्यानं नाम चित्तस्य तदाकारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नान्तरमपेक्षत इति सदृष्टान्तमाह। विषयानिति। यस्माद्वयत्नाद्ध्या
नं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति। तस्मादिति। मद्भाव भावितं मद्भावेन भजनेनैव शो
धितं। विशेषतोवा ध्यायनाद्युक्तकामसमागमाः परित्याज्याः इत्याह स्त्रीणामिति॥ श्री। निनि।

मद्भा॰

पा

२

मा॰ प॰
६८

णामिति। आत्मवान् धीरः सन्। ते मे निर्भयदेशे विविक्ते विजने। एतदुपपादयति। न तथेति। अस्य पुंसः यथा तत्संगी संगातः क्लेशो लभेत्। यथा च बंधो योषित्संगातः तथा।
यप्रसंगतो न लभेदिति मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति। यथेति। ध्यानांगप्रश्नः। यादृशमिति ध्येयविशेषणप्रश्नः। यदात्मकमिति ध्यस्य तानि विशेषणानि तत्स्वरूपप्रश्नः।
एतन्मे ध्यानं मे वक्तुमर्हसीति पाठः। तत्रायमर्थः। मुमुक्षुत्वात् यथा ध्यायेत तन्मे वक्तुमर्हसि जिज्ञासोः कथनार्थे। हे पुनरेतत्त्वद्दृश्यमेव पुरुषार्थः। ननु ध्यानेन कृत्यमस्तीति।
तदुक्तं त्वयोपश्रुत्ता अग्रां चेत्यादि त्वं वक्तुमर्हसीति पाठः। मुमुक्षुगमः। तत्र ध्यानांगत्वेन आसनप्राणायामप्रकारमाह सम इति चतुर्भिः। समे नात्युच्छ्रिते नातिनीचे। आसने कंबला-
दौ। समकायः सन् यथासुखमासीनः इति नासिकाग्रदृष्टिकादिनियमः इत्युक्तं। नासाग्रनिरीक्षणं च विवर्तैर्यार्थं। अंतर्लक्ष्यो बहिर्दृष्टिः स्थिरचित्तः सुसंयत इति योगशास्त्रोक्ते

उद्धव उवाच॥ ॥यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं। ध्यायेन्मुमुक्षुरेतन्मे ध्यानं त्वं वक्तुमर्हसि॥ ३१॥ ॥श्रीभगवानुवाच॥ ॥सम आसन आसी-
नः समकायो यथासुखं। हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः॥ ३२॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः। विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रि-
यः॥ ३३॥ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत्। प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं। ३४। एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत्। दशकृत्वस्त्रिष-
वणं मासादर्वाग्जितानिलः॥ ३५॥ ॥

विपर्ययेण रेचककुंभकक्रमेण। यद्वा। वामनाड्या पूरितं दक्षिणया त्यजेत्। तया वा पूरितं वामया त्यजेदेवं विपर्ययेण। यथोक्तं योगे। इडया पूरयेद्वायुं त्यजेत्पिंगलया इति। निर्जि-
तेंद्रिय इति प्रत्याहार उक्तः। प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति। तत्र श्रेष्ठत्वात् सगर्भमाह हृदीति द्वाभ्यां। मूलाधारादारभ्य अविच्छिन्नं संततं घंटानादतुल्यं ॐका-
रं हृदि संतं प्राणेन उदीर्य ऊर्ध्वं द्वादशांतपर्यंतं नीत्वा। कथं बिसोर्णवत् कमलतंतुवत्। तत्र मात्रानीते स्वरं पंचदशबिंदुसंवेशयेत्। अथ पुनरित्यस्यैतेन बिंदुशिरस्कं
कुर्यादित्यर्थः। यद्वा। मूलाधारादारभ्य मूर्द्धांतपर्यंतं बिसतंतुवत् सूक्ष्ममविच्छिन्नं संततं हृदि मनसि प्राणेनोदीर्य तिष्ठ जप अथ पुनः त्रयोंकारे घंटानादतुल्यं ब्रह्मरं-
ध्रांतं नादं स्थिरीकुर्यादिति। मासादर्वाक् जितानिलो भवत्यतीति॥ ॥

राम
६८

एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरमाह हृत्पुंडरीकमिति सार्द्धैः। अंतस्थं देहांतर्वर्ति। ऊर्ध्वनालमधोमुखं च कुड्मलितं च कदलीपुष्पसंकाशं यदस्ति तद्विप
रीतं ध्यात्वेत्यर्थः। त्रयमेतच्चिंतयेत्। सविशेषणं ध्यानमाह। वह्निमध्य इति षड्भिः। ध्यानमंगलं ध्यानस्य शुभं विषयं। सममनुरूपावयवं दीर्घाश्चारवश्चत्वारो भुजा यस्मिन् तं। सु
चारु अतिरम्यं। समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिन् तं। श्रीवत्सश्रियो निकेतनं वक्षसि दक्षिणावामतस्माल्यांशुकं इत्यर्थः। द्युमद्भिः किरीटादि

हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं। ध्यात्वोर्द्धमुखमुन्निद्रमष्टपत्रं सकर्णिकं।।३६।। कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं। वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं।।३७।। समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजं। सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं।।३८।। समानकर्णविन्यस्तस्फुरन्मकरकुंडलं। हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं।।३९।। शंखचक्रगदापद्मवनमालाविभूषितं। नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं।।४०।। द्युमत्किरीटकटककटिसूत्रांगदायुतं। सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं।।४१।। सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत्। इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः।।४२।। बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः। तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्।।४३।। नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं। तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्।।४४।। तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत्।।४५।। ।।

भिः। आसमंतात् युतमलंकृतं। प्रसादेन शोभनं मुखमीक्षणं च यस्मिन्। सुकुमारं अतिकोमलं। सविशेषणं ध्यानमुपसंहरति। इंद्रियाणीति। प्रकर्षेण नयेत्। सर्वतः
सर्वांगयुक्तं। यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरं तत्र शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह। तदिति त्रिभिः। एकत्रांगे अन्यान्यं
न चिंतयेत्। एकत्रेति यदुक्तं तदेवांगं दर्शयति। सुस्मितमिति। व्योम्नि सर्वकारणरूपे। तच्च कारणरूपं तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मण्यारूढः सन् न किं

भा०ए० ६७

मामेवात्मनि विचक्षे आत्मानं च सर्वात्मनि मयि संयुतं विचक्षे ज्योतिर्ज्योतिषि संयुक्तमित्यन्वयः एवंभूतस्य समाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति। मनो युंजतः समाहितस्य तः द्रव्यज्ञान क्रियाभ्रमः अधिभूताधिदैवाध्यात्मरूपः दृश्य द्रष्टृ दर्शन रूपो वा भ्रमः निर्वाणं शांतिं सम्यग्याति इति। चतुर्दशः॥ ततः पंचदशे प्रोक्ताः सिद्धयो धारणाद्भवाः। श्रीविष्णुपदसंप्राप्तावंतरायतया मताः एवं मनो युंजतो योगिनोंऽतरा विर्भवंत्यः सिद्धयोंऽतरायप्रायाएव। अतस्ताः परिहृत्य परमेश्वरपर एव भवेदितिवक्तुं सिद्धीराह। जितेंद्रियस्येति। यु

एवं समाहितमतिर्मामेवात्मानमात्मनि। विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं। ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः। संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः॥ ४६॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्दशोध्यायः॥ ॥ श्रीभगवानुवाच॥ ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः॥ ॥ उद्धव उवाच॥ ॥ कया धारणया का स्वित्कथं वा सिद्धिरच्युत। कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान्॥ २॥ श्रीभगवानुवाच॥ ॥ सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः। तासामष्टौ मत्प्रधाना दशैव गुणहेतवः॥ ३॥ ॥

क्तस्य स्थिरचित्तस्य। सिद्धिरिति वितर्के। कास्वित्। किंनामा कथं स्वित् कीदृशी वा धारणा स्वकृतीति प्रश्नांतरेवाशंक्य। त्वमेवैतज्ज्ञानासीत्याशयेनाह। योगिनामिति। धारणा अष्टादश तत्पुरुषेशः। योगमार्गपारगैरिति त्रिकालज्ञत्वादिक्तादौ सिद्धीरन्येपि जानंतीति भावः। अहमेव प्रधानं मुख्यः स्वभावतः आश्रयो यासां ताः मत्प्रधानाः अष्टावपि प्राप्तौ किंचिद्न्यूनाः भवंतीति भावः॥ गुणहेतवः सत्वोत्कर्षहेतुकाः॥ ३॥ ॥

स्वि ॥ ल्प ॥ सर्व ॥ त्सा

६७

ताः स्वरूपेणोपदिशति। अणिमेति सार्द्धैः पंचभिः। अणिमा महिमा लघिमा च मूर्त्तेर्देहस्य तिस्रः सिद्धयः। प्राप्तिर्नाम सिद्धिः सर्वप्राणिनां इंद्रियैः सह तत्तदधि
ष्ठातृदेवतारूपेण संबंध इत्यर्थः। श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः। शक्तीनां
मायातदंशभूतानां प्रेरणं। तच्चेश्वरे मायायाः अन्येषु तदंशानां प्रेरणं ईशिता नाम सिद्धिः। विषयभोगेष्वसंगो वशिता नाम सिद्धिः। यत्कामः यद्यत्सुखं कामयते

अणिमा महिमा मूर्त्तेर्लघिमा प्राप्तिरिंद्रियैः। प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता। गुणेष्वसंगो वशिता यत्काम
स्तदवस्यति। एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः। अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनं। मनोजवः कामरूपं पर
कायप्रवेशनं॥ ६॥ स्वच्छंदमृत्युर्देवानां सहक्रीडानुदर्शनं। यथासंकल्पसंसिद्धिराज्ञाप्रतिहता गतिः॥ ७॥ ॥

तत्तदवस्यति तत्सीमानं प्राप्नोति सिद्धिः। औत्पत्तिकाः स्वाभाविक्यो निरतिशया इत्यर्थः। गुणहेतुसिद्धीराह अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यं। दूरे श्र
वणं दर्शनं चेति द्वे सिद्धी। मनोवेगो देहस्य गतिः। कामितरूपप्राप्तिः परकायप्रवेशः। स्वेच्छामृत्युः। अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः॥
संकल्पानुरूपप्राप्तिः। अप्रतिहता आज्ञा सर्वत्र गतिर्यस्याः साज्ञा भवेत्येतादृशा॥ ॥

त्कृष्टसिद्धीश्च प्रसंगादाह। त्रिकालज्ञत्वमिति। अद्वंद्वं शीतोष्णाद्यनभिभवः। अग्न्यादीनां संबंधं लब्धं तत्तद्धारणाभिः सह विशेषतो निरूपयति यथेति क्रमात् सिद्धीः। भूतसूक्ष्मोपा-
धौ मयि। तन्मात्रं भूतसूक्ष्माकारं मनः तन्मात्रोपासकः। मम प्रदीयमणिमानं। ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि। यथा संस्थं महत्तत्त्वाकारं। भूतानां चेति। आकाशादि-
भूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमाहिमानं प्राप्नोतीत्यर्थः। वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां काल-

त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता। अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः। एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः। यया
धारणया या स्याद्यथा वा स्यान्निबोध मे॥ ९॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः। अणिमानमवाप्नोति तन्मात्रोपासको मम॥ १०॥
महत्यात्मन्मयि परे यथासंस्थं मनो दधत्। महिमानमवाप्नोति भूतानां च पृथक्पृथक्॥ ११॥ परमाणुमये चित्तं भूतानां मयि रंजयन्। का-
लसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात्॥ १२॥ धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिले। सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः॥ १३

परमाणुरूपाधिरूपतामिति लघुत्वविवरणं। तदुक्तं। स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति। वैकारिकाहंकारोपाधौ मयि। अखिलं एकाग्रं। आत्मत्वं अधिष्टा-
तृत्वं। अत्र हेतुः मन्मनाः मयि मनो धारणप्रभावादेव भवति। नात्रातीव हेतुरत्र संधेय इति भावः। एवं मद्धारणानुभावेन मद्योगबलमाश्रय इत्यादिष्वनुद्रष्टव्यं॥ १३॥ ॥

क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि। मनः मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्य। अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य। तदुपाधेर्ममेत्यर्थः। त्र्य
धीश्वरे त्रिगुणमायानियंतरि। अत एव कालविग्रहे आकलितृरूपे अंतर्यामिणि। ईशित्वं विशिनष्टि। क्षेत्रज्ञानां जीवानां। क्षेत्राणां तदुपाधीनां च चोदना प्रेरणां। ननु
विश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः। तुरीयाख्ये। विराड्हिरण्यगर्भकारणाख्या वेत्युपाधयः। ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्येवंलक्षणे। ऐश्वर्यस्य समग्रस्य
यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगना। तद्वति भगवच्छब्दशब्दिते। यत्र परमानंदरूपे सर्वोपि कामः स्वच्छंदभूतोऽवसीयते समाप्यते तं। अतः परं गुणहेतुकाः

धर्मस्य ३

महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं। प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः॥१४॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे। स ईशित्वमवाप्नोति
क्षेत्रज्ञक्षेत्रचोदनां॥१५॥ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते। मनो मय्यादधद्योगी मद्धर्मा वशितामियात्॥१६॥ निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः। प
रमानंदमाप्नोति यत्र कामोऽवसीयते॥१७॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि। धारयन्श्वेततां याति षडूर्मिरहितो नरः॥१८॥ मय्याकाशात्मनि प्राणे म
नसा घोषमुद्वहन्। तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ॥१९॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि। मां तत्र मनसा ध्यायन्विश्वं पश्यति सूक्ष्मदृक्॥
मनो मयि सुसंयोज्य देहं तदनुवायुना। मद्धारणानुभावेन तत्रात्मा यत्र वै मनः॥२१॥ यदा मन उपादाय यद्यद्रूपं बुभूषति। तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः॥

त्रौ

शुद्धे मत्वात्मके श्वेततां शुद्धरूपतां॥१८॥ आकाशात्मा यः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोषं नादं चिंतयन् असौ हंसो जीवः तत्राकाशे उपलब्धा ज्ञाता सत्यः तत्र
स्थाः दिव्या वाचः शृणोति। यद्वा। तत्राकाशे उपलब्धाः अभिव्यक्ताः याः भूतानां वाचस्ता दूरतः शृणोतीति। त्वष्टा आदित्यः तस्मिन्परिच्छिन्ने चक्षुः संयोज्य। तत्रो लयसं
योगे मां ध्यायन् विश्वं दूरतः पश्यति। मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते। तस्याः प्रभावेन यत्र मनो याति तत्रात्मा देहो यातीत्यर्थः।
यद्वा मनः कर्तृ आत्मानं वायुना सह देहं च मयि संयोज्य यत्र याति तदनु तत्र देहो यातीति। मनः उपादाय उपादानं कारणं कृत्वा यद्यद्देवादिरूपं॥ ॥

लवितुमिछतितत्रमनोरूपंमनसोऽतीष्टंरूपंयोगीनवेत्। कुतः यतोमद्योगबलंयोऽहमचिंत्यशक्तिर्मनाकारस्तस्मिन्मयिमनसोयोयोगोधारणा। तस्यबलंप्रभा
वःसएवाश्रयःकारणं।२२। यत्रप्रविविक्षतितत्रात्मानंचिंतयेत्। ततःपिंडंस्वदेहंहित्वा। प्राणःप्राणप्रधानलिंगशरीरोपाधिः। वायुभूतःवाह्यवायोर्भूतःप्रवि
श्यतेनमार्गेणेत्यर्थः। षडंघ्रिवत् षट्पदोयथापुष्पात्पुष्पांतरमनायासेनप्रविशतितद्वत्। पिंडंहित्वेत्युक्तंतत्प्रकारंकथयन्नुत्क्रांतिसिद्धिमाह। पार्ष्ण्यापार्ष्णिना
गुदंनिरुध्यप्राणंप्राणोपाधिमात्मानंब्रह्मरंध्रेणमूर्द्धद्वारेण। ब्रह्मेत्युपलक्षणंब्रह्मवाअन्यद्वाअपेक्षितंस्थानंमनसानीत्वा। मत्स्थंमन्मूर्त्तिरूपंशुद्धसत्वं

यंत्रा

परकायंविशन्सिद्धआत्मानंतत्रभावयेत्॥ पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत्॥२३॥ पार्ष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्द्धसु।
आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुं॥२४॥ विहरिष्यन्सुराक्रीडेमत्स्थंसत्वंविभावयेत्। विमानेनोपतिष्ठंतिसत्ववृत्तीःसुरस्त्रियः॥२५॥ य
थासंकल्पयेद्बुद्ध्यायदावामत्परःपुमान्। मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते।२६। योवैमद्भावमापन्नईशितुर्वशितुःपुमान्। कुतश्चि
न्नविहन्येततस्यचाज्ञायथामम॥२७॥ मद्भक्त्याशुद्धसत्वस्ययोगिनोधारणाविदः। तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता॥२८॥ ॥

चिंतयेत्। तदासत्ववृत्तयःसत्वांशभूताःस्त्रियोवाअकालेपि। यथावेतिपाठेयथावायेनकेनापिप्रकारेणबुद्ध्यासंकल्पयेत्। ततथाययथावत्प्राप्नोतीत्य
र्थः। यद्वायथासंकल्पयेत्यथावामत्परोमयिविश्वासवान्भवतितथातदनुरूपंसर्वंप्राप्नोतीत्यर्थः। किंकुर्वन्सत्येसंकल्पेमयिमनोयुंजन्। मदितिषष्ठ्यर्थकपदंममेत्य
र्थः। ईशितुःसर्वनियंतुःवशितुःस्वतंत्रस्यममभावंस्वभावंप्राप्तः। एतागुणहेतवः। अतःपरंक्षुद्राः। धारणाविदइतित्रिकालज्ञेश्वरधारणाभाविता। त्रैकालिकीत्रिकालवस्तुविषया।
साजन्ममृत्युभ्यामुपबृंहितातत्सहिता। अतएवपरचित्ताद्यभिज्ञताऽपिव्याख्याता॥२८॥ ॥

अस्मादिभिः सर्वोपघातस्तूत्पोलगवानित्येवंभूतयोगमयं तैर्नाभिभूयेत। अत्र हेतुः भूयो नोति। यादसां समुद्रकं यथा घातकं न भवति तथा तस्माद्वपुषो ऽस्मादय इत्यर्थः। अनयैवाइं द्वा
ति। पित्या स्व्याता। मद्विभूतीरभमवतारान्। ध्वजादिभिः सह। उपसंहरति। उपासकस्येति। एवं ध्येयं धारणाभिः। यद्वा किं नानाधारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह जि
तेंद्रियस्येति। मद्धारणां नारायणो तुरीयाख्य इत्यत्रोक्तां या सुदुर्लभा स्यात्सा का। न काचिदित्यर्थः। यद्यप्येवं तथापि तत्प्रार्थ्या इत्याह। अंतरायानिति। तस्माद्धेतुके[illegible]व धारणा
कार्या न। अत्याः कास्या इत्याह जन्मेति। जन्मनैव कार्यसिद्धयो भवंति यथा देवानां यथा वा यादसां समुद्रक स्खलः पक्ष्यादीनां वे खेचरत्वादि। तदुक्तं पातंजले। जन्मौषधितपोमंत्रयोग

अस्मादिभिर्न हन्येत मुनेर्योगमयं वपुः। मद्योगश्रांतचित्तस्य यादसामुदकं यथा॥२८॥ मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः। ध्वजातपत्रव्यजनैः स
भवेदपराजितः॥३०॥ उपासकस्य मामेवं योगधारणया मुनेः। सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः॥ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः। मद्धार
णां धारयतः का नु सिद्धिः सुदुर्लभा॥३२॥ अंतरायान्वदंत्येता युंजतो योगमुत्तमं। मया संपद्यमानस्य कालक्षपणहेतवः॥३३॥ जन्मौषधितपोमंत्रैर्याव
तीरिह सिद्धयः। योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत्॥३४॥ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः। अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां।
अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां। यथा भूतानि भूतेषु बहिरंतः स्वयं तथा॥३६॥ इति श्री एकादशे स्कंधे पंचदशोऽध्यायः॥ ॥

जाः सिद्धय इति। योगेन मद्धारणामित्युक्तेन। योगगतिं मत्सालोक्यादिरूपं। कुत इत्यत आह। सर्वासामित्यर्द्धेन। प्रभुत्वोपपादनं हेतुः कारणं। पतिः पालयिता चेति। किंच
न केवलं सिद्धीनामेव प्रभुः अपितु मोक्षादीनामपीत्याह। अहमिति। योगो मोक्षः सांख्यं तन्मार्गज्ञानं। धर्मस्य तदुपदेष्टृणां ब्रह्मवादिनां च। कुतः तत्राह। सर्वदेहिनां जीवाना
मात्मा। यतः आंतरः अंतर्यामी। एष त आत्मांतर्यामिस्वरूप इति श्रुतेः। तर्हि किं अंतर्वर्तित्वात्परिच्छिन्नः न। बाह्यश्च व्यापक इत्यर्थः। तत्र हेतुः अनावृतः। एतत्स दृष्टांतमाह। भूतेषु च
तुर्विधेषु महाभूतानि यथा बहिश्चांतश्च भवंति। स्वयं अहमपि तथेत्यर्थः। इत्येकादशे पंचदशोऽध्यायः॥ ॥

षोडशेतुहरेराविर्भाविभुक्ताविभूतयः।ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः।अंतश्चित्तेनयद्ध्यानमशक्यमकृतात्मनां।अतस्तद्योगप्रतानायैवविभूत्यादिनिरूपणं॥
एवंतावन्नवाध्यायामष्टप्रश्नानिरूपिताः।ब्रह्मत्वसंलवेतावत्सप्तमादिचतुष्टये।बंधमुक्त्योःकृतिंहरिमङ्गल्योश्चततःपरे।द्वादशेनंतरंकर्मकृतित्यागव्यवस्थितो।हंसेति
हासतोयोगानिष्ठायांत्रयोदशे।श्रेयःसाधननिर्द्धारिध्यानेचैवचतुर्दशे।धारणासिद्धियोगेनदेवचपंचदशेननिरंतरे।उद्धवप्रश्नतोदत्तमुत्तरंहरिणाचितं।षोडशेभूति
विस्तारेद्वयोर्वर्णाश्रमव्रते।ज्ञानादितिर्णयोवातोयमादीनांचनिर्णयि।योगत्रयाधिकारेतुविंशेचतदनंतरे।तत्वसंख्याविवादेवृपुंप्रकृत्योर्विवेचने।जन्मसृत्युप्रकारेच
चार्विशेदत्तमुत्तरं।परापराधसहनेचतुर्स्त्रिंशदनंतरे[illegible]मनुविंशेक्रियायोगप्रश्नेतदुपवर्णितं।अष्टाविंशेततःप्रोक्ताज्ञानयोगोपसंहृतिः।संसारासंलवप्रश्नेतन्मध्ये

उद्धवउवाच॥ ॥त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं।सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः॥१॥ ॥

दत्तमुत्तरं।तदशक्त्यापुनःप्रश्नेभक्तियोगोपसंहृतिः।एवंप्रश्नोत्तराणपंचक्रमेणोत्तानिविंशतिः।अथहमात्मांतरोवाद्योनाष्टतःसर्वदेहिनां।यथाभूतानिभूतेषुवहिरंतः
स्वयंतथेत्युक्तं।तत्रभूतानियथाक्वचिकेनचिद्गुणविशेषेणोद्धिक्तानिवर्तंते।क्वचित्मानात्मरूपेणेवा।तथात्वमपिक्वकथंवर्त्तसइतिभूतीःप्रेष्टुंप्रथमंतावदुक्तमेवसर्वात्म
कत्वमनुवदति।त्वंब्रह्मेतिअपावृतंतिरावरणंश्रुतंत्वंवा।अतएवसर्वेषामपिभावानांरक्षणंस्थितिर्जीवनंत्राणंस्थितिसहितोअप्ययोद्भवोयस्मात्सत्वंउपादानकारणमित्यर्थः

अत्रसदाचारंप्रमाणमाह।याथातथ्येतयथार्थत्वेना सर्वभूतकारणंत्वां।ब्राह्मणा।वेदतात्पर्यविदः एवंकारणत्वेनसर्वात्मत्वमनूद्यविभूतीःपृच्छतियेष्विति।उपासी
नाःसेवमानाःसंतः।दुर्ज्ञेयत्वमेवाह।गूढः।अस्फुटः।भूतानांप्राणिनांमध्ये।अत्रहेतुः।भूतानामात्माअंतर्यामी।अत्रापिहेतुःहेभूतभावनेति।तेत्वया।ताएवसाकल्ये

उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः३।उपासतेत्वांभगवन्याथातथ्येनब्राह्मणाः।येषुयेषुचभावेषुभक्त्यात्वांपरमर्षयः।उपासीनाःप्रप
द्यंतेसंसिद्धिंतद्वदस्वमे।३।।गूढश्चरसिभूतात्माभूतानांभूतभावनः।नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते।४।।याःकाश्चिद्भूमौदिविवै
रसायांविभूतयोदिक्षुमहाविभूते।तामह्यमाख्याह्यनुभावितास्तेनमामितितीर्थपदांघ्रिपद्मं।।५।। ।।भगवानुवाच।। ।।एवमेतदहंपृष्टःप्रश्नंप्रश्न
विदांवर।युयुत्सुनाविनशनेसपत्नैरर्जुनेनवै।६।।ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकं।ततोनिवृत्तोहंताहंहतोयमितिलौकिकः।।७।।

नपृच्छति।महाविभूते।याःकाश्चिद्भूम्यादिषुतेविभूतयःरसायांरसातले।अनुभाविताःत्वयैवकेनचिच्छक्तिविशेषेणसंयोजिताः।तीर्थानांपदंचतदंघ्रिपद्मंचेतिनरावतारःभूत
र्जुनप्रश्नसंवादित्वात्तवायंप्रश्नःसाधीयानितितावदनुमोदते।एवमितित्रिभिःप्रश्नंपृष्टवं।सपत्नैर्योद्धुमिच्छता।विनशनेकुरुक्षेत्रे।युयुत्सोर्विभूतिप्रश्नेकःप्रसंगस्तत्राह।ज्ञा
त्वेति।लौकिकःप्राकृतमतिःसन् ७

स

सवयदाततोज्ञातिवधान्निवृत्तः तदा मया प्रतिबोधितः सन् यथा त्वमसि साक्षे एवं संग्राममुखे मामभ्यभाषत तद्वदेव तवापि कथयिष्यामीति भावः । ताः विभूतीः कथयति । अ
स्मच्छब्दसमानाधिकरणाः प्रथमांता द्वितीयांताश्च सर्वा विभूतयः तासां श्रीपतिनार्थ कथ्यंते । षष्ठीवक्त्रविनिर्द्धारणे संबंधे च कृविद्यथा योग्यं द्रष्टव्यं । ततश्च भूमीषां भूतानां
आत्मेनैति सुहृदिति । इश्वर इतिव सामान्येनाहमुपास्य इत्यर्थः । एवं सर्वत्र । तेषां स्थितिः सुहृवाश्रयः तद्धेतुरित्यर्थः । विशेषतो विभूतीराह । कलयतां वशीकुर्वतां मध्येषु

दी

सतदा पुरुषमध्याद्योयुक्त्या मे प्रतिबोधितः । अभ्यभाषत मामेवं यथा त्वं रणमूर्द्धनि ॥ ८ ॥ अहमात्मोद्भवामीषां भूतानां सुहृतीश्वरः । अहं स
र्वाणि भूतानि तेषां स्थितिसुहृवाश्रयः ॥ ९ ॥ अहं गतिर्मता कालः कलयतामहं । गुणानां चाप्यहं साम्यं गुणिन्योत्पत्तिको गुणः ॥ १० ॥ गुणिना
मप्यहं सूत्रं महतां च महानहं । सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥ ११ ॥ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत् । अक्षराणामका
रोऽस्मि पदानि छंदसामहं ॥ १२ ॥

गति

साम्यमव्याहतं

णानां मध्ये गुणिनि धर्मिणि ओत्पत्तिकः स्वाभाविको यो गुणः सोहं । सूत्रं प्रथमकार्यं महान् महत्तत्वं । सूक्ष्मोपाधित्वाद् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं । उद्धेर्यणेना
मगुणेनैवमाराधमानो द्रष्टुं रोपिद्रष्ट इति श्रुतेः । वेदानां संबंधी तेषां मध्ये व्यापकः । पदानि त्रिपदा गायत्रीत्यर्थः ॥ १२ ॥ ॥

पाकाग्रदो

हविर्धानीकामधेनुःनक्षत्रौषधीनांप्रभुंसोमं।यक्षरक्षसांप्रभुं।यादसांप्रभुं।तपसांप्रभुं।तापवतांद्युमतांदीप्तिमतांचमध्येसंयमतांदंड्यतामित्यर्थः।शृंगीणांदंष्ट्रिणांच
मध्येतेषांप्रभुर्वा।ऽर्थ्यःस्वन्यासः।प्रथमंब्राह्मणः।स्रोतसांप्रवाहाणांच।सरसांस्थिरोदकाशयानां।धिष्ण्यानांनिवासस्थानानां।गहनानांदुर्गमानां॥२१॥ब्रह्मिष्ठानां

इंद्रोहंसर्वदेवानांवसूनामस्मिहव्यवाट्॥आदित्यानामहंविष्णुरुद्राणांनीललोहितः॥२३॥ब्रह्मर्षीणांभृगुरहंराजर्षीणांमहंमनुः।देवर्षीणां
नारदोहंहविर्धान्यस्मिधेनुषु॥२४॥सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणां।प्रजापतीनांदक्षोहंपितॄणामहमर्यमा॥२५॥मांविद्धिदैत्यानांप्रह्ला
दमसुरेश्वरं।सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसां॥ऐरावतंगजेंद्राणांयादसांवरुणंप्रभुं॥तपतांद्युमतांसूर्यंमनुष्याणांचभूपतिं।२७।उच्चैःश्रवास्तुरं
गाणांधातूनामस्मिकांचनं।यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः।२८।नागेंद्राणामनंतोहंमृगेंद्रःशृंगिदंष्ट्रिणां।आश्रमाणामहंतुर्यश्चव
र्णानांप्रथमोऽनघ।२९।तीर्थानांस्रोतसांगंगासमुद्रःसरसामहं।आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मतां।३०।धिष्ण्यानामस्म्यहंमेरुर्गहनानांहि
मालयः।वनस्पतीनामश्वत्थऔषधीनामहंयवः।३१।पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः।स्कंदोहंसर्वसेनान्यामयणपांभगवानजः।३२।

वेदार्थनिष्ठानां।सेनान्यांचभूपतीनां।अयणपांसन्मार्गप्रवर्तकानां॥अजःब्रह्मा॥३२॥

शुचीनां शोधकानां मपि मार्जनतत्त्वणाधर्षणादीनां मध्ये वाय्वादिरूपः शोधको ऽहं योगानां मध्ये आत्मसंरोधः समाधिर् (हं) मंत्रो नीतिः कौशलानां विवेका
दिनैपुणानां मध्ये आन्वीक्षिकी आत्मानात्मविवेकविद्या। अख्यात्यन्यथाख्यातिशून्यख्यात्यनिर्वचनीयख्यातिवादिनां एवमिदमेवं वेति यो ऽयं तो विकल्पः सो ऽहं कु
मारः सनत्कुमारः सूनृतानाम भयप्रदानं। क्षेमाणां अभयस्थानानां मध्ये अबहिर्मतिः अंतर्निष्ठा। सत्यं तं प्रियवचनं मौनं च। नहि प्रियभाषणो मौनेन व पुरुषस्पालि

स-पानी

यज्ञानां ब्रह्मयज्ञो ऽहं व्रतानाम विहिंसनं। वाय्वग्न्यर्कांबुवागात्मा शुचीनामप्यहं शुचिः।२३। योगानामात्मसंरोधो मंत्रो ऽस्मि विजिगीषतां। आ
न्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां।२४॥ स्त्रीणां तु शतरूपा ऽहं पुंसां स्वायंभुवो मनुः। नारायणो मुनीनां च कुमारो ब्रह्मचारिणां।२५॥
धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः। गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं।२६॥ संवत्सरो ऽस्म्यनिमिषामृतूनां मधुमाधवौ॥ मा
सानां मार्गशीर्षो ऽहं नक्षत्राणां तथा ऽभिजित्।२७। अहं युगानां च कृतं धीराणां देवलो ऽसितः। द्वैपायनो ऽस्मि व्यासानां कवीनां काव्य आत्मवान्।२८

प्रायो जायते। अजः प्रजापतिः यस्य देहार्द्धाभ्यां मिथुनमभूत् स एव मुख्यं मिथुनं अर्द्धो ह वा एष आत्मनो यत्पत्नीति श्रुतेः। अनिमिषां अप्रमत्तानां। मधुमाधवौ वसंत
इत्यर्थः। अभिजित् उत्तराषाढचतुर्थः पादः। तथा च श्रुतिः। अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अवस्तात् श्रोणाया इत्यादि। कृतं कृतयुगं। देवलः असितश्च। व्यासानां
वेदविभागकर्तॄणां। कवीनां विदुषां काव्यः शुक्रः २८

श्रवणस्यापि चतुर्घटिकाः आभिजिन्नाम नक्षत्रं

भागवतां। उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति। एवं लक्षणानां। सुपेशसां सुंदराणां। दर्भजातीनां काशकुशादीनां। हविःषु चरुपुरोडाशादिषु घृतेषु वा। लक्ष्मीः धनादिसंपत्। बलवतां ओजः सहश्च। सात्वतां भागवतानां भक्त्याकृतं कर्माहमित्यर्थः। तेषामेव नवव्यूहार्चने वासुदेवसंकर्षणप्रद्युम्नानिरु

वासुदेवो भगवतां त्वं तु भागवतेष्विह। किंपुरुषाणां हनुमान्विद्याध्राणां सुदर्शनः। रत्नानां पद्मरागोस्मि पद्मकोशः सुपेशसां। कुशोस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं। व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः। तितिक्षास्मि तितिक्षूणां सत्वं सत्ववतामहं। ओजः सहो बलवतां कर्माहं विद्धि सात्वतां। सात्वतां नवमूर्तीनामादिमूर्तिरहं परा। विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं। भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः। अपां रसश्च परमस्तेजिष्ठानां विभावसुः प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः। ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः। भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः। गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं। आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियं ३६

सात्वतां

द्धनारायणहयग्रीववराहनृसिंहब्रह्माणइतिया नवमूर्तयस्तासां मध्ये वासुदेवाख्यः। गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः। गंधमात्रं अविकृतां परमः मधुरः। परः परास्त्यः शब्दः। अर्जुनः पार्थः। भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः। गत्यादयः पंचकर्मेंद्रियव्यापाराः। स्पर्शादयो ज्ञानेंद्रियव्यापाराः। तत्र लक्षणं दर्शनं। सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरयमहं।।३६।।

तदेवं तत्र तत्र निर्द्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति सार्द्धद्वयेन। पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि। अहं अहंकारः। महान्महत्तत्वं। एताः सप्त प्रकृतिविकृतयः। विकारः पंच महाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशसंख्याकः। पुरुषो जीवः। अव्यक्तं प्रकृतिः। एवं पंचविंशति तत्वानि। तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति। किंच रजः सत्वं तमः इति प्रकृतेर्गुणाः। तत्परं च यत्तदेतत्सर्वमहमेव। किंच एतत्प्रसंख्यानं एतेषां परिगणनं। एतेषां लक्षणतो ज्ञानं च। तत्फलं तत्वविनिश्चयः। यथा अस्म्यहमेव। एवंदेव संज्ञितश्चाहमेवेति॥

पृथिवी वायुराकाशमापो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजः सत्वं तमः परं। अहमेतत्प्रसंख्यानं ज्ञानं तत्वविनिश्च
यः। मयेश्वरेण जीवेन गुणेन गुणिना विना। सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित्। संख्यानं परमाणूनां कालेन क्रियते मया। न तथा मे विभूतीनां सृजतोंडानि कोटिशः॥ ३९॥ ॥

जीवेश्वररूपोऽहं। ध्येयो भावः पदार्थः गुणो गुणिरूपः। यश्च तेन रूपः स सर्वोपि मया विना मद्व्यतिरेकेण नास्ति। अहमेव सर्वमित्यर्थः। ननु सामान्यतः किमेवं संक्षिप्य कथ
यसि। पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वा कथयेति चेत्तत्राह। संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते। कर्त्तुं शक्यते। तथा मे विभू
तीनां संख्यानं कर्तुं न शक्यते। कुत इत्यत आह। सृजतोंडानीति। यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्संख्या नास्ति। तदा कुतस्तद्गतानां विभूतीनां संख्येत्यर्थः। ३९॥

तथापिविशेषतएवसर्वाण्यपिसंक्षेपतःकथयामीत्याह।तेजःप्रभावःश्रीःसंपत्।सौभगंभगतोनयनाह्लादकत्वं।भगंभाग्यं।वीर्यंबलं।अंशकःविभूतिः।उपसंहरति।एताइति।ए
तेचविभूतिभेदामयिविज्ञावतारयकल्पिताः।अतोनात्रातीवाभिनिवेशःकर्त्तव्यइत्याह।मनोविकाराएवनतुपरमार्थः।यथाकिंचिन्नपुष्पादिवाङ्मात्रेणाभिधीयतेतन्नु

तेजःश्रीःकीर्त्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः।वीर्यंतितिक्षाविज्ञानंयत्रयत्रसमेंशकः।एतास्तेकीर्त्तिताःसर्वाःसंक्षेपेण
विभूतयः।मनोविकाराएवैतेयथावाचाभिधीयते।वाचंयच्छमनोयच्छप्राणान्यच्छेंद्रियाणिच।आत्मानमात्मनायच्छनभूयःक
ल्पसेऽध्वने।योवैवाङ्मनसीसम्यगसंयच्छन्धियायतिः।तस्यव्रतंतपोदानंस्रवत्यामघटांबुवत्।तस्माद्वचोमनःप्राणान्नियच्छेन्म
त्परायणः।भक्तियुक्तयाबुद्ध्यातततःपरिसमाप्यते।।इतिश्रीभागवतेमहापुराणेएकादशस्कंधेमहाविभूतिर्नामषोडशोध्यायः।

त्पाःतस्माद्वागादीन्नियच्छ।आत्मानंबुद्धिंआत्मनामत्वसंपन्नयातयैवनियच्छ।अथनेसंसारमार्गाय।असंयमनेदोषमाह।यइति।असंयच्छन्नसंयच्छति।परिसमाप्यते।कृ
तकृत्योभवतीत्यर्थः।इतिषोडशः॥

भा०ए०
७६

ततः सप्तदशेप्रोक्ते स्वधर्मे भक्तिलक्षणे । हंसोक्तं धर्ममब्राह्मब्रह्मचारिगृहस्थयोः ॥ कर्मार्हं विद्धि सात्वतामित्यत्र भक्त्याकृतं । कर्मणोऽङ्गसाधनं मद्धिस्मृतीरित्युक्तं । भक्तिसाधनत्वं च कर्मणां
मयोदिते ष्ववहितः स्वधर्मेष्विंग्यादिना तत्र तत्रोक्तं । तव कर्मानुष्ठानेन नियमेन भक्तिर्दर्शिता अतः पृच्छति । यस्त्वयेति सप्तभिः । पूर्वं कल्पादौ । त्वद्भक्तिलक्षणः त्वज्ज्ञापकः । ब्रह्माद्यन
मित्यर्थः । वर्णाश्रमहीनानामपि द्विपदां नराणां । यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण । न तु संप्रदायादेव शास्यते किंतु न वर्णनि नत्वा हस्वरेति । पुरा परमकं परमश्वासो कं सुखरूप

उद्धव उवाच ॥ ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः । वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि । यथानुष्ठीयमानेन त्वयि भ
क्तिर्नृणां भवेत् । स्वधर्मेणारविंदाक्ष तत्समाख्यातुमर्हसि । पुरा किल महाबाहो धर्मं परमकं प्रभो । यत्तेन हंसरूपेण ब्रह्मणेऽभ्या
त्थ माधव । स इदानीं सुमहता कालेनामित्रकर्शन । न प्रायो भविता मर्त्यलोके प्रागनुशासितः । वक्ता कर्ताविता नान्यो धर्मस्याच्यु
त ते भुवि । सभायामपि वैरिंच्यां यत्र मूर्तिधराः कला । कर्त्राविस्त्राप्रवक्त्रा च भवता मधुसूदन । त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्य
ति । तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः । यथा यस्य विधीयेत तथा वर्णय मे प्रभो ॥ ७ ॥ ॥

स्वतं । यत् त्वं हंसरूपेण धर्मो प्रोक्त एव न तयोगमात्रं जानीत मागं तं यसंख्य अद्दर्मविवक्षये त्युक्त्वा तु प्रागनुशासितोऽपि न भविष्यति अत्र हेतुमाह । वक्तेति द्वाभ्यां ते त्वत्तोऽन्यः ॥
कलावेदाद्याः । तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ॥ ७ ॥ ॥

राम
७६

धर्म्यः धर्मादनपेतः। नैश्रेयसकरः भक्तिजनकः। अतः प्रमत्तः तं धर्मं निबोधात्। तत्रादौ मदुपासनालक्षण एक एव मुख्यो धर्म आसीत्। आचारलक्षणस्तु पश्चात् इत्यन्तःस्पष्टेवम् अत्र श्रीतो भक्ति
हेतुरिति वर्णयितुमाह। आदाविति। कल्पादौ यत् कृतयुगं तस्मिन्। नैव तदा मामुपासत एव केवलं नान्यत् कुर्वन्तीति वक्तुं कृतयुग नाम निरुक्तिमाह। कृतकृत्या इति। जात्या जन्मनै
व। किं च विधायका भावादपि तदानीं नान्यत् कर्मासीदित्याह वेद इति। धर्मश्च मनो विषयो ऽहमेव वृषरूपधृक् चतुष्पात्। न क्रियाविशेषो यज्ञादिः। अतः तपोनिष्ठाः भजनसर्वे

श्रीभगवानुवाच॥ ॥धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां। वर्णाश्रमाचारवतां तमुद्धव निबोध मे। आदौ कृतयुगे वर्णो नृणां हंस
इति स्मृतः। कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः। वेदः प्रणव एवाग्रे धर्मो ऽहं वृषरूपधृक्। उपासते तपोनिष्ठा हंसं मां मुक्तकि
ल्बिषाः। त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी। विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः। विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपाद
जाः। वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः। गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम। वक्षःस्थलाद्वनेवासो न्यासः शीर्षणि संस्थितः

ड्रियाणां च ऐकाग्र्यं परमं तप इति वचनादैकाग्र्यतपा हंसं शुद्धं मां ध्यायन्तीत्यर्थः। पश्चात् त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणात्रिमिता हृदयात्तत्सकाशात्। तस्याः त्रय्याः
सकाशात्। होताध्वर्युद्गात्रैः त्रिवृत् त्रिरूपः। यज्ञो वै विष्णुरिति श्रुतेः। वर्णाश्रमेन नामाश्रमाणां च धर्मं वक्तुं तेषामुत्पत्तिमाह विप्रेति द्वाभ्यां। आत्माचारः स्वधर्म एव लक्ष
णं ज्ञापको येषां ते। मम वैराजरूपस्य हृदयः वक्षसो ऽधस्तात् ब्रह्मचर्यमिति नैष्ठिकाभिप्रायं॥ ॥

तेषामधिकारिविशेषेणाश्रमाणां स्वभावानाह वर्णानामिति पंचभिः। जन्मस्थानानुसारिणः नीचैरीतष्वर्यां अतोऽसमर्थः मंदास्तिर्जन्मभूमिनिर्मंदाः उत्तमा ति रुत्तमाश्चेति। तप आर्जवं। तेजः प्रतापः शौर्य्यं खेदाश्रमसत्ता वा अपि ज्ञेयाः। तच्छाद्यानां स्वभावानाह। अशौचमिति। शुष्कविग्रहः। निर्मूलकलहः। तर्षः तृष्णा। तत्र तावत्सर्वसाधारणं धर्ममाह अ

देवा ३

वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः। आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमैः। शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं। मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः। तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः। स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः। आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं। अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः। शुश्रूषणं द्विजगवां देवानां चाप्यमायया। तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः। अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः। कामः क्रोधश्च तर्षश्च स्वभावोऽन्तेवसायिनां। अहिंसा सत्यमस्तेयमकामक्रोधलोभता॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः। द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः। वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहूतः॥ २१॥

हिंसेति। वर्णग्रहणमुपलक्षणार्थं। वर्णधर्मान्गृहस्थप्रकारेणोक्त्वा प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मान्वर्णयति। स च द्विविधः उपकुर्वाणको नैष्ठिकश्चात्र। ग्रहस्थधर्मानाह। द्वितीयमिति नवभिः। द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण। द्वितीयमुपनयनाख्यं जन्म प्राप्य आचार्येणाहूतो ब्रह्म वेदमधीयीत च कारान्नदर्थं विचारयेत॥ २२॥ ॥

भी

किंवा मेखलादीन् कुशांश्च दधत्। तत्राक्षशब्देनाक्षमाला। कथंभूतः जटिलः अनभ्यंगादिना जातजटः। तथा अधौतदद्वासोऽरक्तपीठः दंताश्च वासश्च दद्वाससी न धौतानि तानि य
स्य सः अधौतदद्वासाः मनासावरक्तपीठश्च न कौतुकादिना रक्तं पीठमासनं यस्य सः। जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चाराः तस्मिन्स्नानादौ च वाग्यतः मौनी भवेत्। रेतो बुद्धिपूर्वं ना
वकिरेत्। नोत्सृजेत्। ब्रह्मव्रतधरः अगृहस्थः स्वयमेव कथंचिदवकीर्णे अवगाह्याप्सु स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत्। संध्ये च द्वे यतवाक् जपन्नुपासी

अवगीते

मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून्। जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत्। स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः। न छिंद्या
न्नखरोमाणि कक्षोपस्थगतान्यपि। रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं। अवकीर्णेऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत्। अग्न्यर्काचार्यगोविप्रगुरु
वृद्धसुरान् शुचिः। समाहित उपासीत संध्ये च यतवाग्जपन्। आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्। न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गु
रुः। सायंप्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत्। यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः। शुश्रूषमाण आचार्यं सदोपासीत नीचवत्। यानशय्या
सनस्थानैर्नातिदूरे कृतांजलिः। एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः। विद्या समाप्यते यावद्बिभ्रद्व्रतमखंडितं॥ २९॥ ॥

ता। मध्याह्ने संध्याभिमिन्नं मौनं नास्तीति द्विवचनं। अन्यदपि यत्प्राप्तं तदपि निवेदयेत्। तेनानुज्ञातं तु संयतः सन्नुपयुंजीतेत्यर्थः। यानशय्यासनस्थानैः यांतं दृष्टतो यानेन। नि
ष्ठितमप्रमत्ततया समीपशयनेन विश्रांतं पादसंवाहनादिभिः समीपासनेन। आसीनं कृतांजलिर्नियोगप्रतीक्षया नातिदूरे स्थानेनेत्यर्थः। एवंभूतं वृत्तं यस्य सः॥ २९॥ ॥

शेक २

एवमुपकुर्वाणस्य धर्मा उक्ता नैष्ठिकस्य विशेषधर्मानाह। यदीति षड्भिः। अमोदं ब्रह्मचारी यदि छंदसां लोकं महर्लोकांततो ब्रह्मलोकं वारोढुमिच्छतीत्यर्थः
यद्वा छंदसां लोकमिति ब्रह्मणो विशेषणं। यत्र मूर्त्तिधराः कला इत्युक्तं वा न। तर्हि इह हहुतः मनुष्य हत। नैष्ठिकं व्रतं यस्य सः विन्यसेत। समर्पयेत। अधिकस्वाध्यायार्थं अधीत।
निःक्रियार्थं वा ब्रह्मवर्चस्वि दाभ्यासजं तेजः तद्यातात तस्यैव वनस्थयतिसाधारणधर्मनाह। स्त्रीणामिति निरीक्षणं भाषणं वाभं ह्वेलतं परिहासः एवमादिकं त्यजेत। मिथुनीभूता

१५ ९   वि   प

यद्यसौ छंदसां लोकमारोढुमिच्छेत् ब्रह्मविष्टयं। गुरवे न्यसेद्देहं स्वाध्यायार्थं हहहुतः। अयमोगुरावात्मनि सर्वभूतेषु मां परं। अष्टथा मधी रूपासीत ब्रह्म
वर्चस्वकल्मषः। स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं। प्राणिनो मिथुनीभूतान गृहस्थोऽयतद्यजेत्।। शौचमाचमनं स्नानं संध्योपासन
मार्जवं। तीर्थसेवा जपो स्पृश्याभक्ष्यासंभाष्यवर्जनं। सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन। सद्भावः सर्वभूतेषु मनोवाक्कायसंयमः। एवं बृह
द्व्रतधरो ब्राह्मणोग्निरिव ज्वलन्। महत्तान्नीव्रतपसा दग्धकर्माशयो मलः।। अथानंतरमावेक्ष्यन् यथाजिज्ञासितागमः। गुरवे दक्षिणां दत्वाम्ना
याद्धुर्वनुमोदितः।।३६।। ।।

नयतत्प्यजेत नपश्येदित्यर्थः। तस्यैव सर्वाश्रमसाधारणं धर्ममाह। शौचमिति द्वाभ्यां। निष्कामनैष्ठिकस्य तु मोक्षफलमाह। एवमिति। अमलः निःकामः अत एव दग्धं क
र्माशयोऽतःकरणं यस्य तथाभूतः सन् ब्रह्मइक्तो भवति। उपकुर्वाणस्य समावर्त्तनप्रकारमाह। अथेति अनंतरं द्वितीयाश्रमं आवेक्ष्यन् प्रवेष्टुमिच्छन् यथायथावद्विवा
रितवेदार्थः आम्नायात्। अभ्यंगादिकं कृत्वा समावर्तेतेत्यर्थः।।३६।।

तस्याधिकारादूर्ध्वमाश्रमविकल्पसमुच्चयावाह। गृहमिति। सकामश्चेद्गृहं। अथ तत्करणशुद्ध्यादिकामश्चेद्वनं प्रविशेत्। शुद्धान्तःकरणः सन्द्विजोत्तमः ब्राह्मणश्चेत्प्रव्रजेदि
त्यर्थः। यद्वा आश्रमादाश्रमांतरं गच्छेत्। अन्यथा अनाश्रमी प्रतिलोमं तु नाचरेदित्यर्थः। अमत्पर इति वा छेदः स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात्। विवाहनि
यमपूर्वकं वर्णाधर्मैः सह गृहस्थधर्मानाह। गृहार्थीति। सदृशीं सवर्णां। अजुगुप्सितां कुलतो लक्षणतश्चानिंदितां। कामतस्त्वन्यामप्युद्वहेत्तां सवर्णामनु तस्या अनं

गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः। आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत्। गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां। यवी
यसीं तु वयसा यां सवर्णामनुक्रमात्। इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां। प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं। प्रतिग्रहं मन्यमा
नस्तपस्तेजोयशोनुदं। अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः। ब्राह्मणस्य हि देहोयं क्षुद्रकामाय नेष्यते। कृच्छ्राय तपसे चेह प्रेत्यानंत
सुखाय च॥४२॥

तरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः। तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मन इति स्मृतेः। इज्यादयस्त्रैवर्णिकानामावश्यकाध
र्माः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव। तत्रापि सुखां सुख्यातमां वान्यां वृत्तिमाह। प्रतिग्रहमिति। तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन्तु शिलैः स्वामि
त्यक्तैः क्षेत्रपतितैः कणैः॥ एवं वृत्तिकार्पण्ये ब्राह्मणेन न सोढव्यमित्याह॥ ब्राह्मणस्येति॥ ४१॥ ॥

उंछवृत्तिर्नामविपणादिपतितकणोपादानं तां शिलवृत्त्यैकीकृत्य तया तुष्टचित्तस्य मोक्षफलमाह । शिलोंछेति महांतं आतिथ्यादिलक्षणं । एवमधमानस्य महत्फलमुक्त्वा सध
नानामप्याहवृत्तिभिः समुद्धरंति दारिद्र्यादुत्तारयंति । विप्रमित्युपलक्षणं । मत्परायणं यं कमपि । राज्ञश्चावश्यकमेतदित्याह । सर्वाइति । सर्वेषामापद्वृत्तीराह सीदन्निति त्रि
तिः पण्यैर्विक्रियार्हैः न तु सुरालवणाद्यैः । तत्राथापदाक्रांतश्चेत् खड्गेन क्षत्रियवृत्त्या वा यद्यपि गोप्तमा । नेतरां पापीयसीं वृत्तिमातिष्ठेत् इति स्मरन्तु खड्गधारणं पाप

शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः । मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं । समुद्धरंति ये विप्रं सीदं
तं मत्परायणं । तानुद्धरिष्ये न चिरादापद्भ्यो नौरिवार्णवात् । सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः । आत्मानमात्मना धीरो यथा गजपतिर्गजान् ।
एवंविधो नरपतिर्विमानेनार्कवर्चसा । विधूयेहाशुभं कृत्स्नमिंद्रेण सह मोदते । सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् । खड्गेन वापदाक्रांतो
न श्ववृत्त्या कथंचन । वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययापदि । चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन । शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां ।
कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ॥ ४८ ॥

विक्रयार्हैः श्रेष्ठं मन्यते । तथा हि पिसानो वणिग्वृत्तिरेव श्रेष्ठेति भगवतो मतं न तु श्ववृत्त्या नीचसेवया । तत्राप्यापदि मृगयया विप्ररूपेण वा अध्यापनादिना । कारवः प्रतिलो
मजा विशेषाश्च रजकादयः तेषां वृत्तिं कटादिक्रियां । आपद्वृत्तीरुक्त्वा तासु कल्पेन वर्तेतेत्याह । कृच्छ्रादिति ॥ ४८ ॥ ॥

तदेवं दर्शितिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान्पंचयज्ञानाह। वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन्। स्वधाकारेण पितॄन्। स्वाहाकारेण देवान्। बलिहरणेन भूतानि। अन्ना
द्येरन्नोदकादिभिर्मनुष्यानितिथीन्। तथ्यं। यथोदयं विभवानुसारतः। तेषां सृष्टिविधेः। मद्रूपाणीति। आवश्यकं धर्मं मुक्त्वा शक्त्यनुसारं धर्ममाह। यदृच्छया उद्यमं विना। उ
पार्जितेन वा। शुक्लेन स्वच्छन्दया लब्धेन शुद्धेन धनेन वा। स्वात्मानुपोषयन्। गृहस्थस्यापि निवृत्तिनिष्ठामेवाह। कुटुंबेष्विति त्रिभिः। न प्रमाद्येत ईश्वरनिष्ठायां प्रमत्तो न भवेत्।

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं। देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत्। यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा। धनेनापीडयन्
भृत्यान्न्यायेनैवाहरेत्क्रतून्। कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि। विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत्। पुत्रदारादिबंधूनां संगमः पांथसं
गमः। अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा। इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन्। न गृहैरनुबध्येत निर्ममो निरहंकृतः। कर्मभिर्गृहमे
धीयैरिष्ट्वा मामेव भक्तिमान्। तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत्॥ ५४॥ ॥

ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादः। विचारेणेत्याह। विपश्चिदिति। तत्रापि दृष्टे ग्रामसक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति। पुत्रादीनामेकत्र संगमः पांथानां प्रपायां
संगम इव। तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति नश्यंति। निद्रानुवर्ती स्वप्नो निद्रायाये यथेति। अतिथिवदुदासीनः। अस्याश्रमविकल्पमाह। कर्मभिरिति। इह आश्रम
एव तिष्ठेत्। यदि प्रजावान् तर्हि प्रव्रजेत्त्वा॥ ५४॥

एहाप्यासंगो दोषमाह यच्चितिति त्रिभिः बंधमेवाभिनयेन दर्शयति। अहो इति। बाला आत्मजायस्याः सा। आत्मजा अस्मां विना अनाथाः संतः कथं जीविष्यंतीति गृहेषु आशयो
वासनातेतत्रा सर्वतः क्लिष्टं हृदयं यस्य सः अंधं तमः आतिताम सीयो ति॥ इत्येकादशे सप्तदशः॥ ॥ अष्टादशे ऽवद्धर्मं वनस्थ्यतिगोचरं। अधिकारविशेषेणाविशकंचा
पितं इतं। क्रमप्राप्तावनस्थधर्ममाह। वनमिति। आयुषस्तृतीयं भागं पंचसप्ततिवर्षपर्यंतं। ततः परं क्षीणेंद्रियस्यापि विरागो ऽपि संन्यासाधिकारः स्यादिति भावः। वसीत

यद्वासमक्रमतिर्गेहि पुत्रवित्तैषणातुरः। स्त्रैणः कृपणधीर्मूढो ममाहमिति वध्यते। अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः। अनाथा मामृ
ते दीनाः कथं जीवंति दुःखिताः। एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं। अतृप्तस्ताननुध्यायन्मृतोंऽधं विशते तमः॥ ॥ इति श्रीभागवते महापु
राणे एकादशस्कंधे सप्तदशोऽध्यायः॥ ॥ श्रीभगवानुवाच॥ ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा। वन एव वसेच्छांतस्तृतीयं भागमायुषः
कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत्। वसीत वल्कलं वासस्तृणपर्णाजिनानि वा। केशरोमनखश्मश्रुमलानि बिभृयाद्दतः। न धावेदप्सु मज्जेत
त्रिकालं स्थंडिलेशयः। ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले। आकंठमग्नः शिशिर एवं वृत्तस्तपश्चरेत्॥४॥ ॥

परिदधीत तदत मध्यंतान् न धावेत् न शोधयेत्। त्रिकालमप्सु मज्जेत् स्नानं कुर्यात्। स्थंडिलेशयः भूमिशायी। तप्येत तपं पंचाग्नीन् सूर्येण सह चतुर्दिक्षु अग्नीन् निधाय आत्मानं
तापयेदित्यर्थः। आसारषाट् आसारं धारसंपातं सहत इति तथा। अभ्रावकाशं नाम व्रतं चरेत्। जले आकंठमग्नः उदकवासं नाम व्रतं चरेत्॥४॥ ॥

उलूखलेनवाऽश्मनावाकुट्टयतिकंडयतीतितथोक्तो।एवोलूखलेनयस्यसतथा।संचिनुयात्।अन्यदाकालांतरेनाद्दीत।लब्धेनवेनवेऽन्नाद्येपुराणंतुपरित्यजेदिति
नारदोक्तेः।कालपक्वोदितान्।आग्रयणादीन्।किंच।अग्निहोत्रमिति।मुनेश्च।नैगमैर्वैदिकैर्दिवादिभिः।अस्यानिष्कामस्यफलमाह।एवमिति।धमनिभिः।शिराभिःसंततः।व्याप्तः
यावज्जीवंतेनतपसाशुष्कमांसइत्यर्थः।ऋषिलोकात्महर्लोकादिक्रमेण।अयंभावः।अंतःकरणशुद्धिभक्तिद्वारा।जैवतावन्मुच्यते।प्रतिबंधकवाहुल्येतुनेनक्रमे

२

अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा।उलूखलाश्मकुट्टोवादंतोलूखलएववा।द्वयंसंचिनुयात्सर्वमात्मनोवृत्तिकारणं।देशका
कालबलाभिज्ञोनाद्दीतान्यदाहृतं।वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान्।नतुश्रौतेनपशुनामांयजेतवनाश्रमी।अग्निहोत्रंचदर्शश्च
पूर्णमासश्चपूर्ववत्।चातुर्मास्यानिचमुनेराम्नातानिचनैगमैः।एवंचीर्णेनतपसामुनिर्धमनिसंततः।मांतपोमयमाराध्यऋषिलो
× ख काद्उपैतिमां।यस्त्वेतत्कृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत्।कामायाल्पीयसेयुंज्याद्बालिशःकोऽपरस्ततः।यदासौनियमेऽकल्पोजरयाजा
तवेपथुः।आत्मन्यग्नीन्समारोप्यमच्चित्तोऽग्निंसमाविशेत्॥ ॥

एवमुच्यतइति।तंसकाममंतिंदति।यस्त्विति।निःश्रेयसंमोक्षफलं।अल्पीयसिअविरिंच्यादिस्वल्पमेवतस्मै।एवंयावज्जीवंवर्तमानस्यमोक्षः।तृतीयभागाद
सानेवमंदविरागोपिसन्यासाधिकारः।यदितुततोवर्णिवघद्वमशक्तोभवेत्तदापिसम्यग्विरक्तःविरक्तोवा।तत्राविरक्तस्यकृत्यमाह।यदेति।जातवेपथुःकं
पोद्देहयस्यसः॥ ॥

गृही

भा०ए० विरक्तं प्रत्याह यदेति। तत्रादौ क्रममाह इष्ट्वेति यथोपदेशं श्राद्धाष्टकपूर्वकं प्राजापत्येष्ट्या मामिष्ट्वा स्वेषु प्राणेष्वात्मनि। सत्यासेविद्याः सर्वान्तिनान विगाणाथ संन्यसन्तं
८१ वैत्याशयेनाह। विप्रस्येति। केनाभिप्रायेण कुर्वन्तीत्यत आह। अयमिति परं परं ब्रह्म। एवं प्रव्रजितस्य धर्मानाह। बिभृयाच्चेदिति। परं कौपीनादन्यद्वासो यदि बिभृयात् तर्हि
छति। तर्हि कौपीनमात्राच्छाद्यते यावता तावन्मात्रं धारयेदित्यर्थः। त्यक्तं येयो वा रात्पूर्वमेव अतोऽन्यत्किंचिदपि न बिभृयात् दण्डपात्राभ्यामित्यावश्यकजलपवित्रादेरुप

दुरन्तादर्केषु

अलपर्वतेषु

यदा कर्मविपाकेषु लोकेषु निरयात्मसु। विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः। इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे। अग्नीन्स्व
प्राण आवेश्य निरपेक्षः परिव्रजेत्। विप्रस्य वै संन्यसतो देवा दारादिरूपिणः। विघ्नां कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परं। बिभृयाच्चेन्मु स
निर्वासः कौपीनाच्छादनं परं। त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि। दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं। सत्यपूतां वदेद्वाचं मनः
पूतं समाचरेत्। मौनानीहानिलायामा दंडा वाग्देहचेतसां। न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः॥ १७॥

लक्षणं। मनःपूतं मनसा सम्यक् विचार्य यच्छुद्धं तदाचरेत्। मौनं वाचो दंडः। अनीहा ... म्यकर्मत्यागो देहस्य। प्राणायामश्चेतसः। एते यं तत्र्योदंडा यस्य न संति। अ ८१
गेहस्य वा। अंग हे उद्धव। वेणुभिरेव नैव यतिरित्यर्थः॥ १७॥

चतुर्ष्वपीति॥ ब्राह्मणेष्ववृत्तिसंदेन चतुर्विधेषु। पूर्वपूर्वमिसंवेवा॥ विगाहितनिश्चलिशम्भपतिताग्रा। श्रमं क्रमप्राप्त॥ अत्रायं लाभोभविष्यतीति पूर्वमुद्दिष्टा। बहिर्यामि
ता। पावितं प्रोक्तमणादिलिः शोधितं विभज्य विष्णुब्राह्मणां क्रमिभृतेभ्यः। अशेषमितपधिकाहरणां निरर्स्थां याचितमिति पाठेमा धुकरेणया। दितमत्रं वेतर्तहिं विभज्य भुजीतं
नत्वयाविता दिते च चतुष्टयमितपर्थः मा धुकरेतु नैवेद्यं भेद्देन। न्यनुविधत्ते। नैवेद्यकं क्षिपेदप्सु चितयंभो तिकं वाहिरितिस्मृतेः। यद्वा तदानीकेन। पियाचितं वेन्न न्मभेतस्मै

मिश्रां वर्णेषु चतुर्षु विगाह्याविर्जयश्चरेताम सागारान संक्रमं प्राप्य षष्ठेन वेनतावता। बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः। विभज्य पावितं शे
षं भुंजीत अशेषमाहृतं। एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः। आत्मक्रीड आत्मरत आत्मवान् समदर्शनः। विविक्तक्षेमशरणो मद्भावविमला
शयः। आत्मानं चिंतयेदेकमभेदेन मया मुनिः। अवेक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया॥ बंधइंद्रियविक्षेपो मोक्ष एषां च संयमः। तस्मान्निय
म्य षड्वर्गं मद्भावेन चरेन्मुनिः। विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत्। पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत्। पुण्यदेशसरिच्छैल
वनाश्रमवतीं महीं। वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्षमाचरेत्। संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा॥ २५

२२

किंचिद्विभज्य स्वचेतयर्थः। किंच। एकश्चरेदिति। आत्मन्येव क्रीडा कौतुकं यस्य सः। आत्मन्येव रतस्तुष्टः। आत्मवान् धीरः। विविक्तं विजनं। क्षेमं निर्भयं। शरणं स्थानं यस्य सः।
मद्भावेन विमल आशयो यस्य सः। संबंधमोक्षं च केन बंधः केन वा मोक्ष इति। तावाह बंध इति। पुराणि हट्टादिमंति। ग्रामास्तद्रहिताः। व्रजा गोष्ठानि। तान्। सार्थान् यात्रिकज
नसमूहान्। यतः शिलवृत्त्या प्राप्तेनान्नेन तदीयेनांधसा अन्नेन शुद्धसत्वः सन्नतिष्ठन् मोहः संसिध्यति मुच्यते २५

२ ननु मिथ्यात्वनिश्चयकर्पोपि तन्मप्रवृत्तिः स्यादत आह। नैतदिति। एतत् दृश्यमानं मिथ्यात्वादिवस्तुतया न पश्येत्। यतो विनश्यति। अतइहामुत्र च लोके अस
२ क्तचित्तः सन् चिकीर्षितात् तदर्थकर्मणः विरमेत्॥ २६॥ ननु तथापि यावद्विनाशं सुखहेतुत्वान् चिंतावतः कुतो विरागः स्यात्तत्राह। यदेतदिति। एतत् जगन्मनस्तास्पदम्भावा
कृप्राणैः

भा०ए० ~~[illegible]~~
~~[illegible]~~
उ हितमहंकारास्पदं शरीरं वा। सर्वं तत्स्वयं सुखं वा आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टांतेन तत्पदार्थस्वस्थः आत्मनिष्ठः सन् पुनः तत्र स्मरेत् तदुक्तादिधर्मा ~~[illegible]~~
~~[illegible]~~ परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्द्धैर्द्वादशभिः। बहिर्विरक्तो मुमुक्षुः सन्नद्यापि ज्ञाननिष्ठो वा मोक्षेऽप्यनपेक्षो मद्भक्तो वा सलिंगान् विदंडादि

नैतद्वस्तुतया पश्येद्दृश्यमानं विनश्यति। असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात्। यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं। सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत्। ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः। सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः॥ बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत्। वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत्॥ २७॥ ॥

सहितानाश्रमांस्त्यक्त्वा। तदासक्तिं त्यक्त्वा यथोचितं धर्मं चरेदित्यर्थः न पुनः स्वयं तत्त्याग एव विवक्षितः पुनरीहर्मविधानात्। अक्रियत्वस्योत्तराध्याये वक्ष्यमाणत्वा
च। तर्हि पूर्वस्मात्को विशेषस्तमाह अविधिगोचरः विधिकिंकरो न स्यादिति। एतदेव स्फुटीकरिष्यति। शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादिना। कथं चरेत्तत्राह बुधः
विवेकवानपि बालकवत् मानापमानविवेकशून्यः। कुशलः निपुणोऽपि जडवत् फलानुसंधानाभावेन। विद्वान् पंडितोऽपि उन्मत्तवत् लोकरंजनाभावेन। नैगमः वेदार्थ
निष्ठोऽपि गोचर्यां अनियताचारमिव २७
पिंगो

८२

वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादविवादे नैतिः प्रयोजनगोष्ठ्यां यो विवादस्तस्मिन्। अतिवादान् दुरुक्तानि। आत्मदृष्ट्या तावद्वैरका
रणं नास्तीत्युक्तं एक एवेति। देहदृष्ट्यापि नास्तीत्याह। भूतानि च देहा अपि कारणरूपेणैकात्मकानि। दैवतंत्रितं दैवाधीनं यतः। अलब्ध्वा नहि लिप्साप्रयत्नेनापि त
त्राह। आहारमात्रार्थं समीहेतैव। यतः तस्य प्राणधारणं युक्तं सम्यक्। कथं। तेन प्राणधारणेन तत्त्वं विचार्यते किं तेन पितदाहत तद्विज्ञायेति। तर्हि किं मिष्टान्नादिक
मयाह्यमेव केनैव मुक्तमित्याह। यदृच्छयेति। यथाहमीश्वरो लीलया चरामि। तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात्। ननु विधिकिंकरत्वेन। तस्य ज्ञाननिष्ठा

८ वेदवादरतो न स्यान्न पाषंडी न हैतुकः। शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत्। नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु। अतिवादां
स्तितिक्षेत नावमन्येत कंचन। देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित्। एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः। यथेंदुरुदपात्रेषु
भूतान्येकात्मकानि च। अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित्। लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं। आहारार्थं समीहेत युक्तं तत्प्रा
णधारणं। तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते। यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं। तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः। शौ
चमाचमनं स्नानं न तु चोदनया चरेत्। अन्यांश्च नियमाञ्ज्ञानी यथाहं लीलयेश्वरः। नहि तस्य विकल्पाख्या या च मद्वीक्षया हता। आदेहांता
त्क्वचित्ख्यातिस्ततः संपद्यते मया। दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान्। अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ३८

विरोधादित्यर्थः। कुतो विधिकिंकरत्वाभावस्तस्य तत्राह। नहि तस्य विकल्पाख्या भेदप्रतीतिः न त्वद्विक्षा सत्यं या चासीत् सापि मद्वीक्षया ज्ञानेन हता। ननु न हता पुन
र्दृश्यमानत्वात् तत्राह। आदेहांतात् क्वचित् कदाचित् ख्यातिर्भवति। तदेवं विरक्तस्य परोक्षज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलं वैराग्यवतं विविदिषुं प्रत्या
ह दुःखोदर्केष्विति। न जिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ३८

ख्या

२

श्री०भा०

मामेव मद्दृष्ट्यैव गुरुं परिचरेत्। ततः परमेकश्चेत्पारिव्रज्ये वर्त्तेत इति भावः। अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति। प्रचंडो ऽत्यासक्त इंद्रियसारथिर्बुद्धिर्यस्य सः। सुरा
न्यष्ट्व्या स्वदेवान्। आत्मानं च स्वात्मानं। आत्मस्थं मां चाति निह्नुते घ्नाति। निह्नवफलमाह अस्मादिति। वर्णाश्रमधर्मानाह। भिक्षोरिति। अन्यधर्मान्कांश्चि
न्गृहस्थस्य तिरिशति। ब्रह्मचर्यमिति। शौचं रागादिराहित्यं। तस्य ब्रह्मचर्यप्रकारमाह। ऋतौ गंतुरिति। एवंभूतवर्णाश्रमधर्मफलमाह इति मामिति। दृढां मद्भक्तिं

तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः। यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः। यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः। ज्ञानवैराग्यरहित
स्त्रिदंडमुपजीवति। सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा। अविपक्वकषायो ऽस्मादमुष्माच्च विहीयते। भिक्षोर्धर्मः शमो ऽहिंसा तप ईक्षा वनौ
कसः। गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं। ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं। गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं। इति मां
यः स्वधर्मेण भजन्नित्यमनन्यभाक्। सर्वभूतेषु मद्भावो मद्भक्तिं विंदते ऽचिरात्। भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं। सर्वोत्पत्त्यप्ययं ब्र
ह्म कारणं मोपयाति सः। इति स्वधर्मनिर्णिक्तसत्वो निर्ज्ञातमद्गतिः। ज्ञानविज्ञानसंपन्नो नचिरात्समुपैति मां। वर्णाश्रमवतां धर्म एष आचार
लक्षणः। स एव मद्भक्तियुतो निःश्रेयसकरः स्मृतः। एतत्ते ऽभिहितं साधो भवान्पृच्छति यच्च मां। यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं॥ ॥ इति
श्रीभागवते महापुराणे एकादशस्कंधे ऽष्टादशो ऽध्यायः॥ ॥

विंदते। ततः किमत आह भक्त्येति। महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात्। अत एव ब्रह्म कारणं मा मां ब्रह्मरूपं वैकुण्ठनिवासिनं। यद्वा ब्रह्मणो वे
दस्य कारणं मामुपयाति समीपे न प्राप्नोति। ततश्चापवर्गः क्रम एवेत्याह। इति एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्वं यस्य सः। अत एव निर्ज्ञाता मम गतिरैश्वर्यं येन। उ
क्तमर्थं संक्षिपन्नाह। एष आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः। प्रकरणार्थमुपसंहरति। एतत्ते ऽभिहितं। यथा भक्तो भूत्वा मां परं संप्रा
प्नुयादिति॥ एकादशे ऽष्टादशः॥ ॥

राम
८३

श्री

ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः। अत्रैकोनविंशतिमे ज्ञानादेस्त्याग उच्यते॥१॥ तदेवं तर्कतो बाधितोऽपि देहादिप्रपंचो यावदपरोक्षानुभवेन दिङ्मोहादि
वन्न लीयते तावज्ज्ञानाभ्यासो मन्नतो मुक्तिरित्युक्तं। आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मयेत्यादिना। यस्य त्वपरोक्षानुभवेन प्रपंचो लीनस्तस्य न किंचित्कृत्यमस्ती
त्याह यइति। विद्या अनुभवः तत्पर्यंतं तेन श्रुतेन संपन्नः। अत एवात्मवान् आप्तात्मतत्त्वः। नानुमानिकः केवलपरोक्षज्ञानवान्न भवति। अनकारणत्रयेणाक्षश्रुत्यनु
कूलतर्कतो निर्णीतार्थः। मह इदं द्वैतं तन्निवृत्तिसाधनं च ज्ञानमपि मायामात्रमिति ज्ञात्वा। ज्ञानं च तत्साधनं मयि संन्यसेत्। अयमेव विद्वत्संन्यासो नाम। अत्र हेतुमाह। ज्ञानिन इति।

श्रीभगवानुवाच॥ ॥यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः। मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत्॥१॥ ज्ञानिनस्त्वह
मेवेष्टः स्वार्थो हेतुश्च संमतः। स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः॥२॥ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम। ज्ञानी प्रियत
तोमे मो ज्ञानेनासौ बिभर्ति मां॥३॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च। नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता॥४॥ तस्माज्ज्ञा
नेन सहितं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः॥५॥ ॥

यस्मादहमेव तस्येष्टः अपेक्षितः। स्वार्थः फलं। हेतुः तत्साधनं च। संमतः स्वर्गोऽभ्युदयश्च। अपवर्गश्च संसारनिवृत्तिश्च। अतस्तस्य न प्रार्थ्यं कृत्यं वा किंचिदस्तीत्यर्थः॥२॥ अ
त्र विद्वदनुभवं प्रमाणयति। ज्ञानेति। यथोक्तं ज्ञानिनमभिनंदति। ज्ञानीति। यतो मां ज्ञानेन मां धारयति।३। तस्य ज्ञानं स्तौति। तप इति। अलं [illegible] समर्थं ज्ञानस्य कलया ले
शेन॥४॥ ज्ञानेन सहितं तत्पर्यंतं यथा भवति तथा ज्ञात्वा तत्संपन्नः सन्मामेव भज अन्यत्सर्वं त्यजेत्यर्थः॥५॥ ॥

भा०ए०

देहादित्रा दुर्भा नाम्ना रूपाम
ज्ञानादनंतरं २

पु ४

तस्य प्रत्यगर्थं पूर्वोक्तमाह। ज्ञानेति। मामेव संसिद्धिं प्राप्तः। ह्यात देव ज्ञानं संक्षेपतः उपदिशति। त्वयीति। त्रिविधः आध्यात्मिकादिर्विकारः देहादिः सः मायायान त्वपरमा
र्थः। यतयस्मात् अंतरा मध्य एवापतति। रज्जो सर्पवन्मालास्विव। नाद्यपवर्गयोः नत्वादावंते वास्ति। अतःयत्यदा अस्य विकारस्यामी जन्मादयः स्युः तदा तस्य तवा विद्यमान
त्वत्तस्य किं न किंचिदित्यर्थः। तस्यापि वस्तुतो न संतितस्यासत्वादित्याह। आद्यंतयोरिति असतः सर्पादिः आद्यंतयोर्यदस्ति रज्ज्वादितदेव मध्येऽपि न तु सर्पादि। तदुक्तं

ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि। सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन्॥६॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायां
तरापतति नाद्यपवर्गयोर्यत्। जन्मादयोऽस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोऽस्ति तदेव मध्ये॥७॥ ॥उद्धव उवाच॥ ज्ञानं वि
शुद्धं विपुलं यथैतत् वैराग्यविज्ञानयुतं पुराणं। आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं॥८॥ तापत्रयेणाभिहतस्य घो
रे संतप्यमानस्य भवाध्वनीश। पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात्॥९॥ ॥

टि

विकारो नास्तीत्यर्थः। यद्वा आद्यंतयोर्यदस्ति तन्मध्येऽप्यस्त्येव। न तस्य जन्मादयः संति। अतस्त्वं निर्विकारं ब्रह्मेति॥७॥ ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति। ज्ञानमिति॥
विशुद्धमितरत् ज्ञानं विपुलं निश्चितं यथा भवति तथा कथयेति। महद्भिर्ब्रह्मादिभिर्विमृग्यं॥८॥ महद्विमृग्यत्वमभिनयेनाह। तापत्रयेणाभिहतस्य अतः संतप्य
मानस्य। अंघ्रिद्वंद्वमेवातपत्रं तस्मात्। न केवलमातपात् त्राति किंतु अमृतमप्यभितो वर्षयति तस्मात्॥९॥ ॥

ननु भगवद्वचनेषां सन्दर्भविना
विमात्मानं तर्हि संसारियोग
७ कर्माविदित्वा ... नाहं

८४
८५
८६
८७

ननु भक्ति ज्ञानमवश्य ... नाहं

अतिकृपामुत्पादयन्नाह दष्टमिति। अस्मिन् बिले संसारकूपे पतितं तत्र च कालाहिना दष्टं। एवमपि क्षुद्रसुखेष्वेव उरुस्तर्षः तृष्णा यस्य तं दह्यमानः कथं समुद्धरणी
य इति चेत्तत्राह। आपवर्ग्यैः अपवर्गबोधकैः वागमृतैरासिंचेति॥१०॥ तद्विश्वासार्थं विद्वत्संवादं निरूपयिष्यन्नित्याह। इत्थमिति॥११॥१२॥ ज्ञानादिभिरुप
बृंहितान् तत्सहितानित्यर्थः॥१३॥ तत्र ज्ञानं कथयति। नवेति। प्रकृतिपुरुषमहदहंकाराः पंचतन्मात्राणि। एकादशेंद्रियाणि। पंचमहाभूतानि। त्रयोगुणाः। एत

दष्टं जनं संपतितं बिलेस्मिन् कालाहिना क्षुद्रसुखोरुतर्षं। समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव॥१०॥ ॥श्रीभगवानुवाच॥
इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं। अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वतां॥११॥ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः। श्रुत्वा धर्मान् बहून्
पश्चान्मोक्षधर्मानपृच्छत॥१२॥ तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान्। ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान्॥१३॥ नवैकाद
श पंच त्रीन् भावान् भूतेषु येन वै। ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं॥१४॥ ॥

न् भावान् अष्टाविंशति तत्वानि भूतेषु ब्रह्मादिस्थावरांतेषु अनुगतानि येन ज्ञानेनेक्षेत। अथ एषु अपि भावेषु एकं परमात्मतत्वं अनुगतं येनेक्षेत। कार्यकारणात्मकं ज
गत् पश्यन्नुपरमकारणात्मकमेवैतत्तनुतत इत्यर्थः। तिष्ठतीति येन पश्येत् तत् ज्ञानमित्यर्थः॥१४॥ ॥

ननु ज्ञानभक्त्योः पृष्टयोः धर्मकथनं मनुष्यप्राप्यमहि... वैराग्यं...

भा०पा०
८९

अंगचेष्टा लौकिकी क्रिया वचसा लौकिकेनापि मद्गुणानामीरणं कथनं ॥२२॥ मदर्थे मज्जनार्थं तद्विरोधिनोऽर्थस्य परित्यागः भोगस्य तत्साध
नस्य चंदनादेः सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः ॥२३॥ तद्भक्तिः प्रेमलक्षणा संजायते
अस्य तत्कृत्यस्य कोऽर्थः साधनरूपः साध्यरूपो वाऽवशिष्यते सर्वोपि प्राप्त एव भवतीत्यर्थः ॥२४॥ किंबहुना चित्तमेवं तत्त्वं हि त्रिविधमयानिर्थ

मदर्थेंऽगचेष्टा वचसा मद्गुणेरणं । मय्यर्पणं च मनसः सर्वकामविसर्जनं ॥२२॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥२३॥ एवं धर्मैर्मनुष्याणामुद्धवाऽत्मनिवेदिनां । मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्याऽवशि
ष्यते ॥२४॥ यदाऽत्मन्यर्पितं चित्तं शांतं सत्त्वोपबृंहितं । धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाऽभिपद्यते ॥२५॥ यदर्पितं तद्विकल्पे इंद्रि
यैः परिधावति । रजस्वलं चाऽसन्निष्ठं चित्तं विद्धि विपर्ययं ॥२६॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं । गुणेऽष्वसंगो वैरा
ग्यमैश्वर्यं चाणिमादयः ॥२७॥ ॥

पोः कारणं । तदेवाह परात्मनीति द्वाभ्यां । यदा आत्मनि मय्यपीश्वरे चित्तमर्पितं तदा पुमान् धर्मादीन् प्राप्नोत्येव ॥२५॥ एतद्व्यतिरेके साङ्गयति
यत्र यदा तच्चित्तं विकल्पो देहगृहादावर्पितं सत्परिधावति तदाऽविवेकं रजस्वलमसन्निष्ठं च भवति । ततस्तद्विपर्ययं अधर्मादिकं विद्धि ॥२६॥ ज्ञाति
प्रेतान् धर्मादीन् व्याचष्टे । धर्मो मद्भक्तिकृत । ततः स एव धर्मो नतः प्रकृष्ट उक्तः शास्त्रेषु ॥२७॥ ॥ ॥

राम
८९

धर्मादीनांमहाजनधर्मसिद्धानामन्यथाव्याख्यातत्वाद्यमादिष्वपिसंख्यातःस्वरूपतोवाकिंचिद्विलक्षणंपंस्यादितिसंभा[illegible]विनस्पात्तद्विशेषंजिज्ञासुःपृच्छतियमइतिपंचभिः
२८ इष्टं अत्यर्हितंधनंचकिं २९ परेतिविद्यादीनांविशेषणं।श्रीर्मंडनं ३० ३१ प्रश्नानुक्त्वातदर्थान्।विपरीतान्अशमादीन् ३२ यमनियमानाह।अहिंसेतित्रिभिः
अस्तेयंमनसाऽपिपरस्वाग्रहणं।आस्तिक्यंधर्मेविश्वासः।शौचंबाह्यमाभ्यंतरंचेतिद्वयं।अतएतेद्वादशनियमाः।अश्रद्धाधर्मादिः॥ ३४॥ उभयोःश्लोकयोर्यस्मृताः।तेयमा

उद्धवउवाच॥ ॥यमःकतिविधःप्रोक्तोनियमोवारिकर्शन।कःशमःकोदमःकृष्णकातितिक्षाधृतिःप्रभो॥२८॥ किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते।कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा।२९॥ पुंसःकिंस्विद्बलंश्रीमन्भगोलाभश्चकेशव।काविद्याह्रीःपराकाश्रीःकिंसुखंदुःखमेवच।३०॥कःपंडितःकश्चमूर्खःकःपंथाउत्पथश्चकः।कःस्वर्गोनरकःकःस्वित्कोबंधुरुतकिंगृहं॥३१॥कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः।एतान्प्रश्नान्ममब्रूहिविपरीतांश्चसत्पते॥३२॥ ॥श्रीभगवानुवाच॥ ॥अहिंसासत्यमस्तेयमसंगोह्रीरसंचयः।आस्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाभयं॥३३॥शौचंजपस्तपोहोमःश्रद्धातिथ्यंमदर्चनं।तीर्थाटनंपरार्थेहातुष्टिराचार्यसेवनं॥३४॥एतेयमाःसनियमाउभयोर्द्वादशस्मृताः
पुंसामुपासितास्तातयथाकामंदुहंतिहि॥३५॥ ॥

नियमाश्च।यद्वाउभयोःप्रवृत्तनिवृत्तयोःमुमुक्षोर्यमामुख्याःसकामस्यनियमामुख्याःस्मृताइत्यर्थः।अत्रहेतुमाह।हियस्मातउपासिताःसेविताःसंतःपुंसांप्रवृत्तानांनिवृत्तानांचयथाकामंकामानुसारेणमोक्षमभ्युदयंचदुहंतीति॥ ३५॥ ॥

मुमुक्षोरुपादेयान्शमादीन्हेयांश्चदुःखादीन्महाजनप्रसिद्धेभ्योविलक्षणान्नाह। शमइत्यादिनायावत्समाप्ति। शमोमन्निष्ठताबुद्धेर्नतुशांतिमात्रं। एतेनैवतद्विपरीतान्यशमादयोप्युन्नेयाः। दमइंद्रियसंयमः नचोरादिदमनं। तितिक्षाविहितदुःखस्यसंमर्षः सहनं नतुभारादेः। जिह्वोपस्थयोर्वेगधारणं धृतिः नतुउद्वेगमात्रं।३६।। दंडोभूतद्रोहः तस्यत्यागोदानं नधनार्पणं। कामत्यागः भोगोपेक्षातपः। नकृच्छ्रादि। स्वभावोवासनातस्याजयः प्रतिबंधः शौर्यं नविक्रांतिः। समंब्रह्मतस्यदर्शनमालोचनं सत्यविषयत्वात सत्यं नयथार्थभाषणमात्रं।। ३७।। अन्यत्रत्वृतंसूनृतासत्याप्रियाचवाक्। एवंचऋतसत्ययोःस्फुटएवविवेकः। कर्मस्वसंगंत्यागंव्याख्याउमाहे

शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः। तितिक्षादुःखसंमर्षोजिह्वोपस्थजयोधृतिः।। ३६।। दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतं। स्वभावविजयःशौर्यंसत्यंचसमदर्शनं।। ३७।। अन्यच्चसूनृतावाणीकविभिःपरिकीर्तिता। कर्मस्वसंगमःशौचंत्यागःसंन्यासउच्यते।। ।।३८।। धर्मइष्टंधनंनृणांयज्ञोहंभगवत्तमः। दक्षिणाज्ञानसंदेशःप्राणायामःपरंबलं।। ३९।। ।।

ततोर्थभेदेनशौचंव्याचष्टेतस्यापिमलत्यागरूपत्वेनत्यागादभेदप्रतीतेः। कर्मसुअसंगमः अनासक्तिःशौचं। त्यागस्तुसंन्यासइतितयोर्भेदइत्यर्थः।। ३८।। नृणांइष्टंधनंधर्मः। नपश्वादिसाधारणं। भगवत्तमः परमेश्वरोहमेवयज्ञः मतभ्यर्चायज्ञो अविष्टः नक्रियाभुद्धेत्यर्थः। यत्तार्थंदानंदक्षिणासावज्ञानोपदेशः नहिरण्यादिदानं। तेनहियज्ञरूपोविष्णुःप्राप्यते इदमेनंवलं। तन्मनोदमनहेतुत्वातप्राणायामइति।। ३९।। ।।

भावं व्याचिख्यासुः प्रथमं भगं ततो लाभं दैन्यावष्टम्भौ लोके तयोर्भेदप्रसिद्धेः भगो भावं तत्त्वमेव ऐश्वरो भावो मदीयं ऐश्वर्यादिषाड्गुण्यमित्यर्थः। उत्तमो लाभो मद्भक्तिः। न पुत्रादिः। विद्या आत्मनि भिदाबाधः आत्मनिष्ठं वा तस्य भेदस्य बाधः न ज्ञानमात्रं। अकर्मसु जुगुप्सा ह्रीः न लज्जामात्रं ॥४०॥ गुणा एव श्रीर्मंडनं। न किरीटादि। दुःखसुखयोरत्ययः। अतिक्रमः। अनन्तसुखं न भोगः। विषयभोगापेक्षैव दुःखं नाग्निदाहादि। बंधमोक्षं यो वेत्ति स पंडितः। न विद्यामात्रं ॥४१॥ अहंबुद्धिरित्युपलक्षणं। देहगे

भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः। विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ॥४०॥ श्रीर्गुणा नैरपेक्ष्याद्याः
सुखं दुःखसुखात्ययः। दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ॥४१॥ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृ
तः। उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ॥४२॥ ॥

हादिषु अहं ममेति मानवान् मूर्ख इत्यर्थः। मन्निगमो मां नितरां गमयति प्रापयतीति निवृत्तिमार्गः सत्पंथा न सन्मार्गः। न कंटकादिशून्यः। चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः। न तु चोराद्याकुलः। सत्त्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ॥४२॥ ॥

तमसउन्नाहउडेकः सनरकः न्नतामिश्रादिः। यरूरेवबंधुर्नश्राचादिः सवाहमेवायथाहंजगद्गुरूः।एकएवपरोबंधुर्विषमेसमुपस्थिते। गुरुःसकलधर्मात्मा यत्रा किंचनगो
हरिरिति। ससाधर्नलोगापततंगृहं। तद्वा।ऽनुग्धंमानुषरूपंशरीरमेवनहमर्दादि। गुणैःसंपन्न आड्यउच्यते। नधनी॥४३॥ असंतुष्टोयःसदरिद्रः ननिस्वः। योऽजितेंद्रियः
सकृपणः। शोच्यः नदीनः। विषयेष्वनासक्तधीर्यःसईशः स्वतंत्रः नराजादिः। गुणसंगः गुणेषुसंगोयस्यसः विपर्ययः अनीशः। एतद्वशमादिविपर्ययोपलक्षणार्थं॥४४॥

ढ्यो ह्या ढ्प

नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे। गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यंउच्यते॥४३॥ दरिद्रोयस्त्वसंतुष्टः कृपणोयोऽजितेंद्रियः। गुणे
ष्वसक्तधीरीशोगुणसंगोविपर्ययः॥४४॥ एतउद्धवतेप्रश्नाः सर्वेसाधुनिरूपिताः। किंवर्णितेनबहुनालक्षणंगुणदोषयोः॥४५॥ गु
णदोषदृशिर्दोषोगुणस्तूभयवर्जितः॥४६॥ ॥इतिश्रीभागवतेएकादशस्कंधेएकोनविंशः॥ ॥

उपसंहरति। एतइति। साधुमोक्षोपयोगितया। एतत्रसर्वगुणदोषयोर्विवेकायोद्धवेनपृष्टमितितयोःसंक्षेपतोलक्षणमाह। किंबहुनावर्णितेन। गुणदोषयोर्लक्षण
मेतावदेव। गुणदोषयोर्दृशिर्दर्शनंदोषः गुणस्तदुभयदर्शनवर्जितः स्वतावद्भूति॥४५॥ ॥

विंशेयोगत्रयंप्रोक्तंलक्षितानांक्रियातत्कं। गुणदोषव्यवस्थार्थमधिकारिविलासतः। गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितइत्युक्तंतदाक्षिपति। विधिश्चेतिपंचभिः। वि
धिश्चप्रतिषेधश्चेश्वरस्यतवनिगमश्रुतारूपो वेदः। सचविधेयानांप्रतिषेध्यानांचकर्मणांगुणदोषंचपुण्यपापफलरूपमवेक्षते॥ १॥ उत्तमाधमभावेनतदधिका
रिणांवर्णानामाश्रमाणांविकल्पंभेदंचगुणदोषरूपमवेक्षते। प्रतिलोमानुलोमजंचगुणदोषंतथैवावेक्षते। प्रतिलोमजाः। उत्तमवर्णास्त्रीषुहीनवर्णेभ्यःप्र

उद्धवउवाच॥ ॥ विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते। अवेक्षते ऽरविंदाक्ष गुणंदोषंचकर्मणां॥ १॥ वर्णाश्रम
विकल्पंचप्रतिलोमानुलोमजं॥ द्रव्यदेशवयःकालान्स्वर्गंनरकमेवच॥ २॥ ॥

रूपेभ्योजाताःसूतवैदेहकादयः। अनुलोमजाउत्तमवर्णेभ्यःपुरुषेभ्योहीनवर्णास्त्रीषुजाताःमूर्द्धावसिक्तांबष्ठादयः तेषांच। असत्संतप्रभवित्वेयाःप्रतिलोमानुलोम
जाइतिगुणदोषो। इत्यादीन्। कर्मर्हितास्यांस्वर्गंनरकंचतत्फलतयागुणदोषरूपमेव ...क्षतेएतच्चोन्नराध्यायेप्रपंचयिष्यते॥ २॥ ॥

नहिता १

तथापि प्रकृतो किमायातं अत आह। गुणादोषेति। गुणदोषदृशिर्दोष इति निराकृतत्वात् गुणादोषप्रलिदादृष्टिमंतरेण तां विना निषेधविधिलक्षणां कर्मकांडं तद्वचनक
थं तद्वचोंतरेण च्याणां निःश्रेयसं कथं स्यात्। तत्रापि श्रेयो नयो मंतव्य इत्यादि साधनविधेः। नातुष्यायाद्वहूंछद्दा चावो विश्वापनं हितदिति निषेधस्यावावश्यकत्वादितिल
यः। यद्वा गुणादोषप्रलिदादृष्टिमंतरेण निषेधविधिलक्षणां तद्वचो विनेति सामान्याधिकरण्यमेवाक्ता। यद्वा गुणादोषप्रलिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः
कथं त्वत्तत्वमस्यादिवाक्यवत् निःश्रेयसमत्तपरं स्यात् सर्वस्य वेदस्य तत्परत्वां गीकौरिर्त्यः॥ ३॥ ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्टा मनुष्यस्य कथयिष्यंतिने

रा

गुणदोषप्रलिदादृष्टिमंतरेण वचस्तव। निःश्रेयसं कथं नृणां निषेधविधिलक्षणां॥ ३॥ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर।
श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि॥ ४॥ गुणादोषप्रलिदादृष्टिर्निगमात्ते न हि स्वतः। निगमेनापवादश्च प्रलिदाया इति ह भ्रमः॥ ५॥

माह। पित्रादीनां सर्वेषां तव त्वद्वाक्यरूपो वेद एव तु श्रेयः श्रेष्ठं चक्षुः प्रमापकं। क्व अनुपलब्धेऽर्थे मोक्षे स्वर्गादौ च। तथा साध्यसाधनयोः इदमस्य साध्यं इदमस्य साध
नमित्यत्रापि। तदेवं गुणदोषदृष्ट्या वेते निःश्रेयसं न घटते॥ ४॥ किंच शास्त्रेणैव विहितां लेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्याह। ते निगमात् त्वद्वाक्ता
रूपाद्वेदादेव न हि स्वतः यस्मादर्थप्राप्तत्वेन निवर्तेत। ह स्फुटं भ्रमो भवति तां निवर्तयतीति॥ ५॥ ॥

६ए

विषयालेसेभ्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह। योगा इति। योगा उपायाः ब्रह्मकर्मदेवताकाण्डैः प्रोक्ताः कर्मवनिष्ठा मंत्रश्रेयोविधित्सया मोक्षसाधने च्छया। अन्य उपायो नास्तीति। काम्यकर्मादिकं त्वानर्थ्ययति। तथा वो नराध्याये स्फुटीकरिष्यति। यएता निर्त्यादिना॥६॥ तेष्वधिकारिभेदमाह। निर्विण्णानामिति द्वाभ्यां। इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुध्या तत्फलेषु विरक्तानां अत एव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्यनुवर्त्तनेनान्वयः। अनिर्विण्णवि

श्रीभगवानुवाच॥ ॥योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥६॥ निर्विण्णा-
नां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां॥७॥ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥८॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जा-
यते॥९॥

ण्णानां दुःखबुद्धिशून्यानां। अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः॥७॥ यदृच्छया केनापि भाग्योदयेन। तत्र। काम्यकर्मसु प्रवर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति। निष्कामकर्मयोगाधिकारिणश्च यथाशक्ति। सर्वज्ञानभक्तियोगाधिकारात्पूर्वमेव। तदधिकृतयोश्च स्वल्पः। तावतां सिद्धानां तु न किंचिदिति॥८॥ सावधिं कर्मयोगमाह। तावदिति नवभिः। कर्माणि नित्यनैमित्तिकानि यावता यावत॥९॥ ॥

कर्मयोगिनो ज्ञानलक्षिभूमिकारोहप्रकारमाह। स्वधर्मस्थ इति। अनाशीःकामः अफलकामः। अन्यत् निषिद्धं नरकयातनाहेतुं चेद् [?] वा। विहितातिक्रमाद्वा। निषिद्धाचरणाद्वा। अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति। अफलकामत्वान्न स्वर्गमपीत्यर्थः॥१०॥ किंच। अस्मिंल्लोके अस्मिन्नेव देहे। अनघः निषिद्धत्यागी। अतः शुचिः निवृत्तरागादिमलः। यदृच्छयेति केवलज्ञानादपि लक्षेर्दुर्लभतां द्योतयति॥११॥ अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति। स्वर्गिण इति। निरयिणो नारकाः। अतस्तयोः साधकं यतो ज्ञानभक्तिभ्यां साधकम्। स्वर्गनरकदेहद्वयं तु तदसाधकमित्यर्थः॥

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव। न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्॥१०॥ अस्मिंल्लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया॥११॥ स्वर्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा। साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम्॥१२॥ न नरः स्वर्गतिं काङ्क्षेन्नारकीं वा विचक्षणः। नेमं लोकं च काङ्क्षेत देहावेशात्प्रमाद्यति॥१३॥ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः। अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदम्॥१४॥ ॥

रपि। इति दृष्टान्तेनेमं लोकं ज्ञानभक्तिसाधनत्वेन स्तुतम्। ज्ञानभक्त्योः तदुभयं स्वर्गिनारकिशरीरं। अतो नरः स्वर्गतिं न काङ्क्षेत नारकीमिति दृष्टान्तः। यद्वा स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः। अस्यातिश्रेष्ठत्वात् उत्तरोत्तरमपि मनुष्यो लब्ध्वेयमित्यपि न काङ्क्षेत। यतो देहावेशात् तद्देहासक्त्या स्वार्थे प्रमाद्यति अनवधानः स्यात्। ततो नश्यत्येव भवति॥१३॥ अपि तु एतद्देहं साधकमिति विद्वान् तत्र अर्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनलसः सन् मृत्योः पूर्वमेवाभवाय घटेत तत्र यत्नं कुर्यादिति॥१४॥ ॥

अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टांतः । छिद्यमानमिति । यमैः कालवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिन् तं स्वकेतं स्वस्याश्रयं । अलंपटः अनासक्तः ॥१५॥ दार्ष्टांतिकमाह । अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा तन्नाशभयेन वेपथुः कंपो यस्य सः ॥१६॥ एवम् अप्रयतमानं प्रमत्तं निंदति । नृदेहं प्लवं नावं प्राप्य यः भवाब्धिं न तरेत्स आत्महा । तत्र हेतवः । आद्यं सर्वफलानां मूलं । यत्तदुपार्जितकर्मभिः सर्वप्राप्तेः । किंच । सुदुर्लभं तं उद्यमकोटिभिरपि प्राप्तुमशक्यं । तथापि सुलभं यदृच्छयोपलब्धत्वात् । तं च सुकल्पं पटुतरं । किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं । मया वस्तुतमात्रेणानुकूलमारुते-

छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं । खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः ॥१५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः । मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति ॥१६॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं । मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा ॥१७॥ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः । अभ्यासेनात्मनो योगी धारयेदचलं मनः ॥१८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं । अतंद्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् ॥१९॥ ॥

नभ्रेरितं ॥१७॥ एवं तावदविरक्तस्य वैराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किं विलक्षणं वर्णनीयं चाह सार्द्धैस्त्रिभिः । यदा तु आरंभेषु कर्मसु निर्विण्णः दुःखदर्शिनो हि यतः तत्फलेषु विरक्तश्च । तदा संयतेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयं हि मनस्तथाचलं यथा भवति तथा मनो धारयेत् ॥१८॥ तत्र प्रथममेवात्यंत धारणासंभवात् तत्तद्भावानुसारेणाह । यर्हि आशु भ्राम्यत् तत्परिभ्रमत् अनवस्थितं भवति तदा अनुरोधेन किंचिदपेक्षाप्रदानद्वारेण १९

ननु तर्हि यथापूर्वमिव स्यात् तत्राह। मनोगतिंन विसृजेत नोपेक्षेत किंतु अप्रमत्तः सन्नवलम्बयेदित्यर्थः॥२०॥ अनुरोधमार्गं सदृष्टान्तमाह तोति॥ एषएव अनुवृत्तिमार्गो णामनसः संग्रहः परमो योगः तत्साधनत्वात् उपचारेणोक्तिः। यथा अदान्तस्य दमनीयस्य अर्वतः अश्वस्य हृदयज्ञत्वं चित्ताभिप्रायेण गतिमन्विच्छन् अपेक्षमा णः अश्वधारकः प्रथमं किंचित्तिज्ञतिमनुवर्त्तते ततः वरश्मिना तं धृत्वैव गच्छति न रूपेक्षते तद्वदित्यर्थः॥२१॥ एवमीषद्वशीकृतस्य मनसो यत्नेन निश्चलोपाया

मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः। सत्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत्॥२०॥ एष वै परमो योगो मनसः संग्रहः स्मृतः। हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः॥२१॥ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः। भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति॥२२॥ निर्विण्णस्य विरिक्तस्य पुरुषस्योक्तवेदिनः। मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया॥२३॥ ॥

नाह। सांख्येनेति त्रिभिः। सांख्येन तत्वविवेकेन सर्वभावानां महदादिदेहांतानां। अनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्ययं च अनुध्यायेत्। प्रसीदति निश्चलं भवति॥२२॥ ततश्च आगमापायिषु तेषु वैभिन्नतात्मदर्शनात् तद्विवेकात् अत्र संसारे निर्विण्णस्य अतो विरक्तस्य ततश्च उक्तवेदितः गुरूपदिष्ट थलोवकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति॥२३॥ ॥ ॥

किंच यमादिभिर्योगमार्गैः। आन्वीक्षिक्या पदार्थद्वयशोधनेन। ममार्चनध्यानादिभिर्वा। वाशब्देनास्य पक्षान्तरपक्षस्य मुख्यत्वं दर्शयति। एतैरुपायैर्योग्यं परमात्मा-
नं मनः स्मरेत्। नान्यैः। अतोऽन्यं न कुर्यादित्यर्थः॥२४॥ ननु पापापनोदाय प्रायश्चित्तं कार्यमेव तत्राह। यदीति। योगेन ज्ञानाभ्यासेनैव। एतच्च लक्षणस्यापि नामसंकीर्तना-
द्युपलक्षणार्थं। नान्यत्कृच्छ्रादि॥२५॥ ननु नित्यनैमित्तिकं कर्म सत्वशोधकत्वाद्गुणः। हिंसादिकं चाशुद्धिहेतुत्वाद्दोषः। तच्च वर्तमाननिवर्तकत्वात्कृच्छ्रादिप्राय-
श्चित्तं गुण इति विधिप्रतिषेधात्त्यागे कृते त्यागात्प्रायश्चित्तं विना योगेनैव कथं पापं दहेत्। तत्राह। स्वे स्व इति सार्द्धेन। स एव गुणो नेतरः। तदुपपादयति। यस्माद्वि-

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया। ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः॥२४॥ यदि कुर्यात्प्रमादेन योगी कर्म
८९ विगर्हितं। योगेनैव दहेदंहो नान्यत्तत्र कदाचन॥२५॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। कर्मणां जात्यशुद्धानामनेन नि-
यमः कृतः। गुणदोषविधानेन संगानां त्याजनेच्छया॥२६॥ ॥

विधिप्रतिषेधात्त्याज्यमनेन गुणदोषदृष्टिविधानेन कर्मणां नियमः संकोचः कृतः। कुत इत्यत आह। जात्या उत्पत्त्यैवाऽशुद्धानां सदोषाणां त्याजनेच्छया। अ-
यं भावः। शुद्धस्याशुद्धिर्नाम न प्रवृत्तेरन्यापि स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात्। न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते अतः इदं न कर्तव्यं इदमेव क-
र्तव्यमिति स्वाभाविकप्रसिद्धप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते। यथा वनप्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः। उत्पन्नेऽपि हि कामे धैर्यादिना। अतो योगिनः
स्वाभाविकप्रवृत्तेरभावान्न प्रायश्चित्तादिविधिगोचरतेति॥२६॥

३

भक्त्याधिकारिणो भक्तियोगमाह। जातश्रद्ध इति त्रिभिः। मत्कथासु जातश्रद्धः। अत एवान्येषु कर्मसु उद्विग्नः। न तु तत्फलेषु विरक्तः। तदा ह वेदेति। यद्यपि वेद तथापि तत्परित्यागे अनीश्वरः। अशक्तः॥२७॥ एवंभूतो यः स श्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् तत ततः तदनंतरं मां प्रीत्या भजेत। विषयांश्च सेवमानोपि तेषु प्रीतिं न कुर्यादित्याह। गर्हयन्निति॥२८॥ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां। श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्ति

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु॥ वेद दुःखात्मकान् कामान् परित्यागेप्यनीश्वरः॥२७॥ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः॥ जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन्॥२८॥ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः॥ कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते॥२९॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि मयि दृष्टेखिलात्मनि॥३०॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥३१॥ ॥ ॥

नमित्यादिना। तत्र तत्रोक्तेन मामसकृत्तु नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यंति॥२९॥ हृदयमेव ग्रंथिरहंकारः तत्पूर्वकाश्च सर्वे संशयाः असंभावनादयः। कर्माणि अनारब्धफलानि संसारहेतुभूतानि। तदेवं अवस्थात्रयाधिकारत्रयमुक्तं॥३०॥ तत्र चरमे क्रमे त्वन्यनिरपेक्षत्वादन्यस्य च तत्साधनत्वेनोपेत्य भक्तियोगं श्रेष्ठ्यमुपसंहरति। तस्मादिति त्रिभिः। मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयःसाधनं॥३१॥ ॥ ॥ ॥

तत्र हेतुः। यत्कर्मभिरित्यादि। इतरैरपि तीर्थयात्राव्रतादिभिः। श्रेयःसाधनैर्यद्यज्ज्ञाप्यं मद्भक्तस्याद्यादि तत्सर्वं अञ्जसा अनायासेनैव स्वर्गमपवर्गं मद्धाम वैकुण्ठं लभ
त एव। वांछा तु नास्तीत्युक्तं यदि वांछतीति। तत्र हेतुमाह। न किंचिदिति। धीराः धीमंतः। यतो मम एकांतिनः अपवर्गादीनि भक्ताः। अतो मया दत्तमपि न गृह्णंति किंचि
त्कथं न वांछंतीत्यर्थः। अपुनर्भवं आत्यंतिकमपि कैवल्यं। तदुपपादयति।।३४।। निरपेक्ष्यमेव परं उत्कृष्टं। अनल्पकं महत् निःश्रेयसं फलं तस्माद्भवं
त्प्राहुः। भक्तिः निराशिषः प्रार्थनाशून्यस्य। निरपेक्षस्य प्रार्थनाकारणभूतापेक्षारहितस्य च सो भवेत्। यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदि

प

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। योगेन दानधर्मेण श्रेयोभिरितरैरपि।।३२।। सर्वं मद्भक्तियोगेन मद्भक्तो लभतेञ्जसा। स्वर्गापवर्गं मद्धा
म कथंचिद्यदि वांछति।।३३।। न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम। वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं।।३४।। नैरपेक्ष्यं परं प्राहुर्निःश्रेय
समनल्पकं। तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत्।।३५।। न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः। साधूनां समचित्तानां बुद्धेः परमुपेयुषां
।।३६।। एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः। क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः।।३७।। ।।इति श्रीभागवते एकादशस्कंधे विंशतितमोध्यायः।।

त्यर्थः। अनेन च प्रकारेण सिद्धानां न गुणदोषा इति। विरोधपरिहारस्तूपसंहरति।।३५।। न मयीति। गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पापादयः। साधूनां
निरस्तरागादीनां। अतः समचित्तानां अत एव बुद्धेः परमीश्वरं प्राप्तानां।।३६।। काम्यकर्माणि च षां निरिद्धेनैतान्भक्तिमार्गानुपसंहरति। एवमिति। मे पथः मत्प्रा
प्त्युपायान्ये अनुतिष्ठंति ते क्षेमं कालमायादिरहितं मल्लोकं विंदंति। यत्परमं ब्रह्मतत्त्वं विदुः।।३७।। ।।एकादशे विंशतितमोध्यायः।। ।। ।।

भा.ए०
९६

जयति श्रीपरानंदनृसिंहनरकेसरी। यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती। ईद्वितां मिछया संतः क्षमंतां मम साहसं। मया हि स्वीयबोधाय कृतमेतन्न सर्वतः
एकविंशे क्रियाज्ञानकिंचिद्गुणदोषो साधकानां तु प्रथमतो निवृत्तकर्मलक्षिघनचिकारिणां। कामिनां दुष्टदेशादिगुणदोषाः प्रपंचिताः। तदेवं गुणदोष
व्यवस्थार्थं योगत्रयमुक्तं। तत्र च ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ। साधकानां तु प्रथमतो निवृत्तकर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म्म स्व
शोधकत्वाद्गुणः। तदकरणं निषिद्धकरणं च तन्मलीमसकरणत्वाद्दोषः। तन्निवर्त्तकत्वात्प्रायश्चित्तं गुणः। विशुद्धसत्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास

श्रीभगवानुवाच॥ ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंति ते॥१॥ स्वे स्वेऽधिकारे
या निष्ठा स गुणः परिकीर्त्तितः। विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः॥२॥ ॥ ॥

श्र

एवं सिद्धिहेतुत्वाद्गुणः। भक्तिनिष्ठानां पुनः श्रवणकीर्त्तनादिभक्तिरेव गुणः। तद्विरुद्धं सर्व्वमुत्तरयेषां दोष इत्युक्तं। इदानीं ये तु न सिद्धा नापि साधकाः
किंतु केवलं काम्यकर्माधीनाः तेषां सकलगुणदोषान्प्रपंचयिष्यन् आदौ तानतिवहिर्मुखान्निंदति य एतानिति। मत्पथः मद्प्राप्तिमार्गान्। क्षुद्रान् क्षुद्रान्कामांश्च
लैः अस्थिरैः प्राणैर्देहवायुत्तिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति। निखिलगुणदोषभाक्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः। ननु तैरेव कर्मभिः केचि
द्गुणदोषतां जनः केचित्त्रातिकुतो वैषम्यं। न ह्यग्निना केचिन्न दह्यंते केचिन्नेति संभवति। तत्राह स्वे स्व इति। अधिकारभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठाविति
भावः॥२॥ ॥

राम
९६

तदाह। शुद्ध्यशुद्धी इति। विविक्तित्सार्थं योग्यमयोग्यं चेति संदेहद्वाराद्वा। ला विकल्पप्रवृत्तिप्रतिबंधार्थमित्यर्थः। तत्र शुद्धी योग्यत्वायोग्यत्वे। गुणदोषौ तन्निमित्तौ पा-
देयत्वानुपादेयत्वे। शुभाशुभौ तन्निमित्तावर्थानर्थौ।३। तत्र शुद्ध्यशुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्म्म इति। गुणदोषौ व्यवहारार्थं अशुद्धा वपि राजादीनां व्यव-
हारदर्शनादुपादेयं नान्यदिति। शुभाशुभौ यात्रार्थं दोषत्वे व्यापन्नशरीरनिर्वाहमात्रोपदाने। न पापं अधिकोपादाने तु पापमिति। मया मन्वादिरूपेण धर्म्मन्नू

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु। द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ॥३॥ धर्मार्थं व्यवहारार्थं यात्रार्थमिति चान-
घ॥ दर्शितोऽयं मयाचारो धर्म्ममुद्वहतां धुरं॥४॥ भूम्यंब्वग्न्यनिलाकाशा भूतानां पंच धातवः। आब्रह्मस्थावरादीनां शारीरा आत्मसं-
युताः॥५॥ वेदेन नामरूपाणि विषमाणि समेष्वपि। धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये॥६॥ ॥ ॥

धु२

पां धुरं भारं कर्म्मजडानामित्यर्थः॥४॥ शुद्ध्यशुद्धी प्रपंचयिष्यन् वेदोक्तत्वेन तदालिनिवेशो मा भूदिति समानेष्वपि वस्तुष्विति यदुक्तं तत्प्रपंचयति। भूमीति
त्रिभिः। भूतानां प्राणिनां। धारयंतीति धातवः कारणानि। शारीरा शरीरकाः। देहतः साम्यमुक्तं। जीवतोऽप्याह। आत्मसंयुता इति॥५॥ धातुषु देहेषु। नामरू-
पाणि वर्णाश्रमादीनि। कल्पनायाः प्रयोजनमाह। एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये॥६॥ ॥

भा०पु० ८७

नकेवलंदेहैषैवअपितुदेशकालादिलावानामपि।आदिशब्देनानुपादेयानांफलनिमित्ताधिकारिणांग्रहणं।वस्तूनांउपादेयानांव्रीह्यादीनामपि ममभया।।नियमार्थसंकोचार्थमित्यर्थः।।७।।एवंगुणदोषौपरिशोध्यतयोःशुद्ध्यशुद्धिमूलत्वात्शुद्ध्यशुद्धीप्रपंचयति।अकृष्णसारइत्यष्टभिः।देशा नामध्येकृष्णहरिणरहितोऽशुचिः।तत्रापिअब्रह्मण्यःब्राह्मणभक्तिशून्योयंतंतमशुचिःकृष्णसारोपिकृष्णेनम्रगेणसारःश्रेष्ठोयःसोऽपि।असौवीरः कीकटः।सुवीराःसत्पुरुषाःतद्वान्सौवीरःकीकटोपिअशुचिः।तदुक्तं।सर्वेपुण्यतमोदेशःसत्पात्रंयत्रलभ्यतइति।तद्वर्जितोपिकीकटःअंगवंगकलिं

देशकालादिभावानांवस्तूनांममसत्तम।गुणदोषौविधीयेतेनियमार्थहिकर्म्मणां।।७।।अकृष्णसारोदेशानामब्रह्मण्योऽ शुचिर्भवेत।कृष्णसारोप्यसौवीरःकीकटोसंस्कृतेरिणं।।८।।कर्म्मण्योगुणवान्कालोद्रव्यतःस्वतएववा।यतोनिवर्त्ततेकर्म्मसदो षोकर्म्मकःस्मृतः।।९।। ।।

गादिः।असंस्कृतःसंमार्जनादिरहितःम्लेच्छबहुलोवाइरिणंऊषरंएकवद्भावःततश्चअशुचि।तदन्यःशुचिरित्यर्थःउक्तंभवति।।८।।कालस्यशुध्यशुद्धी दर्शयति।कर्म्मण्यइति।द्रव्यतःद्रव्यसम्पत्त्यास्वतोवापूर्वाह्णादिरित्यर्थःकर्माहःसकालःस्मिन्कर्म्मणिगुणवान्।यतःयस्मिन्द्रव्यालाभेनवाराहुविप्लवा दिनावाकर्मनिवर्त्तते।यथासूतकादौदशाहादिलक्षणेऽकर्मकःकर्मानर्हःस्मृतःसकालोदोषःअशुद्धइत्यर्थः।।९।। ।। ।।

राम ८७

वक्ष्यशब्दोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति। द्रव्यस्येति। वत्सलिंद्रव्येणैतेनाग्न्यादिना शुद्धिः। मूत्रादिना त्वशुद्धिः। वचनेन शुद्धमशुद्धं चेति संदेहे शुद्धमित्येवं रूपेण ब्राह्मणवचनेन शुद्धिः। विपरीतेनाशुद्धिः। संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः। अवघ्राणादिना त्वशुद्धिः। काले नकाले मोघोदकं ग्राह्यं वर्ज्यं तु ग्रहमेव हि। अकाले दशरात्रं स्पातनतः शुद्धिर्विधीयते। दशाहादिना नवोदकालेऽशुद्धिः। विपरीतेनाशुद्धिः। पर्युषिताम्भादेर शुद्धिः। अंत्यजाद्युपहतानां तडागोदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी॥ १०॥ शक्त्या सूर्योपरागादिमृतकाशौचादेः शक्तस्य त्वशुद्धिः। अशक्तानुप्रति शुद्धिर्बुद्ध्या पुत्रजन्मादौ दशाहाद्बहिर्ज्ञानेन शुद्धिः। समृद्ध्या जीर्णमलवद्वस्त्रादेः समृद्धं प्रत्यशुद्धिः। द

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येणैव वचनेन च॥ संस्कारेणाथ कालेन महत्त्वाल्पतयाथवा॥ १०॥ शक्त्याशक्त्याथवा बुद्ध्या समृद्ध्या च यदात्मनो। अर्घ्यं कुर्वीति हि यथा देशावस्थानुसारतः॥ ११॥ ॥ श्री॥ ॥

रिद्रं प्रति शुद्धिः। तत्रापि विशेषमाह। यदिति। एते चद्रव्यवचनादयो द्रव्याशुद्धिद्वारा आत्मने यदर्घ्यं कुर्वंतीति तद्देशावस्थानुसारत एव यथायथावत् कुर्वंति। न सर्वतः। तथाहि निर्जलप्रदेशे कुर्वंति न तथा राष्ट्राकुलोत्पातरोगादियुतिरिक्तयुवाद्यवस्थायामेव कुर्वंति न बाल्यरोगाद्यवस्थायामिति। तथा च स्मृतिः। देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। इति॥ ११॥ ॥ विश्वनाथाय नमः॥ ॥ ॥

स्नानादिना

या०प्र०
याज्ञिना
५८

इत्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादिभिः शुद्धिरेकरूपैवाद्रव्यतत्फक्तशुद्धिर्वहुरूपेति तां प्रपंचयति द्वाभ्यां लौकिकं यद्द्रव्यं मस्मादिवा अस्थिमज्जदंतादि रसा घृतादयः तैजसाः सुवर्णादयः प्रोक्षर्षां पार्थिवानां चरस्थादि कर्दमेष्टकादीनां यथायथं कालादिभिः शुद्धिः तत्रापि कांत्यजाद्युपहततारतम्येन देशकालावस्थाद्यनुसारेणावृत्तैरन्यैश्च युतापृथङ्निर्दिष्टैः केवलैश्च। कालस्य पुनर्ग्रहणं युतत्वप्रदर्शनार्थं॥१२॥ अस्पृश्यस्पर्शेऽशुद्धिमुक्त्वा लेपविषये त्वाह। यत्पीठपात्रवस्त्रादि येन तद्धरणाद्वाराम्भोदका

धान्यदार्वस्थितंतूनां रसतैजसचर्मणां। कालवाय्वग्निरश्म्यन्तोयैः पार्थिवानां युतायुतैः॥१२॥ अमेध्यलिप्तं यद्येन गंधलेपं व्यपोह ति। तज्जते प्रकृतिं तस्य तच्छौचं तावदिष्यते॥१३॥ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः। मतस्मृत्या वा गमतः शौचं शुद्धः कर्म चरेद्द्विजः॥ ॥

राम
५८

द्भिर्गंधं च लेपं च व्यपोहति त्यजति त्यागं तं च मलं त्यक्त्वा प्रकृतिं स्वमेव रूपं लजते। तस्यतत्शौचं शोधकं यावता वत्तद्वर्णादिना व्यपोहतितावत्प्रमाणं च रूपतः आहृत्ति र्वा तत्कर्तव्यमिष्यते॥१३॥ एवं तावद्द्रव्यशुद्धिरुक्ता। इदानीं कर्तृशुद्धिमाह। स्नानेति। अवस्था कौमारादिः वीर्यं शक्तिः। संस्कार उपनयनादिः। कर्म संध्योपासनादि ल क्षणं। आत्मनः साहंकारस्य कर्तृः एतैः स्नानादिभिर्यथायथं तत्कार्यानुसारिणी शुद्धिः इयं च शुद्धिर्न व्यवहारार्था किंतु विहितकर्मार्थेत्याह। शुद्ध इति। द्विज इत्युपलक्षणं शूद्रादिरपि॥१४॥ ॥

मंत्रशुद्धिमाह। मंत्रस्य सुखावाप्यायावत्परिज्ञानं मंत्रस्य शुद्धिः। कर्मशुद्धिमाह। ईश्वरार्पणं कर्मणः शुद्धिः। धर्मचिर्थं शुद्ध्या शुद्धीप्रपंचंतः प्रदर्शयोपसंहरति। धर्म इति। देश
कालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते। एतेषां योविपर्ययः सोऽधर्मः तद्धेतुरित्यर्थः।१५। अयं च गुणदोषविभागो नातास्वइत्याह। क्वचिदिति। आपदि प्र
तिग्रहो गुणोऽथनापदि निषिद्धत्वाद्दोषः परधर्मश्च परस्य गुणोऽपि स्वस्य दोषः दोषोऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषः। अपि तु विधिबलेन गुणः। एवं च योऽयं गुणदोष
योरेकस्मिन्नेवार्थे नियमः। गुणदोषार्थवायो नियमः नियामकं शास्त्रं स तयोर्भेदमेव वाधते॥ १६॥ दोषस्य क्वचित्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति। समा

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं। धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः॥ १५॥ क्वचित् गुणोऽपि दोषः
स्याद्दोषोऽपि विधिना गुणः। गुणदोषार्थनियमस्तद्भिदामेव वाधते॥ १६॥ समानकर्माचरणं पतितानां न पातकं। औत्प
त्तिको गुणः संगो न शयानः पतत्यधः॥ ॥ १७॥ ॥

नस्य तस्यैव कर्मणः सुरापाणादेराचरणं अपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुनः पातकं अधिकारभ्रंशकं न भवति पूर्वमेव पतितत्वात्। अतोऽत्र दो
षस्यापि दोषता नास्तीत्यर्थः। तथा संगोऽपि योयते देषिः सत्यहस्थस्यौत्पत्तिकः पूर्वं स्वीकृतो न दोषः अपि तु गुणः अतो सार्यस्तु पेयादिति विधानात्। तुलयदृष्टांतः पूर्वमिवाधः
शयानो यथा न पततीति॥ १७॥ ॥

भा०ए०
९९

गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्युपलिप्सेत्याह। यतो यत इति। १८ यथा श्रुतस्य प्रवृत्तिपरतां वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति वि
षयेष्विति चतुर्भिः। संगः आसक्तिः। तत्र तेषु विषयेषु येन प्रतिहन्यते कामः तेन सह कामादेव कलिः कलहो विवादः। १९। दुर्विषहः तीव्रः तमः संमोहः। तं क्रोधं। चेतना कार्याकार्य
स्मृतिः द्रुतं शीघ्रं॥२०॥ शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः। स्वार्थविभ्रंशः पुरुषार्थहानिः। मूर्छितस्य मृततुल्यस्य। २१। तत्तुल्यत्वं प्रपंचयति। विषयेति। व्यर्थं वृक्षजीविक

यतो यतो निवर्त्तेत विमुच्येत ततस्ततः। स्वधर्मो नृणां क्षेमः शोकमोहभयापहः॥१८॥ विषयेषु गुणाध्यासात्पुंसः संगस्ततो भवेत्।
संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां। १९॥ कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्त्तते। तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतं।२०॥
तया विरहितः साधो जंतुः शून्याय कल्पते। ततोस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च।२१॥ विषयाभिनिवेशेन नात्मानं वेद नापरं। वृक्षजी
विकया जीवन्व्यर्थं भस्त्रेव निःश्वसन्॥२२॥ फलश्रुतिरियं नृणां न श्रेयो रोचनं परं। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनं॥ २३॥ ॥

राम
९९

येव यो जीवन्वर्त्तते स मूर्छिततुल्यः। अत एव यो भस्त्रेव श्वसन्वर्त्तते स मृततुल्यः। अतः स्वार्थनाश इत्यर्थः॥२२॥ ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात् कुतः स्वार्थविभ्रंशः। तत्रा
ह। इयं फलश्रुतिः न श्रेयः परमपुरुषार्थपरा न भवतीत्यर्थः। किंतु बहिर्मुखानां नृणां मोक्षविवक्षया अवांतरफलैः कर्मसु रुच्युत्पादनमात्रं। यथा भैषज्ये औषधे रोचनं रु
च्युत्पादनं। तथाहि। पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान्। पित्रैवमुक्तः पिबति न फलं तावदेव तु॥ ॥२३॥ ॥ ॥

नतुकर्मकांडेमोक्षस्यनामापिनश्रूयते।कुतएवंव्याख्यायते।यथाश्रुतस्याघटनादित्याह।उत्पत्त्यैवेतिद्वाभ्यां।उत्पत्त्यास्वभावतएवकामेषुपश्वादिषुप्राणेषुआयुरिंद्रिय
बलवीर्यादिषुस्वजनेषुपुत्रादिषु।अनर्थहेतुषुपरिपाकतोदुःखहेतुषु।२४।अतस्तान्स्वार्थपरमसुखमविदुषः।अतोनतान्प्रबुद्धीभूतान्वेदोयद्बोधयिष्यतितदेवश्रेयइ
तिविश्रंभितानित्यर्थः।तानेवंभूतान्वृजिनाध्वनिकामवर्त्मनि।देवादियोनिषुभ्राम्यतः।ततःपुनःतमःस्तंबादियोनिंविशतःपशुकामइति।आयुरिंद्रियकामइतिबलवा
दिकामइतिपुत्रादिकामइतिवा।कथंपुनस्तेष्वेवकामेषुस्वयंबुधोवेदोयुंज्यात्प्रवर्तयेत्।तथासत्यनाप्तःस्यादितिभावः।२५।कथंतर्हिकर्ममीमांसकाःफलपरतां

उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच।आसक्तमनसोमर्त्याआत्मनोऽनर्थहेतुषु।२४।नतानविदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि।
कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतोबुधः॥२५॥एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः।फलश्रुतिंकुसुमितांनवेदज्ञावदंति
हि॥२६॥कामिनःकृपणालुब्धाःपुष्पेषुफलबुद्धयः।अग्निमुग्धाधूमतांताःस्वंलोकंनविदंतिते॥२७॥ ॥

वदंति।तत्राह।एवमिति।व्यवसितंवेदस्याभिप्रायं।कुसुमितांअवांतरफलप्ररोचनतयारमणीयांपरमफलश्रुतिंवदंति।कुतस्तेकुबुद्धयस्तदाहहियस्माद्वेदज्ञायथामा
दृश्यस्तथानवदंतीति॥२६॥कुबुद्धित्वंप्रपंचयति।कामिनइत्यष्टलिः।कामित्वात्कृपणाःततोलुब्धाःतृष्णाकुलाः।अतःपुष्पेष्ववांतरफलेषुपरमफलबुद्धयः।अग्नावग्नि
मुग्धाःअग्निसाध्यकर्माणितेनिविशेनलुप्तविवेकाः।ततश्चधूमतांताःधूममार्गाश्रियेषांतेस्वंलोकंआत्मतत्वं।तथाचश्रुतिः।कश्चिद्विद्वानस्माल्लोकात्प्रेत्यआत्मानंवे
दअहमहमस्मीतिकश्चित्स्वंलोकंनप्रतिजानातिअग्निमुग्धोहैवधूमतांतइति॥२७॥ ॥

भा०प०
१००

कोसौ सुखलोकः। तमाह नेति। हृदिस्थमात्मानं मां सुखलोकं। ननु हृदिस्थमहंकारास्पदं जानंत्येवं। सत्यं परमात्मानं तु न जानंतीत्याह। यद्इदं यद्व्यतिरिक्तं जग न्नास्ति। कुतः यद्इदं जगज्ज्ञातं। कुतो न जानंतीति हि यस्मात् अकथं कर्मैव शश्वत् शस्तं कथनीयं। पशुहिंसासाधनं वा येषां ते। अतः केवलं अस्तुतपः प्राणातर्पणपराः। नीहारं तमः तेन च्छन्नानि च लूंधियो येषां ते पथा संति हितमपि न जानंति तद्वत् तथा च श्रुतिः। न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति। २८ वेदतात्पर्यज्ञानश्चान्यान् यजंतीत्याह। ते परोक्षमस्फुटं मेमतमविज्ञाय देवादीन्यजंत इत्युत्तरेणान्वयः। स्वमतमेवाह। हिंसायां मांसलक्षणार्थं तत्फ

न ते मां मंग जानंति हृदिस्थं य इदं यतः। उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः॥२८॥ ते मे मतमविज्ञाय परोक्षं वि- षयात्मकाः। हिंसायां यदि रागः स्यात् यज्ञ एव न चोदना॥२९॥ हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया। यजंते देवता यज्ञैः पितृभूतपतीन् खलाः॥३०॥ ॥ ॥

लार्थं च यदि रागः स्यात् तर्हि यज्ञ एव तत्प्रत्यनुज्ञातं तद्द्वारा परिसंख्येयं। न त्वावश्यकत्वेन चोदनेत्येवं रूपं। यद्यपि नित्यनैमित्तिकयोः कामविशेषानुबंधो नास्ति। तथापि कर्मणा पितृलोक इति श्रुतेः सामान्यतः पितृलोककामना अस्त्येव अंतःकरणशुद्धिकामना वेति सा च। तदुक्तं नाकामस्य क्रिया काचिद्दृश्यते चेह कर्हिचित्। यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितमिति॥२९॥ अज्ञत्वादेव हिंसया विहारः क्रीडा येषां ते॥३०॥ ॥ ॥

१००

किंचातेतिमंदवुद्धयइत्याह।स्वप्नोयममिति।अमुंपरलोकंआशिषआस्मिंल्लोकेसंकल्पनअनिश्चित्यविघ्नवाहुल्यात्तत्यजंतिकर्मसुविनियोजयंति।यथाकश्चिद्वणिक्कुद्रव्य
संसमुद्रादिलंघिनवक्लृप्तधनार्जनेच्छयासिद्धंधनंत्यजन्नुलयश्रेष्टोभवतितद्वदित्यर्थः।३१।अतोरजःसत्वतमोनिष्ठास्ते।रजःसत्वतमोजुषःस्वानुरूपानिंद्रादीनेवोपासतेनतुमां।य
द्यपीइद्रादीनामपिमदंशत्वात्मदुपासनमेवतत्।तथापियथावन्नोपासतेभेददर्शित्वादित्यर्थः।३२।हृदिसंकल्पइत्युक्तं।तमेवसंकल्पंदर्शयति।इष्ट्वेति।तस्यलोगस्यांतेमहाशा
लामहागृहस्थाः।।३३।।ततःकिमित्यतआह।एवमिति।अतोमत्प्रवणंवर्णात्वाभावात्रितयंसंसारिणोभवंतीतिभावः।३४।तदेवंवेदानांप्रवृत्तिपरत्वंनिराकृत्यप्रकृतंनिवृत्तिपरत्वे

स्वप्नोपममसुंलोकमसंतंश्रवणप्रियं।आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक्।३१।।रजःसत्वतमोनिष्ठारजःसत्वतमो
निष्ठाजुषः।उपासतेंद्रमुख्यान्देवादीन्नतथैवमां।३२।इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि।तस्यांतइहभूयास्ममहाशालामहाकुलाः।
एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणां।मानिनांचातिस्तब्धानांमद्वार्तापिनरोचते।३४।वेदाब्रह्मात्मविषयास्त्रिकांडविषयाइमे।परोक्ष
वादाऋषयःपरोक्षंममचप्रियं।। ।।

मेवोपसंहरति।वेदाइति।कर्मब्रह्मदेवताकांडविषयाइमेवेदाः।ब्रह्मात्मविषयाःब्रह्मैवात्मानसंसारीत्येतत्पराः।तत्परत्वाप्रतीतौत्व।फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं।श्रे
योविवक्षयापरोक्षंयथा।भैषज्यरोचनमित्युक्तमेवकारणमनुस्मारयतिपरोक्षेति।ऋषयोमंत्राःतद्द्रष्टारोवाततकिमिति।यतःपरोक्षमेवममदप्रियं।अयंभावः।शुद्धांतःकरणैरे
वैतज्ज्ञातव्यंनान्यैरनधिकारिभिः।अथाकर्मत्यागेनभ्रंशप्रसंगादिति।।३५।। ।। ।।

ला०प०
१०१

ननुवेदज्ञा अपिजैमिन्यादयः किमितितथा नवर्णयंतिमां विनातत्वतोवेदंतदर्थंवामंनकोपिवेदेत्याशयेनाह। शद्बब्रह्मेतियावत्समाप्ति। स्वरूपतोऽर्थतश्चदुर्विज्ञेयं। तद्ब्रह्म सूक्ष्मंस्थूलंवेतिद्विविधं। तत्रसूक्ष्मंतावत्स्वरूपतोपिदुर्ज्ञेयमित्याह। प्राणेंद्रियमनोमयं। प्रथमंप्राणमयंपराख्यं। ततोमनोमयंपश्यंत्याख्यं। ततइंद्रियमयंमध्यमाख्यं। तस्य वाक्व्यंजकत्वेनवागिंद्रियप्रधानत्वात्। किंच। अनंतपारं। समष्टिप्राणादिमयस्यापि विशेषस्यचतस्यकालतोदेशतश्चाऽपरिछेदात्तदर्थतोपिदुर्ज्ञेयत्वमाह। गंभीरं निगूढार्थं। अतोदुर्विगाह्यंमतिप्रवेशानर्हंतथाचश्रुतिः। चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः। गुहात्रीणिनिहितानिनेंगयंतितुरीयंवाचोमनुष्या

शद्बब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं। अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत्। ३६। मयोपबृंहितंभूम्नाब्रह्मणाऽनंतशक्तिना। भू तेषुघोषरूपेणाबिसेष्वूर्णेवलक्ष्यते।। ।। ।।३७।। ।।

राम
१०१

नादरूपेण

वदंति। अयमर्थः। वाचःशद्बब्रह्मणःपरिमितानिगणितानिपद्यतेज्ञायतेपरंतत्वमेभिरितिपदानिरूपाणिचत्वारि। तानिचत्वार्यपियेमनीषिणोंतर्दृष्टयःतेविदुर्नान्येऽय तोगुहायांदेहमध्येत्रीणिनिहितानिनेंगयंतिस्वरूपंनप्रकाशयंति। यःकेवलंवाचः। तुरीयंचतुर्थंभागंवैखरीरूपंमनुष्याःप्राणिनोवदंति। तमपिवदंत्येवनतुतत्वतोजानंति तत्रमनीषिभिरेवज्ञेयंसूक्ष्मंरूपंदर्शयति। मयेति। मयांतर्यामिणोपबृंहितंअधिष्ठितं। अंतस्यत्वेप्यपरिछेदमाह। भूम्नेति। अधिष्ठातृत्वेथधिकारित्वमाह। ब्रह्मणेति। अविक्र तस्यापिनियंतृत्वंघटयति। अनंतशक्तिनेति। भूतेषुसर्वप्राणिषुघोषरूपेणलक्ष्यतेमनीषिभिः। अंतःसूक्ष्मत्वेनदर्शनेदृष्टांतः। बिसेषूर्णातंतुरिवेति।। ३७।। ।। ।।

दे:

ततोवैखर्याख्यायावृहत्यावाचउत्पत्तिप्रकारंसदृष्टांतमाह।यथेति।त्रिभिः।हृदयात्स्वकाशात्।मुखात्तद्द्वारात्।उद्वमतेवहि४प्रकटयति।दार्ष्टांतिकेदर्शयति।आकाशादिति।प्राणः
तद्रुपाधिर्हिरण्यगर्भरूपःप्रभुर्लीगावान्।३८।तेनरूपेणा।छंदोमयोवेदमूर्त्तिःस्वतएवअमृतमयः।घोषवान्नादोपादानवान्।मनसानिमित्तभूतेननिमित्तंतावदेवदर्शयति।स्पर्शा
दीन्वर्णान्निरूपयतिसंकल्पयतीतिस्पर्शरूपितेनस्पर्शग्रहणमुपलक्षणं।हृदयाकाशाद्वृहतीसृजतीतितृतीयश्लोकेतात्पर्यः।वृहतीशब्दार्थव्याख्यानायविशेषणानिसह

यथोर्णनाभिर्हृदयादूर्णामुद्वमतेमुखात।आकाशाद्घोषवान्प्राणोमनसास्पर्शरूपिणा॥३८।छंदोमयोऽमृतमयःसहस्र
पदवींप्रभुः।ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां।३९॥विचित्रभाषाविततांछंदोभिश्चतुरुत्तरैः।अनंतपारांवृहतींसृजत्याक्षि
पतेस्वयं।

स्रशाःपदवीर्वज्ञमार्गा।तदेवाह।ओंकारात्उरःकंठादिसंयोगेनव्यंजितैःस्पर्शादिभिर्भूषितां।ओंकारस्याव्यक्तात्हृद्गतःसूक्ष्मोलिपितःनत्वकारादिवर्णरूपःतस्यव्यंजकोदित्वात्।त
त्रस्पर्शाःकादिपंचवर्गाःस्वराःअकारादयःषोडशऊष्माणःशषसहाः।अंतस्थायरलवाः॥३९॥विचित्राभिर्वैदिकलौकिकभाषाभिर्विततांयथोत्तरंचत्वारिचत्वार्यक्षराणि
उत्तराणि।अधिकानियेषांतैःछंदोभिरुपलक्षितां।एवमनंतपारांसृजति।स्वयमेवाक्षिपतेउपसंहरतीति॥४०॥ ॥

भा०ए०
१०२

तेषु कति वित्तछंदांसि दर्शयति। गायत्रीति। तत्र चतुर्विंशत्यक्षरा गायत्री। ततश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि। अत्यष्टिः अतिजगती अतिविराडित्यर्थः। एतैः छंदोभिरुपलक्षि
तामितिपूर्वेणैवान्वयः॥४१॥ अतोऽहमप्यस्मात्कल्पेन स्वरूपतो दुर्ज्ञेयमित्युक्तं। अर्थतो पि दुर्ज्ञेयत्वमाह। किमिति। कर्मकांडे विधिवाक्यैः। किं विधत्ते। देवताकांडे मंत्रवाक्यैः किमा
चष्टे प्रकाशयति। ज्ञानकांडे वा किमनूद्य विकल्पयेत्। त्रिविधार्थमित्येवमस्या हृदयं तात्पर्यं मत्तो न्यः कश्चिदपि न वेद॥४२॥ ननु तर्हि त्वं मत्कृपया कथय। ॐ मिति कथय
ति। मामेव यज्ञरूपं विधत्ते। मामेव तत्तद्देवतारूपमभिधत्ते। न मत्तः पृथक्। यद्वा काशादिप्रपंचजातं। तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना विकल्प्यापोह्यते

गायत्र्युष्णिगनुष्टुप्च बृहती पंक्तिरेव च। त्रिष्टुप्जगत्यतिच्छंदो ह्यत्यष्ट्यतिजगद्विराट्॥४१॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लो
के नान्यो मद्वेद कश्चन॥४२॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहं। एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां। मायामात्रमनूद्यांते प्रतिषिध्य प्र
सीदति॥४३॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशोऽध्यायः॥ ॥ ॥

निरा॰ मते

दथ हमेव न मत्तः पृथग्भूतोस्मि। कुत इत्यपेक्षायां सर्ववेदार्थं संक्षेपतः कथयति। एतावानेव सर्वेषां वेदानामर्थः तमेवाह। शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायाम
नूद्य अंते प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति। अयं भावः। यथा हंकुरैरो(?) सर्वं तद्धि मायारभूतं नानाकांडशाखास्वपि तत्तदेव प्रभाव सपयोर्थ
...मेश्वरः भगवतद्धि मायारहितानां सर्ववेदकांडशाखानामपि संगच्छते नान्यदिति। नित्यमुक्तः सत्ततः सर्ववित्सर्वविदवित्। स्वपरज्ञानदाताय स्वं वंदे गुरुमीश्वरं॥ ॥इ
त्येकादशे एकविंशः॥ ॥

राम
१०२

द्वाविंशे तत्त्वसंख्यानामविरोधविधोच्यते। पुंप्रकृत्योर्विवेकश्च जन्मसृत्युविधा द्विधा ॥१॥ तदेवं वेदानां प्रवृत्तिपरत्वं निराकृत्य मोक्षपरत्वं निर्णीतं। मंत्रिवमोक्षपरत्वेपि तद्वा न तत्र वि-
वादाः। तथाहि। केचित्तत्त्वसंख्यासु विवदंते। तत्रापि वाक्यार्थसंदेहे सत्वे आत्मतत्त्वे एकत्वनानात्वादिषु। तत्र किं सत्यमिति जिज्ञासमयं पृच्छति। कतीति। ऋषिभिरागमेषु बहुधा संख्याता-
नि तेषु कति युक्तानीत्यर्थः। भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपंचयति। नवेति त्रिभिः। त्वं तावदष्टविंशति तत्त्वान्यात्थ। तानि च वयं शुश्रुतवंतः ॥१२॥ एतावन्नी नासाव

उद्धव उवाच ॥ ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो। नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम ॥१॥ केचित्षड्विंशतिं प्राहुरपरे
पंचविंशतिं। सप्तैके नव षट्केचिच्चत्वार्येकादशापरे। केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ॥२॥ एतावत्त्वं हि संख्यानामृषयो यद्विवक्ष-
या। गायंति पृथगायुष्मन्निदं नो वक्तुमर्हसि ॥३॥ ॥ श्रीभगवानुवाच ॥ ॥ युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा। मायां मदीयामुद्गृह्य
वदतां किं नु दुर्घटं ॥ ॥

तावत्त्वं नानात्वमित्यर्थः। यद्विवक्षया यत्प्रयोजनमभिप्रेत्य गायंति। आयुष्मन्निति मूर्त्ते ॥३॥ विवक्षाभेदेन सर्वं युक्तमेवमाश्रयाव किं नाम न युक्तमित्याह। युक्तमिति। यथा ब्राह्म-
णाः भाषंते तत्तद्युक्तं च न च कृतः यस्मात् संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि। किं च। मायामिति। असत्वेपि मायाश्रयत्वात् घटत एवेत्यर्थः। उद्गृह्य स्वीकृत्य। नहि मरीचिजलपरिमाणादि
विवादे किंचिद्घटितमिव लौति ॥४॥ ॥ ॥

व

भा०प०
१०३

सा

नन्वयदिसर्वमपियुक्तंकुतोविवादः।यद्विमायेवावलंवनं।कुतोहेतुंप्रतिविवादः।तत्राह।नैतदिति।हेतुंवाप्रतिविवदमानानांमदीयाइरतिक्रमाःशङ्कयःसत्वाद्यार्थंतःकरणात्
न्निविशेषेणानुरूपेणापरितापन्नहेतुरित्यर्थः॥६॥।तासांविवादहेतुत्वमुपपादयति।यांमिति।यासांव्यतिकरा।तन्मोलात।वदतांपदंविषयःविकल्पोल्पेदआसीत्।अंतःकरणात्
न्निविकल्पोवातन्मूलभूतः।एतदेवव्यतिरेकेणाद्रढयति।शमदमयोर्द्वैकंतस्मिन्प्राप्तेविकल्पोऽपयेतिलीयतेअववि कल्पमवादःशाम्यतीति॥७॥संतिसर्वेऽतियद्भक्तं

दा

नैतदेवंयथात्वंयदहंवच्मितन्नथा।एवंविवदतांहेतुंशक्त्योमेडरत्पयाः॥६॥यासांव्यतिकरासीद्विकल्पोवदतांपदं।प्राप्तेशमद
मेप्येतिवादस्तमनुशाम्यति॥७॥परस्परानुप्रवेशात्तत्वानांपुरुषर्षभ।पौर्वापर्यप्रसंख्यानंयथावक्तुर्विवक्षितं॥८॥एकस्मिन्नपि
दृश्यंतेप्रविष्टानीतराणिच।पूर्वस्मिन्वापरस्मिन्वातत्वेतत्वानिसर्वशः॥ ॥९॥ ॥

राम
१०३

त्वपंवयति।परस्परेतिसार्धं।अन्योन्यस्मिन्ननुप्रवेशातवक्तुर्यथाविवक्षितंतथापूर्वकारणंअपरंकार्यंकार्यकारणभावेनप्रसंख्यानंभवति।यद्वापूर्वाअल्पसंख्यात
योर्भावःपौर्वापर्यंतेनप्रसंख्यानंगणनमिति॥८॥अनुप्रवेशंदर्शयति।एकस्मिन्नपीति।पूर्वस्मिन्कारणभूतेतत्वेकार्यतत्वानिसूक्ष्मरूपेणप्रविष्टानिमृदिघटवत
अपरस्मिन्कार्येतत्वेकारणतत्वान्यनुगततत्वेनप्रविष्टानिघटेमृद्वत॥ ॥९॥ ॥ ॥

ण

पराअल्पसंख्या
त्मक

अविरोधमुपसंहरति। अमीषां तत्त्वानां पौर्वापर्यं कारणकार्यत्वं। प्रसंख्यानं चन्द्रनाविकमरीप्रतां वा दिनां मध्ये यथायथा विवक्षया यद्युक्तं यस्य तत्त्वं प्रवर्त्तन्ते तत्सर्वं विविक्तं नि
श्चितं वयं शक्नीमः। उक्तन्यायेन सर्वत्र युक्तेः संभवात्॥१०॥ ननु कार्यकारणतत्त्वानां पृथक्त्वविवक्षया भवतु नाम संख्याभेदः। जीवेश्वरयोः कथं भेदाभेदविवक्षा। यया
द्विंशतिपंचविंशतिपक्षौ प्रवृत्तौ। अत आह। अनादीति। स्वतो न संभवति। अन्यतस्तु संभवात्। स्वतः सर्वज्ञः परमेश्वरोऽन्यो भवितव्य इति षड्विंशतिपक्षाभिप्राय इत्यर्थः।११। कथं तर्हि

पौर्वापर्यमतो मीमांसासंख्यानमभीप्सितं॥ यथा विविक्तं यद्युक्तं शक्नीमो युक्तिसंभवात्॥१०॥ अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवे
दनं। स्वतो न संभवादन्यस्त्वज्ञानदो भवेत्॥११॥ पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि। तदन्यकल्पनापार्थाज्ञानं च प्रकृतेर्गुणाः॥
॥१२॥ प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः। सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः॥१३॥ ॥ ॥ पा

चविंशतिपक्षः। तत्राह। पुरुषेति। वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात्। अतस्तयोरत्यंतमन्यकल्पना अपार्था व्यर्था। एवं पंचविंशतिपक्षप्रवृत्तिरित्यर्थः। नन्वेवमपी
श्वरप्रसादलभ्यज्ञानस्य पृथक्त्वात्पक्षद्वयमपि न घटते। अत आह। ज्ञानं चेति। सत्त्वगुणवृत्तित्वात्तदंतर्भूतमित्यर्थः॥१२॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यात्। अत आह। प्र
कृतिरिति। गुणसाम्यं हि प्रकृतिः। अतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य अकर्तृत्वात्तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः॥ ॥ ॥

भा०ए०
१०४

अतः सत्वं सत्त्वमयं ज्ञानं प्रकृतेर्गुणः इति पूर्वेणैवान्वयः न तु तत्रिव नैष्कर्म्यं वा ज्ञानं च तत्वांतरं स्यात् । ना रजः कर्म रजसो वृत्तिः अज्ञानं च तमसः अतः कर्माज्ञानयोः रजस्तमोद्वारा प्रकृतावेवांतर्भाव इति भावः । तथाधिकालस्वभावयोरपि तत्वांतरता स्यात् । न गुणानां व्यतिकरो यस्मात् । न गुणानां व्यतिकरो यस्मात् स ईश्वर एव कालो नाम । स्वभावो नाम सूत्रं महत्तत्वमेव । तस्य सर्वशक्तिमत्वात् । तदेवं ज्ञानादीनां यथायथमंतर्भावात्र पक्षद्वये पि तत्वबुद्धिः एतद्य पक्षांतरेष्वपि ज्ञेयं । स्वमते तु गुणानामागमापायित्वात् पुंप्रकृतेरेवो विवक्षितः अतो गुणाः त्रीणि तत्वानि ॥१४॥ अपराणि पंचविंशति तत्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति । पुरुष इति सार्द्धद्वाभ्यां । व्यक्तं महत्तत्वं । नभआदीनि तन्मात्राणि मे मया ॥१५

प

सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते । गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥१४॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ज्योतिरापः क्षितिरिति तत्वान्युक्तानि मे नव ॥१५॥ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः ॥१६॥ शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः । गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १७ ॥ ॥

राम
१०४

एकादश दर्शयति । दर्शनं चक्षुः । ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच । वागादिपायंतानि द्वंद्वैक्येनोक्तानि त्वाङ्घ्रिश्चेति । कर्माणि कर्मेंद्रियाणि पंच । उभयं उभयात्मकं मनः अंग हे उद्धव । एवमेतान्येकादश ॥१६॥ पंच दर्शयितुं शब्द इति । शब्दादीनि विषयतया परिणतानि पंचभूतानि । न तु गत्यादिभिन्नत्वाधिक्यं पक्षत्रयेपि स्यात् तेनेत्याह । गती ति गमति उक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्वांतराणीत्यर्थः ॥१७॥ ॥ ॥

तदेवं मतत्रयेतत्वसंख्याभेदं निरूप्याथ ह्विवह्नयागायंतीतियत्स्पष्टं तन्नन्मतत्तात्पर्यं दर्शयति। सर्गादिविति। कार्याणि षोडश विकाराः कारणानि महदादीनि सप्त
प्तान्तद्रूपिणी। सती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणैः सृज्यवाद्यवस्थाधत्ते उपादानकारणरूपत्वात्। पुरुषस्त्वव्यक्तः अपरिणामी तिभिन्नभूतश्चेव
लभीन्हते। अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति॥१८॥ तत्वैरास्वस्यकार्यस्य तदंतत्त्वविमतिप्रेत्याह। व्यक्तादय इति। व्यक्तादयो महदादयः प्रक्र
तेः उत्पन्नाये धातवः ते विकुर्वाणाः पुरुषेणालब्धवीर्याः संहता अंडं कार्यं सृजंति प्रकृतेर्बलात्। नामाश्रितेत्यर्थः॥१९॥ एवं स्वमतं उपसंहृत्य मतांतरेण

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी। सत्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते॥१८॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषे
क्षया। लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात्॥१९॥ सप्तैव धातव इति तत्रार्थाः पंच खादयः। ज्ञानमात्मोभयाधारस्ततो देहेंद्रिया
सवः॥२०॥ षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान्। तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत्॥२१॥ चत्वार्येवेति तत्रापि तेज आपो
न्नमात्मनः। जातानीति रिदं जातं जन्मावयविनः खलु॥२२॥ ॥

नौ

पि सामान्यतो निरूपितां घटनां विशेषतः मतात्पर्यं दर्शयति। सप्तैवेति। ज्ञानं ज्ञानातीति इष्टा जीव उभयोर्द्रष्टृदृश्ययोराधार आत्मा वेति। सप्तानां च प्रकृत्या
दीनां कारणत्वेन तत्वादिषु तत्त्वेषु अंतर्भावः उक्त रेषामतं तत्त्वार्थमाह। ततः तेभ्यः समस्तेभ्यः देहेंद्रियासवः कार्याणि जायंते॥२०॥ षडिति मते पि लोतिकस्म भूतानि तत्त्वा
वं जीवस्य च परमात्मांतर्भावमाह। तैर्युक्त इति॥२१॥ अत्रं पृथ्वी। आत्मनो जातानि आत्मना सह वर्त्वा रितत्वा निश्चित्य तत्त्वार्थमाह। तैरिति अवयवि
नः कार्यस्य॥२२॥ ॥

सर्वेश्वर कारणे पंच भूता
मने भौतिके द्रियादनाम
भाभोग द्रव्यः॥१

नि

वसुश्रोत्र त्वग्घ्राण रस नेत्रेंद्रिय

भूतानि वमात्राणि च इंद्रियाणि च पंच पंच। एकेन मनसा सह आत्मा सप्तदशः॥२३॥ आत्मानं संकल्पयन् मन उच्यते। त्रयोदश पक्षे भूतानि तन्मात्रैरेकीकृतानि पंचैव। इंद्रियाणि च तत्प्रकाशकानि पंचैव मनश्चैकमिंद्रियाणिष्ठातृ आत्मा च द्विविधः एवं त्रयोदश पक्षे पंच भूतानि पंचेंद्रियाणि। जीवमनसा रात्मा तत्र विनेता चैवैकादश। नव पक्षे तु अष्ट प्रकृतयः पुरुषश्च। विकाराणामंतर्भावः॥२४॥ उपसंहरति। इतीति। एतैः प्रकारैः प्रकृतिपुरु

संख्याने सप्तदशके भूतमात्रेंद्रियाणि च। पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः॥२३॥ तद्वत् षोडशसंख्याने आत्मैव मन उच्यते। भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश॥२४॥ इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतं। सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं॥२५॥ ॥श्रीउद्धव उवाच॥ प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ। अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः॥२६॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि। २६। एवं मे पुंडरीकाक्ष महांतं संशयं हृदि। छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः॥२७॥ ॥ ॥

सर्वेष्वापतायेत्यर्थः॥२५॥ तत्र पृच्छति। प्रकृतिरिति। आत्मना जडाजडरूपत्वेन विलक्षणौ अन्योन्यापाश्रयात्॥ परस्परपरिहारेणाप्रतीतेरित्यर्थः। तदेव व्यनक्ति। प्रकृतौ तत्कार्ये देहे प्रकृतिश्च आत्मनि तेन विना तस्या अप्रतीतेः अहमिति तेद्प्रतीतेः देहात्मनोर्भेदो न लक्ष्यत इत्यर्थः॥२६॥ हृदि वर्तमानं संशयं नयेन युक्त्या नैपुण्यं प्रावीण्यं येषां तैः॥२७॥ ॥

ग्रहीसीत्युक्तं।तत्र हेतुमाह।हि यस्मात्।त्वत्तः त्वत्प्रसादादेव ज्ञानं ज्ञाने प्रमोषः भ्रंशश्च ते शक्तितः मायातः।ननु स्वस्वप्रकाशस्यात्मनः कथं ज्ञानप्रमोषः।ज्ञानदाने तत्प्रमोषे वा मम किंप्र
योजनं।तत्राह।त्वमेवेति॥२८॥ विकारा विकाराश्रयां नानात्वैकतात्वां।मायापेक्षनिरपेक्षत्वां प्रकाशाप्रकाशत्वां वा तयं तत्भेदं वक्तुमाह।प्रकृतिः पुरुषश्चेति।विकल्पोऽयं तत्भेद एवा कु

त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः।त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः॥२८॥ ॥श्रीभगवानुवाच॥ ॥
प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ।एष वैकारिकः सर्गो गुणव्यतिकरात्मकः॥२९॥ ममांग मायागुणमय्यनेकधा
विकल्पबुद्धीश्च गुणैर्विधत्ते।वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत्॥३०॥ ॥

कुत इत्यपेक्षायां।प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारित्वं तावद्दर्शयति।एष इति द्वाभ्यां।एष सर्गः सृज्यत इति सर्गः देहादिसंघातः वैकारिकः विकारवान्।अत्र हेतुः।गुणव्यति
करात्मकः गुणक्षोभकृतः॥२९॥ नानात्वमाह।ममेति।विकल्पं भेदं तद्बुद्धीश्च।अनेकधात्वं प्रपंचयति।वैकारिकः अनेकविकारवानपि स्थूलेन मार्गेण तावत्त्रिविधः त्रैविध्यमाह।अध्या
ध्यात्ममिति।एवं रूपम्॥३०॥ ॥

तानि रूपाणि दर्शयति। दृक् चक्षु आत्मं। रूपं अधिभूतं। अत्र रंध्रे चक्षुर्गोलके प्रविष्टं आर्क्कं पुरुषः अंशो अधिदैवमिति। सापेक्षप्रकाशतामाह। परस्परमिति। चक्षुषा रूपं ज्ञायते तेन तदन्यथा ऽनुपपत्या चक्षुः सत्यं स्वस्य अन्यथा अनुपपत्या तदधिष्ठातृदेवता। तत्र चक्षुश्चक्षुषः प्रवृत्तिमतो रूपयानमित्येवमेतत्त्रयं परस्परं सिध्यति। अत्र रंध्र इति विशेषणं व्यावर्त्यमाह। दृष्टान्तोपयोगितया यस्य खे आकाशे अर्को वर्त्तते मंडलात्मा स तु स्वतः सिध्यति। चक्षुर्विषयत्वेपि प्रतियोग्यपेक्षाभावमात्रेण स्वत इत्युक्तं। इदानीमात्मनो विकारित्वाद्यभावेन भेदमाह। यत्तयस्मात्। आत्मा एषां मध्यात्मादीनां य आद्यः कारणं। अतएव करूपः अपि न तस्य। तस्मादेतेभ्यो परो। भिन्नः। स्वप्रकाशत्वादपीत्याह। स्वयानुभूत्या स्वतः सिद्धप्रकाशेन अखिलानां

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे। आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिः॥ एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तं॥३१॥ ॥ ॥

सिद्धानां परस्परं प्रकाशकानामपि प्रकाशकः सर्वेषामपि मायामात्रतः वित्प्रकाशविषयत्वात्। अतएव तस्य स्वप्रकाशत्वं सिद्धं। चक्षुषि दर्शितं त्रैविध्यमिंद्रियांतरेष्वतिदिशति। एवमिति। यथा चक्षुः एवं त्वगाद्यपीत्यर्थः। त्वक् स्पर्शो वायुरिति। श्रवणं शब्दो दिश इति। जिह्वा रसो वरुण इति नासा गंधो अश्विनाविति चित्ते न युक्तमंतःकरणांतरमपि। तत्र चित्तं चेतयितव्यं वासुदेव इति। मनो मंतव्यं चंद्र इति। बुद्धिर्बोद्धव्यं ब्रह्मेति। अहंकारोहं कर्त्तव्यं रुद्र इत्येवं त्रिविधमित्यर्थः ३१॥ ॥ ॥ ॥

भास्तत्थैव न

ननु पुनरपि वैलक्षण्यमात्रमेवोक्तं त्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिः कुतः स्यात्। अहंकारनिवृत्त्या तत्कुतः त्रिविधविकल्पनिवृत्त्येवेत्याशयेनाह। योसौ अहं अहंकारः
तमेवाह। गुणक्षोभं करोतीति तथा ततः परमेश्वरात् कालाद्वा निमित्तात्। प्रधानं मूलमुपादानं यस्य तस्मान्महतः प्रसूतो विकारः। स त्रिवृत् त्रिविधः मोहमयस्य विकल्पस्य
हेतुः। त्रिविधत्वमेवाह। वैकारिक इति। ३३॥ सकृत्तो निवर्त्तेत। आत्मा ज्ञानविलसितत्वात् तत्तज्ज्ञानेनेत्याशयेनाह। आत्मा परिज्ञानमय इति। ननु कथं मोहमयत्वं विकल्पस्या

योसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः। अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसश्चैंद्रियश्च
॥३४॥ आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः। व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्व
लोकात्॥३५॥ ॥

हंकारस्य वैकोच्छित्वसत्त्वं गीकारात् तत्राह विवाद इति। अयं भिदार्थनिष्ठो विवादो ह्यात्मा ज्ञानपरिज्ञानमय इत्यन्वयः। यद्वा विवादः सर्व्वा भिदार्थनिष्ठ एव न तु वस्तुमात्र
निष्ठः। अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वात् मोहमयत्वं सिद्धमिति। ननु यद्यहंकारो विकल्पश्च नास्ति। अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह। व्यर्थोपि अर्थरहितोपि स्व
रूपभूतान्मत्तो बहिर्मुखानां नैवोपरमेत। अपि तु तत्कृतैः कर्मभिस्त्रिजन्मनी यदेहेषु ते संसरंतीति॥३५॥ ॥ ॥

तत्र पृच्छति त्वत्त इति। व्याकस्यात्मनो देहाद्देहांतरगमनं। अकर्तुः कर्म्माणि। नित्यस्य जन्ममरणादीनि कथमिति भावः॥ ३४॥ एतद्विद्वांसो न संति हि यस्मात्तमा
यया वंचिता मोहिताः॥ ३५ लिंगशरीराध्यासेन सर्वं घटेत इत्युत्तरमाह। मन इति। प्रधानत्वेन पंचभिरिति निर्देशोन्येषामप्युपलक्षणार्थः। देहाद्देहांतरं प्राति [illegible]। त
तोन्य एवात्मा तन्मनोनुवर्त्तते अहंकारेणानुगच्छति॥ ३६॥ ननु मनसोपि पूर्वदेहवियोगो देहांतरयोगश्च कथं भवतीति चेत्। स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः
कारणमाह। ध्यायदिति। कर्मतंत्रत्वात्कर्मोपस्थापितान्दृष्टान्वा अनुश्रुतान्वेदोक्तान्वा विषयाननुध्यायत्। अथ अनंतरं ध्यायमाने भुज्यमाने वा विर्भवत्पु

उद्धव उवाच॥ ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो। उच्चावचान्यथा देहान्गृह्णंति विसृजंति च॥ ३४॥ तन्ममाख्याहि गोविंद दुर्विभा
व्यमनात्मभिः। न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः॥ ३५॥ ॥ श्रीभगवानुवाच॥ मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं। लोका
ल्लोकं प्रयात्यन्य आत्मा तदनुवर्त्तते॥ ३६॥ ध्यायन्मनोनु विषयान्दृष्टान्वानुश्रुतानथ। उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति॥ ३७॥
विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः। जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः॥ ३८॥ ॥ ॥

र्त्तिविषयेषु वसीदत्तलीयमानं भवति। तदनंतरं तस्य स्मृतिः पूर्वापरानुसंधानं नश्यति॥ ३७॥ ततः किं अत आह। विषयेति। कर्मोपस्थापितदेवादिदेहस्यांताभिनि
वेशात् आत्मानं पूर्वदेहं पुनर्मनो न स्मरेत्। इति यत् सैव यातना देहाभिनिवेशेन नष्टशोकादेः देवादिदेहाभिनिवेशेन वा हर्ष[illegible]देहे तोः पूर्वदेहे अत्यंतविस्मृ
तिः अहंकारनिवृत्तिः। तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहवत्प्राणशः॥ ३८॥ ॥ ॥

जन्म तु विषयस्य देहस्य आत्मतया स्वीकृतिं अभिमानं प्राहुः न तु देहवदुत्पत्तिं न च पुत्रादिदेहवत्स्वीयत्वनिश्चयमात्रेण किं तु सर्वभावेन अभेदेन अभिमानमात्रेणोत्पत्तिमरणे दृष्टांतद्वयं। यथा स्वप्नश्च मनोरथश्चेत्यर्थः॥३९॥ दृष्टांतौ विवृणोति स्वप्नमिति। तत्र वर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिवेति वा च यथा पूर्वसिद्धमथात्मानमपूर्वमिवायं जातमि व पश्यतीत्यर्थः॥४०॥ उपसंहरति इंद्रियाणामयनं मनः तस्य देहांतरालिंगविशेषेण या सृष्टिः उत्पत्तिस्तया वस्तुनि आत्मनि। तदाह इमा। नेतेदं त्रैविध्यं उत्तममधममनीवदं असदेव

श्लो

जन्म त्वा आत्मतया पुंसः सर्वभावेन भूरिदा। विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः॥३९॥ स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्य सौ॥ तत्र पूर्वमिवात्मानमपूर्वं वानुपश्यति॥४०॥ इंद्रियायनसृष्टेदं त्रैविध्यं भाति वस्तुनि। बहिरंतर्भिदाहेतुर्जनोसज्जनकृद्यथा॥४१॥ नित्यदा ह्यंग भूतानि भवंति न भवंति च। कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते॥४२॥ ॥ ॥

५७

भातीत्यन्वयः। एवंभूत आत्मा वाह्यांतरभेदहेतुश्च भवति वाह्यविषयान् अंतरान् सुखादींश्चपश्यतीत्यर्थः। यथा वैनोजीवः स्वप्ने बहून् असतो जनान् देहान् कुर्वन् प्रपञ्चबहुरूपो भाति तद्वत्। यद्वा इदं त्रैविध्यं अध्यात्मादिरूपं भाति। असज्जनकृत् दुष्टपुत्रो यथा स्वकजनकः पितास्वयं समोपि पुत्रालिमानतः तत्सुहृदरिमित्रोदासीन्यालेद हेतुर्भवति तद्व दिति अन्यत्समानं॥४१॥ तदेवं लोकप्रसिद्धो जन्ममृत्यू निरूप्य सूक्ष्मावस्थावपि तौ वैराग्याय निरूपयति। नित्यदा प्रतिक्षणं भूतानि शरीराणि उत्पद्यंते। नश्यंति च। कालस्यातिसूक्ष्म त्वात् तत्कृतं भवनमभवनं वा विवेकिभिर्न लक्ष्यते॥४२॥ ॥

सा०प०
१०८

सतोर्जन्ममरणायोरज्ञानेकारणमेतद्भवेत्। सत्वमेवतयोः कुतइत्याशंक्यानुमानेनसाधयति। अविविधानांपरिमाणादिलिङ्गस्रोतसांगत्यादिलिङ्गःफलानांरूपादिलिङ्गैर्यथा। वृस्था
विशेषाः कृताः कालेनेतिपूर्वस्यानुषंगः। आदिशब्देनतेनतेजोबलकामकौशलादीनामुपादानंविमतंप्रतिज्ञाणोत्पत्तिविनाशवत्। अवस्थाभेदवत्वात्। दीपज्वालादिव
नुमानं॥४३॥ कथंतर्हिनित्यमित्यत्राहतद्वदेवसादृश्यावलंबिनीत्याह। सोऽयमिति। सादृश्यादविविधामेवयथासोपंदीपइतिप्रत्यभिज्ञा। यथावस्रोतसांप्रवाहजलानामेवतदि

यथाविविधानांस्रोतसांचफलानांचावनस्पतेः। तथैवसर्वभूतानांवयोवस्थादयःकृताः॥४३॥ सोयंदीपोविविधानांयद्वत्स्रोतसांत
दिदंजलं। सोयंपुमानितिनृणांस्थानादीदीर्घायुषाम्॥४४॥ मास्वस्यकर्मबीजेनजायतेसोप्ययंपुमान्। म्रियतेवामरोभ्रान्त्या य
थाग्निर्दारुसंयुतः॥४५॥ ॥

राम
१०८

दंजलमिति। तथा। सोयंपुमानितिधीर्दीर्घस्थानामृणांबहूनांशरीरिणां। स्थानायर्थमायुर्येषामविवेकिनांतेषांभवति॥४४॥ ननुकथंदेहाद्यासवतःपुंसःकामजि
न्ममरणानिसंतिनात्यंतिकावस्था। नहिघटतेघटस्यपुनरुपभेदेनसत्वंचेति। तत्रजन्मस्यापिव्यक्तंतदेवाबादित्याह। मास्वस्यनैवात्मनःकर्मणाबीजभूतेनसोपिअतःपितु
मान्जायतेम्रियतेवा किंतुअयंभ्रान्त्याजन्माप्निजायतइवअमरोपिम्रियतइव। यथामहाग्निर्निरूपाग्निरात्मकाल्पांतमवस्थितोपिदारुयोगवियोगाभ्यांजन्मनाशाभ्यामितिनश्च

सत्वम ते स्वार

भा २

सिद्धवत्कृत्योक्ता वयोऽवस्थाः प्रपंचयति । निषेको जठरे प्रवेशः । गर्भस्तन्मध्ये वृद्धिः । बाल्यं आपंचमात् । आ दशमात् कौमारं । आ षोडशाद्वर्षात् । ततो यौवनमापंचचत्वा-
रिंशतः । ततो वयोमध्यं षष्टिवर्षांत ॥४६॥ देहसंबंधात् जन्ममरणादीनां उपपादितमर्थमुपसंहरति एता इति । हि स्फुटं । अन्यस्य देहस्य । तनूः अवस्था गुण-
संगात् प्रकृत्यविवेकात् । कश्चित्परमेश्वरानुगृहीतस्तु कथं जहाति । अवस्थावतो देहस्य द्रष्टा नावस्थावानिति विवेकज्ञानेन ॥४७॥ ममत दातं मृधि

निषेकगर्भजन्मानि बाल्यकौमारयौवनं । वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥४६॥ एता मनोरथमयीर्ह्यन्यस्योच्चाव-
चास्तनूः । गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ॥४७॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ । न भवाप्ययवस्तूनाम-
भिज्ञो द्वयलक्षणः ॥४८॥ तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ । तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥४९॥ ॥

तत्वेन जन्ममरणवान् देहो न दृश्यते । तत्राह । आत्मन इति । पितुर्देहस्योर्ध्वदेहिकं कुर्वताऽप्ययदर्शनात् पुत्रदेहस्य च जातकर्मणि जन्मदर्शनादात्मनः
स्वदेहस्यापि भवाप्ययावनुमेयौ । एवं च दृश्यत्वे सति भवाप्ययवतां वस्तूनां देहादीनामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति ॥४८॥ एतदेव दृष्टांतेन स्प-
ष्टयति । तरोरिति । तरुशब्देनोद्भिज्जमात्रस्योपलक्षणं । फलपाकांतस्य व्रीह्यादेरित्यर्थः । यद्वा तरोरेवांत्यः परिणामो विपाकः । बीजाज्जन्म विपाकात्संयमं नाशं
च विद्वान् ॥४९॥ ॥

भा०ए०
१०८

अविवेकितः संसारं प्रपंचयति। प्रकृतेरिति पंचभिः। तत्त्वेन तत्त्वतो विभिन्नतत्त्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा॥५०॥ गुणभेदेन त्रिविधं तत्रापि तन्नार
तम्येनैकैकत्र बहुविधं संसारमाह। सत्त्वेति॥५१॥ नन्वकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह। नृत्यतो गायतो जनान्पश्यन्ननुकरोति। तद्वत्स्वरता
लादिगतिं शृंगारकरुणादिरसं च मनस्यनुवर्त्तयतीत्यर्थः। अनुकार्यते गुणैर्बलादित्यर्थः। अनेन दृष्टांतेन दृश्यधर्माध्यारोपः स्फुरतीति दर्शितं॥५२॥ उ
पाधिधर्माध्यारोपहेतोर्वभासंत इत्यत्र दृष्टांतमाह। यथांभसेति। तीरस्था अम्भस्यवोधावंत इव दृश्यंते। जले प्रतिबिंबिता वा चंचला इव वेति। विषयग्राहकेण मनसा।

प्रकृतेरेवमात्मानमविविच्याबुधः पुमान्। तत्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते॥५०॥ सत्त्वसंगादृषीन्देवान्रजसासुरमानुषान्। तमसा भूतति
र्यक्त्वं भ्रामितो याति कर्मभिः॥५१॥ नृत्यतो गायतः पश्यन्यथैवानुकरोति तान्। एवं बुद्धिगुणान्पश्यन्ननीहोऽप्यनुकार्यते॥५२॥ यथांभसा प्रचलता
तरवोऽपि चला इव। चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः॥५३॥ यथा मनोरथधियो विषयानुभवो मृषा। स्वप्नदृष्टाश्च दाशार्ह तथा संसार
आत्मनः॥५४॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा॥५५॥ ॥

परिकल्पिता एव ते चलाचलादयो गुणाः न वस्तुतः संति। अतो मनोनिबंधन एव संसार इत्यभिप्रेत्याह। कर्तृगुणा यद्यप्यवभासंत इत्यत्र दृष्टांतमाह। व
क्षुषेति॥५३॥ भोगस्यापि मिथ्यात्वे दृष्टांतद्वयमाह। यथा एताः अभिसंधानमनोरथधियः स्वप्नदृष्टाश्च धियो यथा मृषा। एवमात्मनो विषयानुभवः संसारो मृ
षा॥५४॥ ननु यदि मृषा तर्हि किं तन्निवृत्तिः श्रमेण। तत्राह। अर्थे हीति। अस्यात्मनः॥५५॥ ॥ ॥ राम॥ ॥ ॥

राम
१०८

अतो मे गोप्यमो न कर्त्तव्य इत्याह। तस्मादिति ॥५६॥ दुःखशीकारोद्यममपि पिपसितुः परमेश्वरनिष्ठैव भाव्यमित्याह। क्षिप्त इति द्वाभ्यां। क्षिप्त आक्षि
प्तः उन्न इति वा। प्रलब्ध उपहसितः ॥५७॥ निष्ठितः निष्ठीवनविषयीकृतः। मूत्रितः मूत्रेणार्द्रीकृतः। प्रकंपितः। परमेश्वरनिष्ठातः प्रच्यावितो। पिकृच्छ्रग

॥ तस्मादुद्धव माभुंक्ष्व विषयानसदिंद्रियैः। आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ॥५६॥ क्षिप्तोऽवमानितोऽसद्भिः प्रल
ब्धोऽसूयितोऽथवा। ताडितः संनिबद्धो वा वृत्त्या वा परिहापितः ॥५७॥ निष्ठितो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः। श्रेयस्कामः कृच्छ्
गत आत्मनात्मानमुद्धरेत् ॥५८॥ ॥ उद्धव उवाच ॥ ॥ यथैवमनुबुद्ध्येयं वद नो वदतां वर। सुदुःसहमिमं मन्य आत्मन्यसद
तिक्रमं ॥५९॥ विदुषामपि विश्वात्मन्प्रकृतिर्हि बलीयसी। ऋते त्वद्धर्मनिरतान् शांतांस्ते चरणालयान् ॥६०॥ ॥ इति श्रीभाग
वते महापुराणे एकादशस्कंधे द्वाविंशोऽध्यायः ॥ ॥ ॥

तस्य कृच्छ्रं प्राप्तोऽपि ॥५८॥ एवं त्वदुक्तं यथा अनुबुध्येयं तथा नः सर्वानुप्रति वद। त्वद्धर्मनिरतान् ऋते विदुषामपि असद्भिः कृतमतिक्रमं। अपराधं सुदुःसह
मन्य इत्यन्वयः। प्रकृतिः स्वभावः ॥५९॥ ६०॥ निरस्य सर्वसंदेहानेकीकृत सुदर्शनं। प्रकाशितरहस्यं तं नमामि गुरुमीश्वरं ॥ ॥ इत्येकादशे द्वाविंशः ॥ ॥

त्रयोविंशेतिरस्कारसहनोपायईर्यते।भिक्षुगीताप्रकारेणमनसःसंयमोधिया॥१॥दुर्जनोपद्रवोनूनंदुःसहोपिमहीयसां।अतस्तत्तुर्भिरध्यायैःसह
नोपायवर्णनं।तत्रतावदस्मिन्नध्यायेभिक्षुगीतयामनोविजयः।उत्तरस्मिन्प्रकृतिपुरुषविवेकः।ततउत्तरस्मिन्गुणात्प्रविजयः।ततःपरस्मिन्नैलगीतया
विषयसंगत्यागेनसत्संगइतिक्रमेणोपायाभगवतावर्ण्यंते।आशंसितःप्रार्थितः।भृत्यस्यवचःसत्कुर्वन्सं-भृत्यंप्रतिआबभाषे॥१॥तत्रतावदंगीकारस्य

श्रीवादरायणिरुवाच॥ ॥सएवमाशंसितउद्धवेनभागवतमुख्येनदशार्हमुख्येण।सभाजयन्भृत्यवचोमुकुंदस्तमाबभाषेश्रवणीयवीर्यः।
॥१॥॥श्रीभगवानुवाच॥ ॥बार्हस्पत्यसवैनात्रसाधुर्वैदुर्जनेरितैः।दुरुक्तैर्भिन्नमात्मानंयःसमाधातुमीश्वरः॥२॥नतथातप्यतेविद्धःपुमान्
बाणैस्तुमर्मगैः।यथातुदंतिमर्मस्थाह्यसतांपरुषेषवः॥३॥कथयंतिमहत्पुण्यमितिहासमिहोद्धव।तमहंवर्णयिष्यामिनिबोधसुसमा
हितः॥४॥केनचिद्भिक्षुणागीतंपरिभूतेनदुर्जनैः।स्मरताधृतियुक्तेनविपाकंनिजकर्मणां॥५॥ ॥ ॥

द्धवःसंपूज्यप्रतिहास्यां।हेबार्हस्पत्यबृहस्पतेःशिष्य।अत्रलोकेससाधुर्नास्ति।योदुर्जनोक्तैर्भिन्नंक्षुभितंमनःशमयितुमीश्वरःस्यात्॥२॥कुतइत्यतआह।ने
ति।यथामर्मस्थाःमर्मस्वेवहिनित्यंस्थिताःपरुषोक्तिरूपाइषवस्तुदंतिव्यथयंतितथाइतरेबाणानतुदंति।अतोबाणैर्यथानतप्यतइत्यर्थः॥३॥तथापिम
यावल्यमाणोरुपायैःसर्वंसोढुंशक्यमित्यभिप्रायेणेतिहासंप्रस्तौति।महद्यथाभवतितथापुण्यमितिहासंगाथांकथयंति॥५॥ ॥ ॥

सतिक्तः पूर्वं धनाढ्यः कष्टार्जितस्य च तस्य नाशेन संतप्यमानो निर्विण्णः सन्नवधूतलिङ्गामरन्दुर्जनैरुपद्रुतः प्रकृतो भिक्षुर्गीतां गाथां जगाद तेनेतिवृत्तं तस्य चरितमाह। अवंतिष्वित्यादिना॥ अवंतिषु मालवेषु वार्त्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य। कदर्यस्तु स्मृतो बुधैः। आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन्॥ देवतातिथींश्च तांश्च स कदर्य इति स्मृत इति॥ वाचा तस्य ये ज्ञातयो बांधवा अतिथयोऽपि नीनाश्च तेन नार्चिता इत्यर्थः। शून्योऽवसथो धर्मकामहीनो गृहो देहो वा॥

अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया। वार्त्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः॥६॥ ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः। शून्यावसथ आत्मापि काले कामैरनर्चितः॥७॥ दुःशीलस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः। दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं॥८॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः। धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः॥९॥ तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद। अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः॥१०॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव। दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात्॥११॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः। उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां॥१२॥ ॥ ॥

॥७॥ यायक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य। पंचभागिनः पंच यज्ञदेवताः॥९॥ तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्य स्कंधः अर्थलाभमात्रहेतुरंशो यस्य तस्य। बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन् सः॥१०॥ दैवतः गृहदाहादिना॥ कालतः निखातं धात्वादि। नृपाणां पार्थिवानां च दण्डकात्तस्मात्॥ ११॥ ॥

भा०ए०
१११

नष्टरायः नष्टो रायः अर्थो यस्य तस्य। तपस्विनः संतप्तस्य ॥१३॥ मे मया आत्मा देहः। ष्टथैवात्मानुतापनं प्रपंचयति। न धर्मायेत्यादिना। यस्य ईदृशोऽर्थायासः अनेन मया ॥१४॥ नरकाय च समत्पयर्थे धर्मानत्रुष्ठानात् ॥१५॥ श्वित्रः श्वेतकुष्ठं ॥१६॥ सिद्धे प्राप्तेऽर्थे तस्योत्कर्षे संवर्द्धने। नाशोपभोगयोर्द्वंद्वैकवद्भावः नाशे उपभोगे वेत्यर्थः। साधनोत्कर्षयोरायासः तत्र त्रासः चिंता च। नाशे भ्रम इति ॥१७॥ किंच। अर्थप्राप्त्यर्थं स्तेयादयः षडनर्थाः। प्राप्तेऽर्थे स्मयादयो व्यसनैः सह नव व्यसना

व।

तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः। खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् ॥१३॥ स चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः। न धर्माय न कामाय यस्यार्थायास ईदृशः ॥१४॥ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन। इह चात्मोपतापाय मृतस्य नरकाय च ॥१५॥ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः। लोभः स्वल्पोपि तान् हंति श्वित्रो रूपमिवेप्सितं ॥१६॥ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये। नाशोपभोग आयासस्त्रासश्चिंता भ्रमो नृणां ॥१७॥ स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः। भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च ॥१८॥ एते पंचदशानर्था ह्यर्थमूला मता नृणां। तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् ॥१९॥ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा। एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥२०॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः। त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदं ॥२१॥ ॥

राम
१११

निर्भूय तम इव विषयाणि त्रीणि ॥१८॥ भेदवैरस्पर्द्धाः प्रपंचयति द्वाभ्यां भिद्यंते भिन्ना हंत्यजंति। कथंभूताः। एकास्निग्धाः एके एकप्राणाः नैव ते अस्निग्धाः अतिप्रियाश्चेत्यर्थः। कृताः। काकिणि नाम पंचमाषी। विंशतिवराटिका काकिणी तया ॥२०॥ संरब्धाः कुपिताः स्पर्द्धमानाः ॥२१॥ ॥ ॥

इहतावदर्थनिष्ठानामेतेऽनर्थाः परलोकेप्यनर्थएतेषामित्याह। लब्धेतिद्विभिः। मानुष्यंजन्मततत्रापिद्विजाग्र्यतांब्राह्मण्यं। स्वार्थंघ्नंतिआत्महितंनकुर्वंतीतियेतेयांति।२२। अ
मरप्रार्थ्यतांदर्शयन्नाह। स्वर्गेति। लोकंदेहं। अनुषज्जेतआसक्तिंकुर्यात्।२३। अपयोमनुष्ययज्ञस्ययत्तयोर्देवताः देवपितृभूतानीतरेषु। ज्ञातयःसगोत्राः बंधवोविवाहादिनांसं
बद्धाःतान्अआयाश्रवलागिनःतामार्हान्आत्मानंचअसंविभज्यान्नादिभिरसंतर्प्य॥२४॥ एवंविमृश्यानुतप्यमानआह। व्यर्थयार्थेहयाऽप्रमत्तस्यममविन्नादिगतमितिशेषः। ये

लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतत्द्विजाग्र्यतां। तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिं॥२२॥ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान्॥
द्रविणेकोऽनुषज्जेतमर्त्योऽनर्थस्यधामनि।२३॥ देवर्षिपितृभूतानिज्ञातीन्बंधूंश्चभागिनः॥ असंविभज्यचात्मानंयक्षवित्तःपतत्यधः।२४
व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलं। कुशलायेनसिध्यंतिजरठैःकिंनुसाधये।२५॥ कस्मात्संक्लिश्यतेविद्वान्व्यर्थयार्थेहयाऽसकृत्। कस्य
चिन्माययानूनंलोकोयंसुविमोहितः।२६। किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत। मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः॥२७॥ ॥

र्थ

नाविन्नादिनाकुशलाः विवेकिनः सिध्यंतिमुच्यंतेजरठैःगैःविद्धः॥२५॥ अन्यमपिस्वयदृशंशोचति। कस्मादेवमनर्थंविद्वानपिसंक्लिश्यति। कारणंसंभावयति। कस्यचिदिति।
ननुनायंमोहितःक्लिश्यतिकिंतुधनादिभिर्भोगादिविधित्सया। अतआहकिंधनैरिति। उतपुनरपि॥२७॥ ॥ ॥

इदानीं संपन्नवैराग्यः(?) सन् हृष्यन्नाह। नूनमिति त्रिभिः। येन प्रीतेनात्मनः स्वरूपोक्तिर्वेदस्य लवति सहरिर्मे नूनं प्रीत इति। शनैः अंशांशो मयि ष्ठितपसा। यद्वा विद्यया लयं नेष्यामि। ए
दिष्ट्याकालावशेषं स्मर्यात्मन्येवसिद्धः कष्टं स्मृत्वा। अखिलेष्वार्थधर्मादिसाधनेष्वप्रमत्तः सन्॥२९॥ अनुमोदेरन् अनुष्ठं कृत। ननु देवैरनुमोदितो। पिजरठः स्वल्पेन काले

नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः। येन नीतो दशामेतां निर्वेदस्यात्मनः प्लवः॥२८॥ सोहं कालावशेषेण शोषयिष्येंगमात्मनः। अप्रमत्तो
खिलस्वार्थे यदि स्यात्सिद्ध आत्मनि॥२९॥ तत्र माम् अनुमोदेरन् देवास्त्रिभुवनेश्वराः। मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत्॥३०॥ ॥श्रीभ
गवानुवाच॥ ॥इत्यध्यवसितमतिर्ध्यावं(?)त्योद्विजसत्तमः। उन्मुच्य हृदयग्रंथीन् शांतो भिक्षुरभून्मुनिः॥३१॥ सवद्वारमही मेतां संयतात्मेन्द्रिया
निलः। निर्ममो निरहंकारः रामायण(?)संगो लक्षितोऽविशत्॥३२॥ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः। दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः॥३३
केचित् त्रिवेणुं जगृहुरेके पात्रं कमंडलुं। पीठं चैके क्षसूत्रं च कंथां चीराणि केचन॥३४॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः॥ ३४॥ ॥

नकिंमानयिष्यति। तत्राह मुहूर्तेनेति॥३०॥ अध्यवसितमिति। व्याख्येत्य। आवंत्यः अवंतिदेशभवः। हृदयग्रंथीन् अहंकारममकारान्॥३१॥ असंगः आसक्तिशून्यः। अलक्षितः अज्ञायमानो
त्ययन्॥३२॥ प्रवयसं वृद्धं अवधूतं मलिनं। पर्यभवन् अवमेनिरे। हेतुं उपरि तिभिः(?)तिरस्कारैः॥३३॥ परिभवानेव दर्शयति। ये केचिदितिसप्तभिः। भोभगवन् गृहाण इति दर्शितानि
मं(?)तिप्रदाय पुनरादद्युः॥३४॥ ॥ स्रो

गे

अत्रैव मूत्रयंति। मूर्द्धनि च ष्ठीवंति शकृत्कारेण श्लेष्माणं प्रक्षिपंति॥३६॥ क्षिपंति निंदंति। निंदामेवाह। एष धर्मध्वजः त्रिदंडलिंगोपजीवी। शठो लोकवंचकः। ३७। तदेवाह। क्षीणवित्त इति। महासारः अतिबली॥ ३८। दुर्वातयंती तद्उपर्यधोवायुं मुंचति। बबंधुः शृंखलैः। निरुरुधुः कारागृहादिषु द्विजं। शुकसारिकादियथा। ३९। लौतिकं

अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे। मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्द्धनि। ३५॥ यतवाचं वाचयंति ताडयंति न वक्ति चेत्। तर्जयंत्यपरे वा
ग्भिः स्तेनोयमिति वादिनः। ३६॥ बध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति। क्षिपंत्येकोऽवजानंत एष धर्मध्वजः शठः॥ ३७॥ क्षीणवित्त इमां वृत्तिम
ने। ग्रहीत्स्वजनोज्झितः। अहो एष महासारो धृतिमान्गिरिराडिव। ३८॥ मौनेन साधयत्यर्थं बकवत् दृढनिश्चयः॥ इत्येके विहसंत्येनमेके दुर्वातयं
ति च। तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजं। ३९॥ एवं स भौतिकं दुःखं दैविकं दैहिकं च यत्। भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ।४०। परि
भूत इमां गाथामगायत नराधमैः। पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीं॥ ४१॥ ॥

दुर्जनादिकृतं दैहिकं ज्वरादिनिमित्तं दैविकं शीतोष्णादि प्रबलं वा दिष्टं दैवप्राप्तं ।४०। धर्मात्पातयद्भिः परिभूतोऽपि सात्विकीं धृतिमास्थाय स्वधर्म एवस्थित इमां वक्ष्यमा
णां गाथामगायत। सात्विकीं धृतिश्चाधृत्या यया धारयते मनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकीति स्मृतेः। ४१॥ ॥

ला.स्क०
११३

तामेवाष्टादशश्लोकीं गाथामाह। नायमिति। न चात्मा नापि ग्रहादयः। मनःपरं केवलं सुखदुःखयोः कारणं वदंति। मन एव ह्येव पश्यति मन एव शृणोतीत्यादिश्रुतेः॥४२॥ परिवर्तनप्रकारमेवाह। मन इत्यादि। गुणान् गुणवृत्तीः सृजति। ततश्च तेभ्यः शुक्लानि सात्विकानि कृष्णानि तामसानि लोहितानि राजसानि। सवर्णा मि-
तकर्मानुरूपाः सृतयः देवतिर्यङ्नरादिजातयः॥४३॥ तर्हि मनस एव संसारः स्यान्नात्मन इत्याशंक्याह अनीह इति। अयमर्थः। अविद्यया मनोध्यासेनेयमात्मनः संसृति-

सिक्षुरुवाच॥ ॥नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः। मनः परं कारणमामनंति संसारचक्रं परिवर्तयेद्यत्॥४२॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि। शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति॥४३॥ अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे। मनः स्वलिंगं परिगृह्य कामाञ्जुषन्निबद्धो गुणसंगतोऽसौ॥४४॥ ॥

र्न तु स्वतः यतः सहितस्येश्वरस्य सामान्यात्। किं तु तद्वतो जीवस्यैवेति तदेतदाह। मनसा समीहमानेन सह निरीहं तत्त्वेन वर्तमानोऽपि परमात्मा अनीहः तत्क्रियासं-
गरहितः यतो हिरण्मयः विद्याशक्तिप्रधानः अतो मत्सखः मम जीवस्य सखा नियंता। अतः उत उद्विचष्टे अतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः। असौ पुनरहं जी-
वः स्वलिंगं स्वस्मिन्नात्मनि लिंगयति ज्ञापयतीति संसारमिति तथाभूतं मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः संबद्धः गुणसंगात्कामान् जु-
षन्निबद्ध इति॥४४॥ ॥

राम
११३

अतो मनोनिग्रहे कृते सर्वं कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह। दानमिति द्वाभ्यां। स्वधर्मो नित्यनैमित्तिकः। सद्व्रतानि एकादश्युपवासादीनि। अन्यानि वा यावन्ति कर्माणि। एते सर्व उपाया मनोनिग्रहलक्षणा अंतो निष्ठा फलं येषां ते तथा। ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह मनसः समाधिर्निग्रह एव परो योगः ज्ञानं॥४५॥ अतो यस्य मनः समाहितं भवति। तस्य किं कृत्यमस्ति वदेति। परं प्रत्युपदिशन्निव स्वयमेवाह। असंयतं विक्षिप्तं चेत्। यद्वा विनश्यत् आलस्यादिना लीयमानं चेत् तर्हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् न किंचित्फलमित्यर्थः॥४६॥ ननु इतरेंद्रियजयः प्रयोजनं स्यादित्याह मनोवश इति देवा इंद्रियाणि तदधिष्ठातारो वा भीष्मो

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि। सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मनसः समाधिः॥४५॥ समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यं। असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः॥४६॥ मनोवशेऽन्ये ह्यभवन् स्म देवा मनश्च नान्यस्य वशं समेति। भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः॥४७॥ तं दुर्जयं शत्रुमसह्यवेगमरुंतुदं तन्न विजित्य केचित्। कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः॥४८॥ ॥

ति नाम भयंकरो मनोलक्षणो देवः। कुतः सहसः बलादपि बलिनोपि वा महीयान् बलीयान्। अतस्तं यो वशवर्तिनं कुर्यात्स एव देवः सर्वेंद्रियजेता भवति नान्यः। तथा च श्रुतिः मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय। भीष्मो हि देवः सहसः सहीयानिति॥४७॥ अतो असह्यो दुःसहो वेगो यस्य तं। अत एव अरुंतुदं अरूंषि मर्माणि तुदति व्यथयतीत्यरुंतुदः तं तत्तनेति छेदः। तं न विजित्य अजित्वा तत ततः केचिन्मर्त्यैः केचित् असद्विग्रहं कुर्वंति। तत्र चानुकूलप्रतिकूलादीन् अन्यान् मित्रादीन् कुर्वंति ते मूढा इत्यर्थः॥४८॥

म

भा०ए०
११५

ततस्थानेनप्रकारेणसंसारेभ्रमंतीत्याह। देहमिति। मनोमात्रपरिकल्पितमिमंस्वदेहमितिपुत्रादिदेहंचममेतिस्वीकृत्यतमसिसंसारे। ४९। एवंतर्हिमनसएवसुखदुःखका
रणत्वमुपपाद्येदानींजनादीनांप्रत्यात्मकारणत्वंप्रपंचयति। जनस्त्विति षड्भिः। अत्रचअस्मिन्नपिपक्षेआत्मनः किंनकिंचित्सुखदुःखकर्मत्वंतत्कर्तृत्वंचेत्यर्थः। कुतइत्यत
आह। हइतिनिश्चितंभौमयोर्देहविकारयोर्देहयोस्तत्। नत्वात्मनः अमूर्तस्यात्मक्रियस्यवहननादिषुकर्मत्वंकर्तृत्वंवाउपपन्नंनतथापिदुःखमात्मपर्यवसाय्येवेतिचेत्

देहंमनोमात्रमिमंगृहीत्वाममाहमित्यंधधियोमनुष्याः। एषोहमन्योयमितिभ्रमेणदुरंतपारेतमसिभ्रमंति॥४९॥ जनस्तुहेतुःसुखदुःख
योश्चेत्किमात्मनश्चात्रहिभौमयोस्तत्। जिह्वांक्वचित्संदशतिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत्॥५०॥ दुःखस्यहेतुर्यदिदेवतास्तुकिमात्मनस्तत्र
त्रविकारयोस्तत्। यदंगमंगेननिहन्यतेक्वचित्क्रुध्येतकस्मैपुरुषःस्वदेहे॥५१॥ ॥ ॥

एवमपिपरमात्मनः उभयत्राप्येकत्वान्नकोपविषयोस्तीतिस्वदृष्टांतेनदर्शयति। जिह्वामिति। ५०। यदिदेवताःअक्षनाम। तत्रापिपक्षेआत्मनःकिं। प्रतोविकारयोर्विक्रिय
माणयोर्देवतयोस्तत्। हस्तेनमुखेलिहतेतेनवाहस्तेदष्टेतदात्मानिनोर्वह्नीन्द्रयोरेवतत्। नत्वविक्रियस्यानहंकारस्यवात्मनः। देवतानांचसर्वदेहेष्वभेदान्नकोपविषयोस्ती
तिस्वदेहदृष्टांतमाह यदाअंगंदेवताधिष्ठानंहस्तमुखादितत्एवपूर्वत्रदेवतानधिष्ठानरूपमुविकारदंतोदाहरणं॥५१॥ ॥ ॥

राम
११५

आत्मनः सुखदुःखाद्याकारः परिणामः। अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्नपन्ने अन्यतः किंचिन्न किंचिदन्यतो भवति यस्मै कुप्येदित्यर्थः यतो निज एव स्वभावः सः। न
न त्वात्मस्वस्था परिणामो ऽन्यनिमित्ततो भवति अतो ऽस्मिको पविश्वयइति चेत्तत्राह। नहीति। आत्मव्यतिरिक्तं नास्त्येव यदि स्यात् तत् अस्तीति प्रतीयते। तन्नास्त्येव। अतः कस्मा
द्धेतोः कुप्येत्। यतो नास्ति निमित्तं न च सुखं दुःखं चेत्यर्थः॥ ५१॥ ग्रहपीडोऽयं जनस्यात्मनः किं। यतः जन्यत इति जनो देहस्यैव जन्मलग्नाये नयाद्वादशाष्टमादिराशि
गता।

आत्मा यदि स्यात्सुखदुःखहेतुः किमत्र यत्तत्र तु जः स्वभावः। न ह्यात्मनो ऽन्यद्यदि तत्र किंचित् तस्मात्कुप्येत कस्मान्न सुखं न दुःखं ५२ ग्रह
निमित्तं सुखदुःखयोश्चेत्किमात्मनो जन्मनस्तत्र वै। ग्रहैर्ग्रहस्यैव वदन्ति पीडां कुप्येत कस्मै पुरुषस्ततो ऽज्ञः॥ ५३॥ ॥

स्यात्स्मै सुखदुःखयोर्निमित्तं भवंति। किंच। अंतरिक्षस्थैर्ग्रहैः स्वत्रस्थस्य ग्रहस्यैव पादाद्दृष्ट्यादिभिः दैः पीडां वदंति दैवज्ञाः। न तु ग्रहकोणादिभिः स्थितस्य तस्य न दृष्टि
गोचरस्य पुरुषस्य। ग्रहात्तैव तु पीडा तत्र ग्रोत्पन्ने देहे तस्याभिमानाद्भवति। अतः पुरुषः ततो ग्रहात् देहाद्वान्यः कस्मै कुप्येत॥ ५३॥ ॥ ॥

ह्रियस्मात्कर्मणेत जडाजडत्वे चेतन्यात्स्वप्रकाशस्य कर्मत्वस्य देहश्चितिः सन्तुदेहमविदितजडत्वं यद्या०

सा०ए०
११५

कर्महेतुस्वेत। अस्थितिप्रयोपगमः। कर्मैव नाम्नि कुत स्तस्य हेतुत्वमिति। तदाहोह्रियस्मात्कर्मणि कस्य जडाजडत्वे सति स्यात्। जडत्वाद्धिकारित्वोपपत्तेः। अजडत्वाच्चहितानुसंधानतः प्रवृत्तिसंभवात्। अविदितजडो देहः। अतस्तस्य प्रवृत्तिर्न्नसंभवति। पुरुषपक्षस्तु परः शुद्धज्ञानस्वरूपः। अतःकस्मै कुप्येत। यतःसुखदुःखयोर्मूलभूतं कर्मैव नाम्नीति॥ ५४॥ त्रिकालपक्षेपि आत्मनः कियतो मोकाला त्मकाएव ब्रह्मांशत्वात ब्रह्मांशस्य ततः पीडा नाम्नीत्यत्र दृष्टांतः नाग्नेर्हितो ग्नर्दंशस्यह्या ला
त

कर्माक्षि हेतुः सुखदुःखयोर्वै किमात्मनस्तद्धिजडाजडत्वे। देहस्त्वचिद्ब्रह्मरूपोयं सुपर्णः कुप्येत कस्मै नहि कर्ममूलं॥ ५४॥ कालश्च हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोसौ। नाग्नेर्हितापो नहिमस्य तत्स्यात्कुप्येत कस्मै न परस्य द्वंद्वम्॥ ५५॥ ॥ ॥

राम
११५

दग्नापोदाहतोनाशोग्नि। तत्रोपाधिभूतकाष्ठांशदाहत्राशः स्यादितिदृष्टांतांतरमाह। हिमस्यतत्शैत्यंतदंशस्य उपारकणस्य नाशकं न स्यादित्यर्थः। किंच। आत्मांशत्वं वक्ष्यतः परएवायं। न वपरस्य द्वंद्वं सुखदुःखादिकमस्तीति॥ ॥५५॥ ॥ ॥

तदेवं षड्भिर्हेतवः प्रसिद्धा निरस्ताः। यदि कश्चिद्धेत्वंतरमुद्भावयेत्तदपि ब्रह्ममहिमाविद्यायां न संभवतीत्याह। नकेनचिदिति। ननु परैर्दत्तः कथमपह्नूयते तत्राह।
यथेति। संसृतिमविद्यमानामेव रूपयतीति तथा तस्य अहमः अहंकारस्य यथा स्यात्। न तथा परतः प्रकृतेः परस्मात्मनो द्वंद्वसंबंधः अहंकारनिमित्तो मोहनत्वोस्तऽवइत्य
र्थः। एवं प्रबुद्धो यः स भूतैः कृत्वा न बिभेति।५६। अतोहमप्येतयैव परमात्मनिष्ठया तरिष्यामीत्याह। एतामिति। मोहमित्यध्याहार्यः। ननु निष्ठैव कथं लभेत्। तदाह
मुकुंदेति।।५७।। प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्यां दुःखं नष्टद्रविणो निर्विद्यात्तत्क्रमः। प्रव्रज्य गां पर्यटन्नसद्भिर्निराकृतोपि स्वधर्मादकंपितः सन्मुनिर

नकेनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य। यथाहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः।।५६।। एतां समास्थाय परात्मनिष्ठा
मध्यासितां पूर्वतमैर्महर्षिभिः। अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव।।५७।। ।।श्रीभगवानुवाच।। ।।निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य
गां पर्यटमान इत्थं। निराकृतोसद्भिरपि स्वधर्मादकंपितोमूं मुनिराह गाथां।।५८।। सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः। मित्रोदासीनरिपवः
संसारस्तमसः कृतः।।५९।। तस्मात्सर्वात्मना तात निगृहाण मनो धिया। मय्यावेशितया युक्त एतावान्योगसंग्रहः।।६०।। य एतां भिक्षुणा गीतां ब्रह्मनि
ष्ठां समाहितः। धारयञ्छ्रावयञ्छृण्वन्द्वंद्वैर्नैवाभिभूयते।।६१।। ।।इति श्रीभागवते एकादशस्कंधे त्रयोविंशोध्यायः।। ।। ।।

मूं गाथामगायतेत्यन्वयः।।५८।। मित्रोदासीनरिपवः सर्वोपि च संसारः तमसः अज्ञानतः आत्मनो मनसो विभ्रममात्रकृतः न तु तात्विक इत्यर्थः।।५९।। उक्तं द्वंद्वसहनो
पायमुपसंहरति। तस्मादिति।।६०।। मनोनिग्रहाशक्तोप्येतच्छ्रवणादिनिष्ठस्तत्फलं प्राप्नोतीत्याह य इति। द्वंद्वैः सुखदुःखादिभिः। भिक्षुगीतमिषं कृत्वा सक्रविन्नगतं हरिः
मोहं निघ्नन्निवाभाति परमानंदरूपतः।। ।।एकादशे त्रयोविंशः।। ।। ।।

द्वंद्व
असद... कानाम

वनुविंशितुसांख्येनमनोमोहोनिवार्यते।आत्मनःसर्वलावानामात्मामायायस्थितया। [illegible] द्वंद्वत्वायसंयमं।चित्तस्योत्काप्तुनःक्षप्तःसांख्यमेवाहतत्कृते।अद्वितीया
त्परमात्मनोमाययाप्रकृतिपुरुषद्वारासर्वद्वैतमुदेति।पुनस्तत्रैवलीयतइत्यनुसंदधानस्यद्वंद्वभ्रमोनिवर्ततइतिवक्तुंसांख्यंप्रस्तौति।अथेति।पूर्वैःकपिलादिभिर्वि
निश्चितंवैकल्पिकंभेदनिमित्तंभ्रमंसुखदुःखादिरूपं॥१॥ ॥अथोशब्दःकात्स्न्ये।यानंद्रष्टातेनदृश्यःकृत्स्नोप्यर्थश्च।विकल्पशून्यमेकमेवब्रह्मणेवलीनमासीदि

श्रीभगवानुवाच॥ ॥अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्विनिश्चितं।यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं॥१॥आसीज्ज्ञानमथोअर्थएक
मेवाविकल्पितं।यदाविवेकनिपुणाआदौकृतयुगेयुगे॥२॥तन्मायाफलरूपेणकेवलंनिर्विकल्पितं।वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत्
॥३॥तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिका।ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते॥४॥तमोरजःसत्वमितिप्रकृतेरभवन्गुणाः।मयाप्रक्षोभ्यमा
णायाःपुरुषानुमतेनचा॥५॥

त्यर्थः।कदेत्यपेक्षायामाह।अयुगोयुगेऽस्यःपूर्वंप्रलयइत्यर्थः।तथाआदौयत्कृतयुगंतस्मिंश्च।अन्यदाऽपियदाविवेकनिपुणाजनाभवंतितदाऽपितेषांभेदास्फूर्तेः॥
२॥तद्बृहद्ब्रह्मवाङ्मनोगोचरंयथाभवतितथा।मायादृश्यंफलंतत्प्रकाशः।तद्रूपेणमायाविलासरूपेणवाद्विधाभूतं॥३॥तयोर्द्विधाभूतयोरंशयोर्मध्येउभयात्मिका
कार्यकारणरूपिणी॥४॥अभवन्नभिव्यक्ताबभूवुःमयापरमेश्वरेणजीवादृष्टप्रबुद्धायाःसृष्टिःपुरुषानुमतत्वंपिहाय स्यैवप्रकृतेर्ज्ञानरूपायाःपुरुषावस्थात
दनुमतेनतत्सहरिणेत्यर्थः॥५॥ ॥

सूत्रं क्रियाशक्तिमान् प्रथमो विकारः। ततो महान् ज्ञानशक्तिः। नत्वयं महानेव प्रथमो विकारः प्रसिद्धः। तत्राह। सर्वज्ञानक्रियागर्भत्वात् सूत्रेण संयुतः। तस्य क्रा
एकमेव तत्त्वं क्रियाज्ञानशक्तिरूपं द्विधा व्यूत इत्यर्थः। विमोहनः जीवस्य भ्रमहेतुः सजातः अह्यायत तन्मात्रादीनां कारणं मनःशब्देन देवानामप्युपलक्षणं। विदवित्म
यः। विदात्मसव्याप्तत्वाद् लयग्रंथिः रूप इति जीवोपाधित्वं दर्शितं। यद्यपि तस्मादात्मन आकाशः संभूत इत्यादिश्रुतेस्तन्मयं हि सोम्य मन इत्यादिश्रुतेश्च प्रथमं

तेभ्यः समभवत्सूत्रं महान् सूत्रेण संयुतः॥ ततो विकुर्वतो जातो योऽहंकारो विमोहनः॥६॥ वैकारिकस्तैजसश्च तामस
श्चेत्यहं त्रिवृत्॥ तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः॥७॥ ॥

भूतानि जायंते तेभ्यश्च पंचीकृतेभ्यः प्राणादिक्रमेण समष्ट्यात्मकं लिंगशरीरं पंचीकृतेभ्यश्च ब्रह्मांडं तस्मिन् वैराजस्तदंतर्यामी लीलाविग्रहः श्रीराभिशायी श्री
नारायणः तन्नाभिपद्मे वैराजः ब्रह्मभोगार्थी वियहश्चतुराननः ततो यथावसरमन्येषां जीवानां नाभिविस्तृतिप्रक्रिया। तथापि वित्तातित्व्यक्तिपूर्वको हंकारस्तस्मा तो
भूतेंद्रियादिव्यवहार इत्येतावता महदादिक्रमेण सृष्टिरुच्यते। तथा चोक्तं। सृष्टिर्हि विस्फुलिंगाद्यैः सृष्टिर्यद्वोदिता अन्यथा। उपायः सोऽवतारायनाभिसेदः कथं व
नेति॥७॥

भा०ए०
११८

तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिं दर्शयति। अर्थ इति। तन्मात्रिकात् शब्दादितन्मात्रकारणात्तामसात्तद्द्वारार्थो महाभूतरूपो ऽयमेव भूव। भूतानामावरणस्वभाव
त्वात्। इंद्रियाणि दश तैजसात् राजसात्। तेषां प्रवृत्तिस्वभावत्वात्। वैकृतात् सात्विकात् देवताः दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेंद्रमित्रकाः चंद्रश्चेत्येकादश। वश
ब्दान्मनश्च तेषां प्रकाशस्वभावत्वात्॥८॥ मम देहे अंतर्यामिणः॥९॥ सलिले संस्थितिर्यस्य तत्सलिलसंस्थिति तस्मिन् सलिलसंस्थिते अंडे श्रीनारायणरूपे

अर्थस्तन्मात्रिकात् जज्ञे तामसादिंद्रियाणि च। तैजसाद्देवता आसन्नेकादश च वैकृतात्॥८॥ मया संचोदिता भावाः सर्वे संहत्यकारिणः।
अंडमुत्पादयामासुर्ममायतनमुत्तमं॥९॥ तस्मिन्नहं समभवमंडे सलिलसंस्थितौ। मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः॥१०
सो ऽसृजत्तपसा युक्तो रजसा मदनुग्रहात्। लोकान्सपालान् विश्वात्मा भूर्भुवःस्वरिति त्रिधा॥११॥ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं। म
र्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परं॥१२॥ अधो ऽसुराणां नागानां भूमेरोको ऽसृजत्प्रभुः॥ ॥ ॥

लीलाविग्रहेण समभवं स्थित इत्यर्थः। विश्वाख्यं लोककारणभूतं। तत्र चात्मभूः चतुराननरूपलोकविग्रहेण भुवनवैराज एव तस्मिन्नाविर्भूत इत्यर्थः॥१०॥ रजसा
युक्तो मदनुग्रहात्तपसा ऽसृजत्। भूः अतलादिसहिता। भुवः अंतरिक्षलोकः। स्वः स्वर्गः महर्लोकादेरप्युपलक्षणं॥११॥ लोकसृष्टिप्रयोजनमाह। देवानामिति। मा
र्द्दनाउको निवासः पदं स्थानं। त्रितयात्परं महर्लोकादि। भूमेरधः अतलादि॥१२॥ ॥ ॥

राम
११८

एवंव्यवस्थायांकारणमाहसार्द्धेन।त्रिलोक्यांपातालादिषु।हितायांयेमादितारतम्येनयथोत्तरंमहर्लोकादयःमहतिःवैकुण्ठलोकः।१३।।तत्रतुमहतिव्यतिरेकेणेत
रागतयस्त्वंवलाइत्याहवैराग्यार्थंमयाकालशक्तिना।धात्रापरमेश्वरेण।कर्म्मफलप्रदेनहेतुभूतेनगुणप्रवाहेसंसारेउन्मज्जति।आमत्यलोकमुत्तमागतीःप्राप्नोतिपु
नर्निमज्जतिआस्थावरंनीचागतीःप्राप्नोति।१४।सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्प्रतिपादनायकारणेनकार्यस्यव्याप्तिमाह।अणुरिति।उत्तयेनसंयुक्तो

त्रिलोक्यांगतयःसर्वाःकर्म्मणांत्रिगुणात्मनां॥१२॥योगस्यतपसश्चैवन्यासस्यगतयोमलाः।महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिः।
॥१३॥मयाकालात्मनाधात्राकर्म्मयुक्तमिदंजगत्।गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति॥१४॥अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिध्य
ति।सर्वोप्युभयसंयुक्तःप्रकृत्यापुरुषेणच।१५।यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन्।विकारोव्यवहारार्थोयथातैजसपार्थिवाः॥१६॥ ॥

व्याप्तः।तदेवाह।प्रकृत्येति।१५।इदानींकार्यस्यकारणात्मतांदर्शयति।यस्यकार्यस्ययश्चआदिःकारणंअंतःलयस्थानंचतस्यमध्यंमध्यावस्थाऽपिसएववस्तुप्रसि
द्धंतत्सुवर्णादिषुअतएवाद्यंतमध्याविवात्मनएवसन्नेतरः।अलंतर्हिमिथ्याभूतकार्यस्यसृष्ट्यातत्राहविकारइति।तैजसाःकटककुण्डलादयःपार्थिवाघटशरावाद
यश्चयथेति॥१६॥ ॥

ला०ए०
११८

नन्वेवं तर्हि स्वं कार्यं प्रति महदादीनामप्याद्यंतद्रूपत्वात्सत्वं स्यात् तत्राह । यदिति । यद्रूपमुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्विकारः प
रं अहंकारादिकं तावं विकुरुते सृजति । यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति । नद्रूपस्य च सं त्रितिपूर्वस्यानुषंगः । कथं तर्हि स्वनिकेत्येव सत्यमित्या
दिश्रुतिः तत्राह । आदिरिति । यद्यदायस्यादिरंतश्च विवक्ष्यते तदा तत्सत्यमित्यभिधीयते । प्रकृत्या परमकारणस्यात्मनः सत्यत्वविवक्षयेत्यर्थः ॥ १७ ॥ ननु तथापि प्रकृति
पुरुषकालानां कार्यभूतानां भिन्नत्वात्कथमद्वितीयता तत्राह । प्रकृतिरिति । अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा । यश्च तस्या आधारः अधिष्ठाता । परः पुरु

यदुपादाय पूर्वस्तु भावो विकुरुतेपरं । आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥ १७ ॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यंजकः
कालो ब्रह्म तत्त्रितयं त्वहं ॥ १८ ॥ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः ॥ महान् गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं ॥ १९ ॥ ॥

षः । यस्य गुणक्षोभेणाभिव्यंजकः कालः तत् त्रितयं ब्रह्म तद्रूपोऽहमेव न तु पृथक् । प्रकृतेः शक्तित्वात् पुरुषकालयोरवस्थारूपत्वात् ॥ १८ ॥ एवं तावत्कालत्रयेऽप्यव्यभि
चारित्वाद्ब्रह्मैव सत्यमिति विवक्षितं तस्य सृष्टिकारणत्वेनादौ सत्वमुक्त्वा मध्येऽपि तस्यैव सत्वमुपपादयन्तोऽप्यवधित्वेन सत्वं दर्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमा
ह सर्ग इति । महान् बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन किमर्थं प्रवर्तते तदाह । गुणेभ्यो देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवः त
दर्थः तद्भोगप्रयोजनः किंपर्यंतं प्रवर्तते । यावत्स्थिरेरंतः सोऽपि किमवधिः । तदाह । यावदीक्षणं परमेश्वरस्य तावत् ॥ १९ ॥ ॥ ॥

राम
११८

प्रलयं निरूपयति। विराड्ब्रह्माण्डं मया कालात्मना साध्यमानः ध्यायमानः लोकानामहरहः कल्पाः सृष्टिप्रलया विविधाः कल्प्यंते यस्मिन्। तान्वाप्यस्मिन्विक
ल्पयतीति तथा स तथाभूतो। पंचत्वरूपाय विशेषाय विभागाय कल्पते योग्यो भवति। पंचानां भूतानामैक्यरूपमेषां पृथग्भावापत्त्या नश्यतीत्यर्थः॥ २०॥ तत्र तस्मा
द्वा एतस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्यो। अन्नं अन्नात्पुरुष इति श्रुत्युक्तप्र
ष्टिक्रमप्रातिलोम्येन प्रलयमाह। अन्न इति मर्त्यशरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्या क्षीणे सति तद्धानास्वेव लीयत इत्यर्थः। अन्नं धाना सुबीजमात्रावशे
षं।

विराण्मया साध्यमानो लोककल्पविकल्पकः। पंचत्वाय विशेषाय कल्पते भुवनैः सह॥ २०॥ अन्ने प्रलीयते मर्त्यमन्नं धानासु लीय
ते। धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते॥ २१॥ अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे। लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥ २२॥
रूपं वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे॥ २२॥ ॥ ॥

षं भवतीत्यर्थः। धाना भूमौ उप्ता न प्ररोहंतीत्यर्थः। भूमिर्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा असती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति।
॥ २१॥ अप्सु गंधः शतवर्षायां वृष्ट्यां प्लाव्यमानो। अप्सु लीयते एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवति। ततो रसोऽपि तस्मिंल्लीयते। ज्योतिश्च वायुना।
निरस्यमानं रूपमात्रं सत्तस्मिंल्लीयते। वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन्तस्मिन्॥ २२॥ ॥ ॥

ला०भा० ११९

खं वायुस्वं भूतादिनाऽहंकारेण ग्रस्यमानं शब्दतन्मात्रे। तदेवं तामसाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह। इंद्रियाणि स्वयोनिष्विति। वैका
रिकदेवतासु। तेषां प्रवृत्तिनिमित्तत्वात्प्रवृत्तेश्च देवताधीनत्वात्तासु लय इति वा वायुक्तिः स्वकृतक्रमस्य कार्येण राजसाहंकारे लयो ऽभिप्रेतः। योनिरिति बहुदेशगतत्वादे
कत्वमविवक्षितं। योनयो देवतास्ताः मनसि। कुत्र ईश्वरे नियंतरि। मनो वशे ऽस्येति ह्यत्त वत्स्नदेवा इत्युक्तत्वात्। इंद्रियलयोक्त्य एव तत्राप्यस्तित्वायः। मनश्च देवताभिः

स्वप्र

खं वरं शब्दतन्मात्रे इंद्रियाणि स्वयोनिषु। योनिर्वैकारिके सौम्य लीयते मनसीश्वरे॥२३॥ शब्दो भूतादिमप्येति भूतादिर्महति प्र
भुः॥ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः। तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये॥२४॥ ॥ ॥

सह वैकारिके ऽहंकार इत्यर्थः। तामसाहंकारकार्यविशेषितस्य शब्दस्य लयमाह। २३॥ शब्दो भूतादिं तामसाहंकारं अप्येति तस्मिन्लीयत इत्यर्थः। भूतादिरित्यु
पलक्षणं त्रिविधो ऽप्यहंकारो महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति। कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात्। स च महान्स्वकारणेषु गुणेषु। ज्ञा
नक्रियाशक्तिमत्त्वाद्गुणवत्तमः सात्त्विकादिरूपं विहाय गुणमात्ररूपो भवति। ते च अव्यक्ते प्रकृतौ। साम्यावस्थां गच्छंतीत्यर्थः। तदव्यक्तं काले। कालाधीनत्वात्तेनैकीभूयावति
ष्ठते। अव्यये ऽपरतंत्रे॥२४॥

राम ११९

मायामयेमायाप्रवर्त्तकिज्ञानमपेवा।अतएवजीवयतीतिजीवस्तस्मिन्महापुरुषे।अयंलावः विश्वसृष्टुर्महापुरुषस्योपकरणा।रूपः कालोहन्यंशेन
सृज्यस्त्र।अतस्तदात्मनावतिष्ठतइति।तदुक्तंसप्तमे।कालंचरंतंसृजतीश आश्रयंप्रधानपुंभ्यांनरदेवसत्यकृदिति।दशमेवायोऽयंकालस्तस्यतेऽव्यक्त
वंधोचेष्टामाहुश्चेष्टतेयेनविश्वं।निमेषादिवत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्यइति।जीवआत्मनि।प्रकृतेलीनत्वेनप्रतियोगपलावात्परिपूर्णो

कालोमायामयेजीवेजीवआत्मनिमथ्यते।आत्माकेवलआत्मस्थोविकल्पापायलक्षणः॥२५॥एवमन्वीक्षमाणस्यकथं
वैकल्पिकोभ्रमः।मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः॥२६॥एषसांख्यविधिःप्रोक्तःसंशयग्रंथिभेदनः।प्रतिलोमानुलो
माभ्यांपरावरदृशामया॥२७॥ ॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेचतुर्विंशतितमोध्यायः॥ ॥

नसद्रूपेणावतिष्ठते।आत्मावात्मस्थएवनान्यत्रलीयते।यतःकेवलोनिरुपाधिःअत्रहेतुः।विकल्पापायात्पांविश्वोत्पत्तिलयाभ्यांलक्ष्यतेअधिष्ठानत्वेना
वधित्वेनवेतितथा॥२५॥अस्यकथनस्यप्रकृतोपयोगमाह।एवमिति।मनसःकथंभेदनिमित्तोभ्रमःस्यात्।जातोवाकथंहृदितिष्ठेदिति॥२६॥उपसंह
रति।एषइति।प्रत्यक्षमिवयेनेदंदर्शितंतत्वमात्मनःसांख्यप्रख्यानतस्मैहरयेपुरुषेनमः॥२७॥एकादशेचतुर्विंशोध्यायः॥ ॥ ॥

भा०ए०
१२०

पंचविंशे सूक्तैर्गुणप्रतिपन्नैर्निरूप्यते। चित्तप्रसवसत्त्वादिगुणाहंन्निरनेकधा॥१॥ प्रकृतिपुरुषविवेकज्ञानवतोऽपि यावत्प्रयत्नविशेषेण गुणत्रयं हन्ति जयो न स्या
त् तावद्दुःखोपरमः। अतस्तज्जयोपायकथनाय गुणाहंन्निः निरूपणार्थमाह। गुणानामिति। मिश्रीभूय वर्तमानाः समिश्राः न समिश्राः असमिश्राः तेषां विभक्त
नां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत्। तदिदं कथयतो मत्तो निबोधेत्यर्थः॥१॥ तत्र सत्त्वस्य वृत्तीराह। शमद इति। ईक्षा विवेकः तपः स्वधर्मवर्तित्वं स्मृतिः पू

मे० वं० श्री

श्रीभगवानुवाच॥ ॥गुणानामसमिश्राणां पुमान्येन यथा भवेत्॥ तन्मे पुरुषवर्येदमुपधारय शंसतः॥१॥ शमो दमस्तितिक्षे
क्षा तपः सत्यं दया स्मृतिः। तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः॥२॥ काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदा सुखं। मदोत्साहो
यशःप्रीतिर्हास्यं वीर्यं बलोद्यमः॥३॥ ॥

श्री

राम
१२०

र्वापरानुसंधानं। तुष्टिर्यथालाभसंतोषः। त्यागो व्ययशीलत्वं। अस्पृहा वैराग्यं। श्रद्धा आस्तिक्यं। ह्रीः अनुचिते कर्मणि लज्जा। दया दानं। दयदानातिरक्षणेच्छेति स्मरणा
त्। आदिशब्देनार्जवविनयादि। स्वनिर्वृतिः आत्मरतिः॥२॥ रजसो वृत्तीराह। कामोऽभिलाषः। ईहा व्यापारः। मदो दर्पः। तृष्णा लाभेऽप्यसंतोषः। स्तम्भो गर्वः। आशीः धना
द्यभिलाषेण देवतादिप्रार्थनं। भिदा दोः। सुखं विषयभोगाः। मदोत्साहः मदेन युद्धायाभिनिवेशः। यशःप्रीतिः ख्यातिप्रियता। हास्यमुपहासः। वीर्यं प्रतापविक्रमः। बलेनो
द्यमः सात्विकपदा॥३॥ ॥

१ भहमन्यदति

तमोहत्तीराहाक्रोधइति।लोलोव्ययपरा।अरवता।क्लमःश्रमः।कलिःकलहः।शोकमोहौ।अनुशोचनंशमस्त्रा।विष...दुःखंदैन्यंवा।निद्रातंद्रा।आशाइदंमेलभिष्यती
त्यवीहा।लीर्स्यं।अनुद्यमो।ग्राह्यं।४।आनुपूर्वशःक्रमेणैताःश्लोकत्रयोक्ताःवर्णितप्रायाःअध्यायपूर्वाइतिभावः।५।विलक्षानांगुणानांहृत्तयोवर्णिताःमिश्राणाम
हा।मन्निपातइतिकिं।अहंममन्नैतिवमताद्वक्तसामानाधिकारण्यदर्शनात्तमसन्निपाततत्वं।अहंशांतःकामीक्रोधीत्यादि।तथाममशांतिरस्मिकामःक्रोधइत्यादिदृष्ट
मे

क्रोधःलोलोव्रतंहिंसायोध्यादंलःक्लमःकलिश्च।शोकमोहौविषादान्नी निद्राशालीरनुद्यमश्च॥ ४॥ सत्वस्यरजसश्चैतामममसद्यानुपूर्वशः।
हृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु॥५॥सन्निपातस्त्वहमितिममेत्युद्धवयामतिः।व्यवहारःसन्निपातोमनोमात्रेंद्रियासुलिः॥६॥धर्मेवा
र्थेवकामेवयदासौपरिनिष्ठितः।गुणानांसन्निकर्षोयंश्रद्धारतिधनावहः॥७॥ ॥

र्थं।तत्पूर्वकःसर्वोव्यवहारश्चसन्निपातकार्यमित्याह।व्यवहारइति।अत्रहेतुःमनश्चमात्राणिचइंद्रियाणिचअसवश्चतैःमनआदीनांसात्विकतामसराजसत्वा
न्नैर्व्यवहारःसन्निपातजइतिभावः॥६॥असौपुरुषोयदाधर्मादिषुपरिनिष्ठितोभवति।तदाश्रयःनिष्ठुतिष्ठारूपःसन्निकर्षःसन्निपातकार्यंधर्मादीनांसत्वतमोरजस्का
र्यत्वात्।विषयतःसन्निपातजत्वमुक्तं।फलतश्चतथात्वमाह।श्रद्धारतिधना।निसत्वरजस्तमोमयःधावहतीतितथा॥७॥ ॥ ॥

भा०ए०

१२१

धर्म्मनिष्ठायामेव सन्निपातं दर्शयति। प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भवति। तथा पुमान् यदा गृहाश्रम एवासक्त्या स्थितेन अनु पश्चात् स्वधर्म्मेणावतिष्ठे
न्निकेतिष्ठेत् सा। पि समिति। सन्निपातः। हि यस्मात् काम्यधर्मगृहाश्रमासक्तिस्वधर्मा रजस्तमःसत्त्वमया इत्यर्थः॥ एतदेवं मिश्रामिश्रगुणवृत्तीः प्रदर्श्येदानीं पुमान् येन य
था भवेदिति यदुक्तं तद्दर्शयति पुरुषमिति त्रिभिः॥ ९।१०॥ हिंसां शत्रुमरणादिकमाशास्य यो भजेत् तं तामसं विद्यात्। एतैर्गुणैरेवंभूतो भवतीति तात्पर्यार्थः॥ ११॥ ननु
तवापि गुणवशीभूतकर्तृत्वाविशेषात् केन विशेषेण त्वं सेव्यो जीवस्य सेवक इति नियमः यतो मां भजेतेति वारं वारमुच्यते। तत्राह। सत्त्वमिति। जीवस्यैव न मे कुतः एते चित्त

प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे। स्वधर्मे चानु तिष्ठेत गुणानां समितिर्हि सा॥ ८॥ पुरुषं सत्त्वसंयुक्तमनुमीयाच्छमादिभिः। कामा
दिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं॥ ९॥ यदा भजति मां भक्त्या निरपेक्षः स्वकर्म्मभिः। तं सत्त्वप्रकृतिं विद्यात् पुरुषं स्त्रियमेव वा॥ १०॥ यदा आशि
ष आशास्य मां भजेत स्वकर्म्मभिः। तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं॥ ११॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे। चित्तजा यैस्तु भूतानां स
ज्जमानो निबध्यते॥ ॥

जाः जीवोपाधौ चित्ते ऽभिव्यज्यन्ते अतो यैः स एव बध्यते। कीदृशः। भूतानां देहरूपाणां मध्ये पांचभौतिकेषु सज्जमानः। अहं त्वनासज्जमानो गुणानियन्तृत्वेन न च बाध्यादिकं न तैः
पिति तत्सम्बन्धः। अतो महान् विशेष इति भावः। यद्वा भूतानामपञ्चीकृतानां यत्कार्यभूतं चित्तं। अत्र मयं हि सो ऽप्यमत इति शङ्कते तत्सम्भवाः अतो भक्तोपहितस्य जीवस्यैवे
ति। अयत्नमानं॥ १२॥ ॥ ॥

राम

१२१

तदेवं मिश्रा मिश्रगुणकार्याणि प्रदर्श्य इदानीमेकैकगुणोद्रेककार्याणि दर्शयति यदेति सप्तदशभिः। यदेतरौ गुणौ जयेत्। अभिभवेत्। तदा भास्वरं प्रकाशकं। शिवदं स्वच्छं।
शिवं शांतं। शिवत्वविशदत्वभास्वरत्वानां यथाक्रमं सुखधर्मज्ञानहेतुत्वात् तदा तैर्युज्येत। आदिशब्दात् शमदमादिभिश्च। १३। तमः सत्वं च कर्मभूतं। रजः कर्तृ संगाहेतुः
निद्रालस्यहेतुः बलं प्रबलं निद्रालावं। अतः संगाहेतुत्वात् यशसा श्रिया च युज्येत न कामः प्रमा नवतीत्यर्थः। निद्राहेतुत्वात् दुःखेन युज्येत द्वितीयार्द्धे लवं यं लवती निष्क

यदेतरौ जयेत्सत्वं भास्वरं विशदं शिवं। तदा सुखेन युज्येत धर्मज्ञानादिभिः प्रभात्॥ १३॥ यदा जयेत्तमः सत्वं रजः संगं निदा बलं। तदा दुःखे
न युज्येत कर्मणा यशसा श्रिया॥ १४॥ यदा जयेद्रजः सत्वं तमो मूढं लयं जडं। युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया॥ १५॥ यदा चित्तं प्रसी
देतइंद्रियाणां च निर्वृतिः। देहे भयं मनोऽसंगं तत्सत्वं विद्धि मत्पदं॥ १६॥ ॥ ॥

तिः। बलत्वात् कर्मणा च युज्येत। १४। यदा रजः सत्वं च कर्मभूतं। तमः कर्तृ जयेत्। मूढं विवेकभ्रंशकं लयं आवरणात्मकं। जडं अनुद्यमात्मकं। अतो मूढत्वात् शोकमो
हहिंसाभिः। लयत्वात् निद्रया। जडत्वादुद्यमाभावेन केवलमाशया युज्येत निद्रयेत्यर्थः। जनइति पाठे। लयात्मकत्वमेव निद्राशयोर्हेतुः॥ १५॥ किंच यदा चित्तं प्रसीदेत् तत्त्व
छं भवेत्। निर्वृतिः उपरतिः तत्तदा मत्पदं मदुपलब्धिस्थानं॥ सत्वमुद्रिक्तं विद्धि॥ १६॥ ॥ ॥

भा॰ए॰
१२२

यदा तु नः क्रियया विकुर्वन्नविकारं प्राकृतवत् । आधीर्भवति आसमंताद्धीर्बुद्धिर्यस्य सः चेतसां बुद्धींद्रियाणां अनिवृत्तिः अनुपरतिः गात्राणि कर्मेंद्रियाणि तेषामस्वास्थ्यं
विकाराधिक्यं मनो भ्रांतं चंचलं । रज एतैर्लिंगैर्निशामय जानीहि ॥१७॥ यदा सीदद्वृत्तिरोलवत् चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं सच्चित्तं विलीयेत मनो ऽपि संकल्यात्मकं
नष्टं लीनं । तमोज्ञानं ग्लानिर्विषादश्च भवति । तत्तदा तम उत्कर्षं उपधारय विद्धि ॥१८॥ किंच । एधमान इति । इंद्रियाण्येव निद्रत्ति मोहरूपता वा निद्रेवासुररक्षसां सिद्धिरिति प्रदत्ति

विकुर्वन्क्रियया चाधीरनिवृत्तिश्च चेतसां । गात्रास्वास्थ्यं मनो भ्रांतं रज एतैर्निशामय ॥१७॥ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं । मनो नष्टं
तमो ग्लानिस्तमस्तदुपधारय ॥१८॥ एधमाने गुणे सत्वे देवानां बलमेधते । असुराणां च रजसि तमस्युद्धव रक्षसां ॥१९॥ सत्वाज्जागरणं विद्याद्रजसा
स्वप्नमादिशेत् । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं ॥२०॥ उपर्युपरि गच्छंति सत्वेन ब्राह्मणा जनाः । तमसाधोध आमुख्याद्रजसांतरचारिणः ॥२१॥

यं पक्षा प्रसंगादाधिदैविकानां गुणानामुत्कर्षकार्याण्युक्तानीति ज्ञेयं ॥१९॥ गुणोत्कर्षतोऽवस्थाभेदं दर्शयति । सत्वादिति । प्रसंगान्निर्गुणावस्थामाह । तुरीयं तत्तुर्थम
वस्थामाह । तुरीयं तत्तुर्थमवस्थां तरंता मत्त्रिषु जागरणादिषु संततमेकरूपमात्मतत्वमेवेत्यर्थः ॥२०॥ गुणोत्कर्षद्वारेण तत्तत्कर्मफलनिष्ठां दर्शयति । उपर्युपरीति । ब्राह्म
णा वेदार्थानुष्ठाननिष्ठकाः । आब्रह्मण इति पाठे ब्रह्मलोकमतिव्याप्येत्यर्थः । आमुख्यात् स्थावरान् नित्याप्य । अंतरचारिणः मनुष्या एव भवंति ॥२१॥ ॥ ॥

राम
१२२

देहाद्युत्क्रांतिकालीनगुणोत्कर्षफलमाह। सत्वे इति सत्वे प्रवृद्धे सति प्रलीना मृताः। रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते। एवं तमोलया इत्यपि। निर्गुणा इत्यत्र तु लयशब्दानुपादानाज्जीवंतोपि निर्गुणाः संतो मामेव यांतीत्यर्थः॥२२॥ इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधनं कर्म त्रिविधमाह। मदर्पणं मत्प्रीत्युद्देशेन कृतं। निःफलं केवलं दासभावेनैव कृतं। यन्निजं कर्म नित्यादि तत्सात्विकं। फलं संकल्प्यते यस्मिन् तत्। हिंसाप्रायं हिंसोद्देशेन कृतं हिंसाबहुलं च। आदिशब्दाद्दंभमात्सर्यादिकृतं॥२३॥ इदानीं सगुण

सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः। तमोलयास्तु निरयं यांति मामेव निर्गुणाः॥२२॥ मदर्पणं निष्फलं वा सात्विकं निजकर्म तत्। राजसं फल संकल्पं हिंसाप्रायादि तामसं॥२३॥ कैवल्यं सात्विकं ज्ञानं रजो वैकल्पिकं तु यत्। प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं॥२४॥ वनं तु सात्विको वासो ग्रामो राजस उच्यते॥ तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं॥२५॥ सात्विकः कारकोऽसंगी रागांधो राजसः स्मृतः। तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः॥२६॥ सात्विक्याऽध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी। तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा॥ ॥२७॥ ॥

निर्गुणास्ते। तत्र ज्ञानादीनां चातुर्विध्यमाह। कैवल्यं देहादिव्यतिरिक्तात्मविषयं। वैकल्पिकं देहादिविषयं यत्तु इजः राजसं। प्राकृतं बालमूकादिज्ञानतुल्यं। मन्निष्ठं परमेश्वरविषयं॥२४॥ वनं विविक्तत्वात् सात्विको वासः। भगवन्निकेतनं तु साक्षात् तदाविर्भावान्निर्गुणं स्थानं॥२५॥ कारकः कर्ता। असंगी। अनासक्तः। रागांधः अत्यभिनिवेशवान्। स्मृतिविभ्रष्टः अनुसंधानशून्यः। मदपाश्रयः मदेकशरणः। स हि निरहंकारत्वान्निर्गुणः॥२६॥ अधर्मे धर्म इति या श्रद्धा॥२७॥ ॥ ॥

गी०टी०
१२३

पथ्यं हितं । श्रुतं शुद्धं । अत्नामसंत्रुनायासतः प्राप्तं । आहार्थं तद्वल्लोत्यादि । इंद्रियाणां पेषकं दद्ध्मलवणादि । आर्त्तिर्दाः अविक्षेपकरमशुद्धं । वशाद्यान्मन्निवेदितं निर्गुणामि त्यभिप्रेतं । २८ । आत्मोद्धं सुखं मदपाश्रयमित्यपि त्वंतत्पदार्थविषयत्वेन ज्ञानवदवद्रष्टव्यं । २९ । उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां । द्रव्यं पथ्यपूतादि । देशो वनवासादिः । फलं सात्विकं सुखमित्यादि । कालः यदा सत्त्वं जेतमां सत्त्वायदेत राजयेदित्यादिना योर्थाद्युक्तः ज्ञानकैवल्यं सात्विकं तन्नमित्यादि । कर्म मदर्पणमित्यादि कारकः सा

पथ्यं पूतमनायस्तमाहार्यं सात्विकं स्मृतं । राजसं चेंद्रियप्रेष्ठं तामसं चार्त्तिदाशुचि ॥ २८ ॥ सात्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं । तामसं दैन्यमोहोत्थं निर्गुणं मदपाश्रयम् ॥ २९ ॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ३० ॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः । दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ॥ ३१ ॥ ॥

विकः कारको संगीत्यादि । श्रद्धा सात्विक्याध्यात्मिकीत्यादि । अवस्था सत्त्वाज्जागरणमित्यादि । आकृतिः उपर्युपरि गच्छंतीत्यादिनोक्ता देवत्वादिरूपा । निष्ठा सत्वे प्रलीनाः स्वर्यांतीत्यादिनोक्तं स्वर्गादिः । एवं सर्वोऽप्ययं तावत्त्रैगुण्यः त्रिगुणात्मकः ॥ ३० ॥ न केवलमेष एव । किंतु यावंतः पुरुषाव्यक्ताभ्यामधिष्ठिताः ते सर्वे भावा गुणमया एव तत्प्रपंचः दृष्टमिति ॥ ३१ ॥ ॥ ॥

राम
१२३

इदानीमुक्तानां त्रैगुण्यस्य संसारहेतुत्वमनुवदन्निर्जयान्मोक्ष इत्याह। एता इति सार्द्धेन येनेति निर्जिताः। स पश्चादविशिष्टेन भक्तियोगेन मन्निष्ठः सन् मद्भावाय मो
क्षाय प्रपद्यते योग्यो भवति। ३२॥ तस्माद्विवेकिनामिदमेव कर्त्तव्यमित्याह। तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिन् तमिमं नरदेहं॥ ३३॥ भजनप्रकारमाह। निः
संग इति सार्द्धेन। सत्वसंसेवया सात्विकान्येवसेवेत प्रमादसत्वविवृद्धय इति प्रागुक्तया। नैरपेक्ष्येण उपशमात्मकेन सत्वेनैव। ३५॥ एवंभूतो मां प्राप्नोतीत्याह।

एताः संसृतयः पुंसो गुणकर्म्मनिबंधनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजा ४॥ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते। ३२।
तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं। गुणसंगं विनिर्धूय मां भजंतु विचक्षणाः। ३३॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः। रजस्तमश्चाभि
जयेत्सत्वसंसेवया मुनिः। ३४॥ सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः। संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां। ३५॥ जीवो जीवविनिर्मु
क्तो गुणैश्चाशयसंभवैः। मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत्॥ ३६॥ ॥ इति भागवते महापुराणे एकादशस्कंधे पंचविंशोध्यायः।

संपद्यत इति। जीवत्वकारणं लिंगशरीरं। मां प्राप्तस्य न पुनः संसार इत्याह। जीव इति। न बहिः विषयभोगेन। नांतरः तत्स्मरणेन। गुणकृतात्पुरुषसंसरणात्प्रथामजित
पृथक्कथाकथनादिरिति। श्रुत्वा तत्तक्तिरसेन विवेकिनोऽन्तः हि पुनः खलु संजनुरीदृशं॥ ॥ एकादशे पंचविंशोध्यायः॥ ॥

यद्विंशे योगनिष्ठाया विद्यातोऽदृष्टसंगतः साधुसंगो ततन्निष्ठापराकाष्ठेति वर्ण्यते ॥१॥ योगिनो योगविभ्रंशः संगतः संत्वेदिति सर्वथा तन्निवृत्त्यर्थमैलगीतं विवर्ण्यते । निः
संगो मां भजेत विद्वान् अप्रमत्तो जितेंद्रिय इत्युक्तं । तत्र विपक्षे नर्थं कुर्यान्निष्पन्नजीवन्मुक्तस्यापि तर्हि संगोऽनर्थकर इत्यनर्थः स्यादित्याशंक्योक्तानुवादपूर्वकं परिहरति
सार्द्धाभ्यां मल्लक्षणं मत्स्वरूपं लभ्यते येन तमिमं नरदेहं लब्धा मद्धर्मे तत्किल क्षणे आस्थितः सन् । आत्मस्थं आत्मन्येव वर्तियं तत्वेनास्थितं परमानंदरूपमात्मानं मां समुपै

श्रीभगवानुवाच ॥ मल्लक्षणमिमं कायं लब्धा मद्धर्म आस्थितः । आनंदं परमात्मानमात्मस्थं समुपैति मां ॥१॥ गुणमय्या जीवयोन्या विमुक्तो
ज्ञाननिष्ठया । गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः ॥२॥ वर्तमानोऽपि न पुमान् युज्यतेऽवस्तुभिर्गुणैः ॥२॥ संगं न कुर्यादसतां शिश्नोदरतृपां
क्वचित् । तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ॥३॥ ॥

समभ्याप्नोति ॥१॥ नन्वेवं सति तस्य विषयसंगो नाभाष्टीत्याह । गुणमय्या याजीवयोनिः जीवोपाधिस्तया विमुक्तः । गुणेषु वर्तमानोऽपि तैर्न युज्यते संगं न प्राप्नोति । अत्र हेतुः
अवस्तुभिः । न च वस्तुत्वेन स्थिरेषु उपमानात्त्वदृश्यंते तत्राह । अवस्तुत्वेन दृश्यमानेषु ॥२॥ तथापि संगं वर्जयेदित्याह । संगमिति । असतां लक्षणमाह । शिश्नोदरे तर्पयतीति शि
श्नोदरतृपस्तेषां । क्वचित्कदाचिदपि । आस्तां तावद्बहूनां संगः किंतु तस्यैकस्याप्यनुगः अनुवर्ती । अंधमनुगच्छतीत्यंधानुगोंधवत् ॥३॥ ॥ ॥

आत्मानं राजानं सक्त्वा व्रजंती। यद्वा स राजा आत्मानं सक्त्वा उपेक्ष्य व्रजंती अन्वगात्। तथा च श्रुतिः।

सं रहा

अत्रेतिहासमाह। ऐलः पुरूरवा मंत्रद्रष्टा चक्रवर्ती हहहबुकः कीर्तिर्यस्य सः उर्वशी विरहातप्रथमं सुद्युम्नपश्चाद्‌कुरुक्षेत्रे तां समागम्य गांधर्वदत्तेनाग्निना देवानिष्ट्वा नरु र्वशी लोकं प्राप्य शोकं संयमे शोकापगमे सति ततो निर्विण्णः सन्निमां गाथामगायतेति नवमस्कंधानुसारेणाइष्टव्यं॥४॥ प्राक्तनी मोहावस्थामाह। त्वष्के तिष्ठ घोरे तिष्ठेति हे पत्नी धंकं रिर्बिंहयि जायेमनसा तिष्ठ घोरे वचांसि मिश्राकृणवावहै हु। न नौ मंत्रा अनुदिता स एते मयस्करन्परतरे चनाहन्नित्येवं मंत्रैर्विलपन्॥५॥ वैक्लव्यंकारण

अ

ऐलः संप्राडिमां गाथामगायत हहबुवाः। उर्वशी विरहात्सुद्युम्नन्निर्विण्णः शोकसंयमे॥४॥ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः। वि लपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः॥५॥ कामानतृप्तो उनुजु षन्क्षुल्लकान्वर्षयामिनीः। न वेद यंतीर्नयांतीरुर्वश्याकृष्टचेतनः॥६॥ ॥एलउ॥॥ अहो मे मोहविस्तारः कामकश्मलचेतसः। देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः॥७॥ ॥

प

माहा कामानिति। वर्षाणि यामिनीः रात्रीः अपयांतीः आयंतीः आगामिनीः आकृष्टचेतनायस्यः॥६॥ तस्य गांधर्वलोकं प्राप्तस्य वक्तृकालस्युर्वशी संभोगानंतरं निर्विण्ण स्य गाथामाहाष्टादशभिः तत्राद्यस्विरतत्त्वं तोक्षपंत्यते। आहो इतियतो मयाइमे अहोरात्ररूपा आयुषः खंडा नस्मृताः॥७॥ ॥

तदेवाह।नाहमिति।अतिनिर्मुक्तः मयि रममाणे अस्तंगतः।अभ्युदितो वा सूर्य इति।अमुया उर्वश्या वंचितः।बत खेदे।उत अपि वर्षपूगाणामपि गता अहानि न वेदेति।
८।येन संमोहेन।आत्मा देहः।क्रीडामृगवत् अधीनः॥९॥ननु प्रणयकुपिताया अनुनयार्थमधीनता युक्तैव सत्यं न त्वत्र तदस्तीत्याह।सपरिच्छदं राज्यादिसहितं ई
श्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीमपि अन्वगमं अनुगतो ऽस्मि।१०।किं वा मम प्रभावाय लिमानो ऽस्थैवेत्याह।कुतस्तस्य मम तेजो बलं।खरो यथा पादताडितो ऽख

नाहं वेदाऽतिनिर्मुक्तः सूर्यो वाऽभ्युदितो ऽमुया।मुषितो वर्षपूगानां बताहानि गतान्युत।८।अहो मे आत्मसंमोहो येनात्मा योषितां कृतः।क्रीडा
मृगश्चक्रवर्ती नरदेवशिखामणिः।९।सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं।यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन्।१०।कुतस्तस्यानुभा
वः स्यात्तेज ईशित्वमेव वा।यो ऽन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः।११।किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा।किं विविक्तेन मौनेन स्त्री
भिर्यस्य मनो हृतं।१२।स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं।यो ऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः।१३।सेवतो वर्षपूगान्मे उर्व
श्या अधरासवं।न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा।१४॥ ॥

रीमनुगच्छति तद्वत्॥११॥एवंभूतस्य सर्वं साधनं व्यर्थमित्याह।किमिति।त्यागेन संन्यासेन।विविक्तेन एकांतसेवया।मौनेन वाक्संयमेन।१२।अनुतप्तः सन्नात्मानं
निंदति द्वाभ्यां।स्वार्थस्येति।अकोविदमतत्वज्ञं।गोखरवत् गोरिव खर इव जितः।१३।अधरासवं सेवमानस्य।आत्मभूर्मनसिजः पुनः पुनस्तद्ववर्ध।१४॥ ॥

एवमष्टतिः निर्वेदो निरूपितः। इदानीं तस्य विवेकमाह द्वाभ्यां शालिः। पुंश्चल्येति। अयं लावः। कर्म्मभिर्दैवानि ह्याद्दुःखमेव प्राप्तोऽस्मि। अतः परमेश्वरमेव लज्जेयमिति। १५॥ परमेश्वरप्रसादं विना देवैरुपदिष्टादपि वेदवाक्यान्मोहो न निवर्त्तत इत्याह। बोधितस्यापीति देव्या उर्वश्यापि सूक्तवाक्येन यथार्थवचनेन पुरूरवो मा मृथा मा प्रप्तो मा त्वा वृ
का सो अशिवास उक्षन्। न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता इत्यनेन। पूर्वं पुंश्चल्यापहृतं चित्तमित्यादिना तस्याऽपकारोऽनुस्मृतः। १६। इदानीं ममेवाय

पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः। आत्मारामेश्वरमृते भगवंतमधोक्षजं। १५। बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः। १६। किमेतया नोऽपकृतं रज्ज्वा वा सर्प्पचेतसः। रज्जुस्वरूपाविदुषो योऽहं यदजितेंद्रियः॥ १७॥ क्वायं मलीमसः कायो दौर्गंध्याद्यात्मकोऽशुचिः। क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः॥ १८॥ ॥

मपराध इत्याह। किमेतयेति। नः अस्माकं कामिनां एतया किमपकृतं न किंचिदपि। यथा रज्जुस्वरूपाविदुषो रज्जुं दृष्ट्वा भ्रमस्यां सर्प्पकल्पनया खिद्यतोऽपि रज्ज्वा किमपि नापकृतं तद्वत्। यद्यस्मात् योऽहमेवंभूतः स एवाजितेंद्रियत्वादपराधीत्यर्थः॥ १७॥ ननु तथाऽपि सैव सौगंध्यप्रेमादिगुणैः मोहमूलमित्याशंक्यते। ऽपि स्वपरिकल्पिता एवेत्याह क्वायमिति। मलीमसः अतिमलिनः अमनसां कुसुमानामिव गंधसौकुमार्यादि सौमनस्यं शोभनमनोभावो वा॥ १८॥ ॥

ममत्वमपि तस्मिन्न परिकल्पितमेवेत्याह पित्रोः किं स्वं कायः जनकत्वात् । नु वितर्के भार्यायाः वा भोगप्रदत्वात् अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वादुक्तं । स्वामिनो वा अधीनत्वात् । अग्नेर्वा अंते दाह्यं तदाहुतित्वात् । श्वगृध्रयोर्वा भक्ष्यत्वात् । किंच । आत्मनः तत्कृतसुखासुखलाभित्वात् । सुहृदां वा उपकारित्वात् । एवं यो न निश्चीयते ॥ ॥१९॥ तुच्छाः कृमिविड्भस्मलक्षणा निष्ठा अंतो यस्य तस्मिन्कायेकलेवरे प्रियत्वेन गृहीते । विषादमेवाह । अहो इति । सुनसं शोभननासिकं ॥२०॥ अतो गुणारोपेणाभ

१ उह्यते । आसक्तिं करोति । आसक्तिं

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः । किमात्मनः किं सुहृदामिति यो नावसीयते ॥१९॥ तस्मिन्कलेवरे मेध्ये तुच्छनिष्ठे विषज्जते । अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः ॥२०॥ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ । विण्मूत्रपूये रमतां कृमीणां कियदंतरं ॥२१॥ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् । विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥२२॥ अदृष्टादश्रुताद्भावान्न भाव उपजायते । असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः ॥२३॥ ॥

रममाणा मादृशाः कृमिसमा इत्याह । त्वगादिसंहतौ न त्वं संघाते देहे । विण्मूत्रादिसंहतौ रमतां कृमीणां वा ॥२१॥ यद्यप्येवं विलक्षिता एव स्त्रियः अथापि नोपसज्जेत अवलोकनादिनापि संगं न कुर्यात् । अर्थवित् विवेकी । अत्र हेतुः विषयेति ॥२२॥ ननु क्वचिन्निमीलितनयनादेरपि मनः क्षोभो दृश्यते । सत्यं । सोऽपि पूर्वदर्शनादिकं विना न भवतीत्याह । अदृष्टादिति । भावात्पदार्थात् भावो मनःक्षोभः । अतः प्राणान् इंद्रियाणि असंप्रयुंजतः नियच्छतः । स्तिमितं निश्चलं सत् ॥२३॥ ॥

इंद्रियैः कृत्वा। अविश्रब्धः अविश्वसनीयः मादृशां अविवेकिनां २४ फलितमाहात्म्यं। एवमिति। नृपेषु देवेषु उर्वशी प्यतीतिन्तथा॥ २५ उक्तिभिः हितोपदेशैरितितीर्थदिवा
दिसंगादपि सत्संगः श्रेयानिति दर्शयति। २६। सतां लक्षणमाह। संत इति विशेषणाष्टकस्य यथोक्तं हेतुहेतुमद्भावः॥ २७॥ न वतेषूपदेशापेक्षा। अपितु केवलं तत्संनिधिरेव ता
रयती त्याह। ते प्वितिसप्तभिः। २८। श्रवणादिभिरेव मत्पराः श्रद्दधाना अस्मंती लक्तिं विंदंति॥ २९॥ विभावसुमग्निं सेवमानस्य अप्येति नश्यति। तथा कर्म द्विजाद्यं अ

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः। विदुषां चाप्यविश्रब्धः षड्वर्गः किमु मादृशां॥ २४॥ ॥श्रीभगवानुवाच॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलो
कमथो विहाय। आत्मानमात्मन्यवगम्य मां वै उपारमत् ज्ञानविधूतमोहः॥ २५॥ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्। संत एतस्य छिंदंति मनो
व्यासंगमुक्तिभिः। २६। संतो नपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः। निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः॥ २७॥ तेषु नित्यं महाभाग महाभागेषु
मत्कथाः। संभवंति हिता नृणां जुषतां प्रपुनंत्यघं। २८। ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः। मत्पराः श्रद्दधानाश्च लक्तिं विंदंति ते मयि। २९। लक्तिं
लब्धवतः साधोः किमन्यदवशिष्यते। मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि। ३०। यथोपश्रयमाणस्य भगवंतं विभावसुं। शीतं भयं तमोप्येति सा
धून्संसेवतस्तथा। ३१। निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं। संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां। ३२॥

गामि संसारलयं तन्मूलमज्ञानं च नश्यतीत्यर्थः॥ ३१॥ निमज्ज्योन्मज्जतां उच्चावचयोनीर्गच्छतां परमायणं परमाश्रयः। ३२॥ ॥

भा०एका०
१२७

स

किंच। यथान्नमेव प्राणिनां जीवनं। अहमेव यथा शरणं। धर्म एव यथा प्रेत्य परलोके वित्तं। तथा संत एव अर्वाक् संसारपाताद्बिभ्यतः पुंस अरणं शरणं॥३३॥ किंच। संतश्च
क्षूंषि गुणनिर्गुणानि। नानि अर्कः पुनः सम्यगुत्थितोऽपि बहिः तदप्येकमेव चक्षुरित्यर्थः॥३४॥ अध्यायार्थमुपसंहरति। वैतसेन इति। सुद्युम्नस्तावेनोमावनं प्रविष्टस्स्त्री
तामेतानास्त्रीत्वं प्रामायस्य स्त्रीत्वं प्राप्तस्य इडात्मो वैतसेनः पुरूरवाः एवमुक्तप्रकारेणोर्वशी पालोकात्तस्यानादेवलोकनाद्वा निःस्पृहः अतोऽपि सत्संगादपि हेतोर्मुक्त

स्य

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं। धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणं॥३३॥ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः। देवता
बांधवाः संतः संत आत्माहमेव च॥३४॥ वैतसेनस्ततोऽप्येवमुर्वश्या लोकनिःस्पृहः। मुक्तसंगो महीमेतामात्मारामश्चचार ह॥३५॥ ॥ इति भाग
वते एकादशस्कंधे षड्विंशतितमोऽध्यायः॥ ॥उद्धव उ॥ ॥क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो। यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ

१

दि

संगः सन्नात्मारामो भूत्वा यथेष्टं चचारेति॥३५॥ इत्येकादशे षड्विंशः॥ सप्तविंशे क्रियायोगः सद्यश्चित्तप्रसादकः। सर्वकामा विहेतुश्च सांगः प्रोक्तः समासतः॥१॥
समाधाकुलचित्तानां कुतोऽसंगादिसंभवः। इति कृष्णार्चनं लक्ष्मसद्गुरुं पृच्छति॥२॥ क्रियायोगमिति। भवदाराधनं रूपं यस्मादिति कारणाधिष्ठानादिप्रश्नः स
र्वकारणकारणं निमित्तं तस्या विशिष्टत्वात्। यथेति कस्मिन्न अधिष्ठाने केन प्रकारेणेति प्रश्नः। येऽधिकारिणः सात्वता भक्ताः॥४॥१॥ ॥

राम
१२७

तुत्व

अस्य पुनर्विशेषतः प्रश्ने कारणमाह चतुर्भिः। एतद्वेदर्वतं निश्रेयसकरं वदंति। आंगिरसः सुतो वृहस्पतिः।२। निःसृतं त्वयोपदिष्टमित्यर्थः। देव्यै पार्वत्यै।३। सर्ववर्णानां
त्रैवर्णिकानां।४। विश्वेश्वरायेतेषामीश्वरं।५। कर्मकांडस्य पूजाविधानस्य नान्यंतो ग्रंथतः पारं च अनुष्ठानतो यस्य तस्य।६। वैदिक एव मंत्रो वैदिकान्येवांगानि यत्र

एतद्वदंति मुनयो मुहुर्निश्रेयसं नृणां। नारदो भगवान्व्यास आचार्योंगिरसः सुतः।२। निःसृतं ते मुखांभोजात यदाह भगवानजः। पुत्रेभ्यो भृगुमु-
ख्येभ्यो देव्यै च भगवान्भवः।३। एतद्वै सर्ववर्णानामाश्रमाणां च संमतं। श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद।४। एतत्कमलपत्राक्ष कर्मबंध-
विमोचनं। भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर॥५॥ ॥श्रीभगवानुवाच॥ ॥न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव। संक्षिप्तं वर्णयिष्यामि
यथावदनुपूर्वशः।६। वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः। त्रयाणामीप्सितेनैव विधिना मां समर्चयेत॥७॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्रा-
प्य पूरुषः। यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे।८। अर्चायां स्थंडिलेग्नौ वा सूर्ये वाप्सु हृदि द्विजे। द्रव्येण भक्तियुक्तोर्चेत्स्वगुरुं मामऽमायया।९
पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये। उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना॥१०॥ ॥

ह

स्मिन्नष्टु उपसूक्तादौ स वैदिकः। एवं तांत्रिकोपि। मिश्रोष्टाक्षरादि। मखः पूजा।७। यदा त्रैवर्णिकोपजेत तदा विशेषमाह। यदा गर्भाष्टमैकादशद्वादशादिकाले स्वनि-
गमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वमुपनयनं।८। अर्चायां प्रतिमादौ।९। स्नाने विशेषमाह। उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैश्च १०॥ ॥

किंच संध्योपासनादीनि कर्माणि श्रावोदितानि सा कल्पेन विहितानि यस्यया मितैः स्वहमे पूजां कुर्यात नवतानि परित्य जेदित्यर्थः सम्यक्त्वपरमेश्वरस्य विषय एव संकल्पोपस्यत था भूतः सरः कर्म्मपावनी कर्म्मनिर्हारिणी ॥ ११ ॥ अर्चाभेदानाह । शैली शिलामयी लौहो ह्येच वर्णादिमयी लेख्या वचंदनादिमयी । हृदि पूजा यां मनोमयी ।
।१२। प्रकर्षेणा तिष्ठत्यस्यामिति प्रतिमैव । जीवस्य भगवतो मंदिरं । यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति । प्रतिमाभेदेन विशेषमाह । सा ईत । उद्वा सोवि

संध्योपासनादिकर्माणि वेदेनाचोदितानि मे । पूजां तैः कल्पयेत्सम्यक् संकल्पः कर्मपावनी ॥ ११ ॥ शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥ १२ ॥ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं । उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने । ॥ १३ ॥ अस्थिरायां विकल्पः स्यात् स्थंडिले तु भवेद्द्वयं । स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं ॥ १४ ॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः । भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि ॥ १५ ॥ ॥

मार्जनं । अस्थिरायामर्चने विकल्पः शालग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्याद्वा न वेति । अविलेप्यायां स्नपनं लेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां परिमार्जनमेव ॥ १४ ॥ इदानीं सकामनिष्कामभेदेन विशेषमाह । द्रव्यैरिति । प्रकर्षेण सिद्धैः सुशोभनैः अमायिनो निःकामस्य भक्तस्य तु यथालब्धैः यत्र वंदनादि सर्वथा न लभ्यते तत्र हृदि भावतया । यद्वा हृदि भावेन मया यागः तदा भावेन मनोमये द्रव्यैरित्यर्थः ॥ १५ ॥ ॥

अधिष्ठानभेदेन प्रधानोपचारमाह सार्द्धेनाग्नाविति। तत्वविन्यासः यथास्थानं मंत्राश्च ध्यानं देवतानां तन्मंत्रैः स्थापनं।१६। अत्यर्हणांगपस्थाना वदि। सलिलादिति
स्वर्प्पणादिना यजनं। सर्वत्र साधारणमाह। अद्धयेति।१७।१८। एवमधिकारादिव्यवस्था मुक्त्वेदानीं पूजाप्रकारमाह। सुचिरिति। संभृताः संभाराः पूजासाधनानि ये
न सः प्रागग्रैर्दर्भैः। यद्वा प्रागेव संभृतः संभारः सन्नासीनः तत्वासीनः संमुखः स्थितो नु तत्संभारार्थं वारंवारमुत्तिष्ठेदित्यर्थः। प्राङ्मुख उदङ्मुखो वा आसीनः अर्चायां तु स्थि
नत

मानालंकरणां प्रेष्ठ सर्वायामेव तूद्धव। स्थंडिले तत्वविन्यासो वह्नावाज्यप्लुतं हविः।१६। सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः। श्रद्ध
योपहृतं प्रेष्ठं भक्तेन मम वार्य्यपि।१७। गंधो धूपः सुमनसो दीपान्नाद्यं च किं पुनः। मूर्त्यप्यभक्तोपहृतं न मे तोषाय कल्पते।१८। सुचिः संभृतसं
भारः प्राग्दर्भैः कल्पितासनः। आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः।१९। कृतन्यासः कृतन्यासां मदर्चां पाणिना मृजेत्। कलशं प्रोक्षणी
यं च यथावदुपसाधयेत्।२०। तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च॥ ॥

गायां संमुखः अर्चायामिति मुख उपविष्टः सन्प्राणा अनंतरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन्कृतन्यासः कृतो मूलमंत्रन्यासो यस्यां तां मदर्चां आमृजेत निर्मा
ल्याद्यपकर्षणादिना शोधयेत्। कलशं पूर्णकुंभं प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं उपसाधयेत् चंदनपुष्पादिभिः संस्कुर्यात् तदद्भिः प्रोक्षणीयाद्भिः देवयजनं देवपू
जास्थानं।२०॥

पाद्यार्घ्यार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैर्मंत्रैर्द्रव्यैः साधयेत् ॥ तत्र पाद्यादिद्रव्याणि पाद्ये श्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ॥ दूर्वा इति क्रमादर्घद्रव्याष्टकं स्मृतं ॥ जातीलवंगकंकोलैर्मतमाचमनीयकमिति ॥ तानि त्रीणि पात्राणि यथाक्रमं हृदयादिमंत्रैर्गायत्र्या वसवर्णेनाभिमंत्रयेत् ॥ २२ ॥ तदनंतरं पिंडे देवाग्निसंस्थं हृदयं इति को भ्रा गते नवा पुनाशो ते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलामृतमये जाते तस्मिन् हृत्पद्मस्थां परां

हे

प्रोक्षणपात्राणि त्रीणि पूर्वोक्तैर्मंत्रैर्द्रव्यैश्च साधयेत् ॥ पाद्यार्घाचमनीयार्थं त्रीणि पात्राणि देशिकः ॥ २१ ॥ हृदा शीर्षाख्य शिखया गायत्र्या वाभिमंत्रयेत् ॥ २२ ॥ पिंडे वाय्वग्निसंस्थे हृत्पद्मस्थां परां मम ॥ एवं जीविकलां ध्यायेन्नादांते सिद्धलाक्षितां ॥ २३ ॥ तया तन्मयभूतया पिंडे व्याप्ते संपूज्य तन्मयः ॥ आवाह्य अब्दिविस्थाप्य न्यस्तांगां मां प्रपूजयेत् ॥ २४ ॥ ॥ ॥

श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् ॥ कथंभूतां ॥ नादांते सिद्धलक्षितां प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यानं ॥ तथा चश्रुतिः ॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति ॥ २३ ॥ तया तन्मयभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभयाऽगृहमिव व्याप्ते सति तस्मिन्नेवादौ मानसैरुपचारैः संपूज्य तन्मयः सन्नब्धादिषु बाह्यस्थापनस्थानेषु स्थापयित्वा ॥ २४ ॥ ॥

कथं पूजयेत्तदाह। पाद्येति द्वाभ्यां। धर्मादिभिर्मासनं तत्र पद्मं च कल्पयित्वा तस्यां वेदतंत्रात्याभ्यां स्वयंसिद्ध्ये मर्घ्यं पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः। उपस्पर्शः आचमनं। २५। उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये। अयमर्थः। धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतुःकोणेषु पादाः। अधर्मादीनि पूर्वादिदिक्षु गात्राणि। त्रयो गुणाः पट्टिकाः। तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशाना नुग्रहेति नव शक्तयः। एवं यथोपदेशं च

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत्। धर्मादिभिश्च नवभिः शक्तिभिः कल्पयित्वासनं मम। २५। पद्ममष्टदलं तत्र कर्णिका केसरोज्ज्वलं। उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये। २६। सुदर्शनं पांचजन्यं गदासीषुधनुर्हलान्। मुशलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत्। २७। नंदं सुनंदं गरुडं प्रचंडं चंडमेव च। महाबलं बलं चैव कुमुदं कुमुदेक्षणं। २८। दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान्। स्वे स्वे स्थाने त्वभिमुखान् पूजयेत्प्रोक्षणादिभिः॥ २९॥ ॥

मदिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वेति। कर्णिकायाः केसरैश्च तत्रस्थसूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः। २६। आयुधादिपूजामाह। सुदर्शनमिति त्रिभिः। तत्र त्वष्टांगमितं गावरणपूजा सूचिता। आसनतेनैव शक्त्यावरणमप्युक्तं। ततः सुदर्शनादिमुशलांतान्यायुधान्यष्टदिक्षु कौस्तुभमालाश्रीवत्सानुरसि। २७। नंदादीन्पार्षदानष्टदिक्षु। गरुडं पुरतः। २८। दुर्गादीनि कोणेषु गुरूत्वामतः। सुरानिंद्रादीलोकपालान्पूर्वादिदिक्षु एवमेतान् देवस्य। अभिमुखान्प्रोक्षणादिभिः पूजये

दित्यर्थः॥ ॥ ॥

पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं।तानेवगुणविधिभिःप्रपंचयति।वंदनेतिषड्भिः।३०।मंत्रानाह।स्वर्णधर्मानुवाकः।सुवर्णधर्मपरिवेदवैनमित्यादि।महापुरुष
विद्या।जितंतेपुंडरीकाक्षनमस्तेविश्वभावन।सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वजेतिपौरुषंसूक्तंसहस्रशीर्षेत्यादिराजनादीनिसामानि।इंद्रंनरोनेमधिताहवंतइ
त्यस्याःऋचिगीतानि।आदिशब्देनरौहिणादीनि।३१।वस्त्राद्युपचारेषुअलंकारलक्षणंगुणंविधत्ते।वस्त्रेति।पत्राणिकपोलवक्षस्थलादिषुलिखिताःपत्रभंगाः।मद्भक्तःस्वे

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः।सलिलैःस्नापयेन्मंत्रैर्नित्यदाविभवेसति।३०।स्वर्णधर्मानुवाकेनमहापुरुषविद्यया।पौरुषेणापि
सूक्तेनसामभीराजनादिभिः।३१।वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः।अलंकुर्वीतसप्रेममद्भक्तोमांयथोचितं।।३२।।पाद्यमाचमनीयंचगंधं
सुमनसोऽक्षताः।धूपदीपोपहार्याणिदद्यान्मेश्रद्धयार्चकः।३३।गुडपायससर्पींषिशष्कुल्यापूपमोदकान्।संयावदधिसूपांश्चनैवेद्यंसतिक
ल्पयेत्।३४।अभ्यंगोमर्दनादर्शदंतधावाभिषेचनं।अन्नाद्यगीतनृत्यानिपर्वणिस्युरुतान्वहं।।३५।। ।।

त्स्प्रेमयथात्नवतितथायथोचितमलंकुर्वीतेत्युक्तार्थः।३२।सर्वसाधारणंश्रद्धालक्षणंगुणंविधत्तेपाद्यमिति।३३।नैवेद्येवैलक्षण्यंगुणंविधत्ते।गुडपायसेति।श
ष्कुल्यःतैलपक्वविशेषाः।आपूपाःअपूपाःमंडकादीनांसमूहाः।सूपाःअजनानि।सतिविभवइतिशेषः।।३४।।कालभेदेनगुणंविधत्ते।अभ्यंगेति।अभिषेचनंपंचामृता
भिषेचनं।अन्नाद्येति।अन्नंतोयं।आद्यंलक्ष्यंपर्वणिएकादश्यादौ।अन्वहंप्रत्यहंवा।विभवेसतीति।।३५।। ।। ।।

फलभूयस्त्वार्थिनोऽग्नावपि पूजाप्रकारमाह॥ विधिना स्वगृह्योक्तप्रकारेण मेखलादिलिखनलक्षणेन विहिते विनिर्मिते। तदुक्तं विष्णुरोद्धृयतलिप्रोमेखला स्वतरयुलः
हस्तमात्रोलवेद्वर्तैःसयोनिर्वेदिकातथेत्यादि। उदितं प्रज्वलितमग्निं परितःसमूहेतएकत्र कुर्यात् ॥३६॥ दर्भैःपरिस्तीर्य परितःप्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकं
त्रिः कर्माहुतिं समिध्वे हेत्यादिरूपं कर्म कृत्वा अग्नेरुत्तरतोऽद्भ्याणिहोमोपयोगीन्यासाद्यनिधाय प्रोक्षणपात्रे प्रणीता त्रोदकेन प्रोक्ष्य स्थापयेत् मां ध्यायेत ॥३७॥ शंखादि लिखितं

विधिना विहिते कुंडे मेखलागर्तवेदिभिः। अग्निमाधाय परितः समूहेत्पाणिनोदितं ॥३६॥ परिस्तीर्याथ पर्युक्ष्य अन्वाधाय यथाविधि। प्रोक्षणा
साद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत मां ॥३७॥ तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः। लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ॥३८॥ स्फुरत्किरीटकटकक
टिसूत्रवरांगदं। श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥३९॥ ध्यायन्नभ्यर्च्य दारूणि हविषा भिघृतानि च। प्रास्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः
स्या। ४०

संतः शोलमानाश्चत्वारो भुजा यस्य तं ॥३८॥ स्फुरंति किरीटादीनि यस्य तं ॥३९॥ हविषा घृतेन अभिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य। आघारौ त
त्संज्ञकौ याग्गौ। एवमाज्यभागौ च दत्वा तदर्थं आहुती हुत्वेत्यर्थः। तत्राघारौ प्रजापतये स्वाहा इंद्राय स्वाहेति वोत्तरदक्षिणपरिधिसंधिमारभ्याग्नि मध्यात्परिस्रुतं घृत
धारारूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ॥४०॥ ॥ ॥ ॥

[OrderDescription]
,CREATED=01.06.20 12:52
,TRANSFERRED=2020/06/01 at 13:18:36
,PAGES=144
,TYPE=STD
,NAME=S0003042
,Book Name=M-2952-SHRIMAD BHAGWAT DASHAM SKANDH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF

FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,